श्रीः

स्वस्ति श्रीमद्भारद्वाजगोत्ररत्नाकर-विराजन्मणिवर-
शिवार्कमणिदीपिका-परिमलादि-चतुरधिक-
शतप्रबन्धनिर्वहणपारीणश्रीकण्ठ-
विद्येशावताररूपाद्वैविद्याचार्य-
वर्यश्रीमदप्पय्यदीक्षितचरण-
विरचिता

# आत्मार्पणस्तुतिः

तत्कुलभवश्रीचिदम्बरानन्दतीर्थशिष्य-
श्रीकालहस्तीशशरणविमुक्ताश्रय-
विमुक्तभवश्रीशिवानन्दयति-
विरचितात्मार्पणस्तुति-
व्याख्या-**बालबोधिनी**

शिवाभ्यां नमः

**श्रीमदप्पय्यदीक्षितेन्द्रकृता**

# आत्मार्पणस्तुतिः

तद्वंशोद्भवेन **श्रीशिवानन्दयातिना**

विरचितया बालबोधिन्याख्यया

व्याख्यया संवलिता

---

श्रीमद्दक्षिणकैलासपतिं साम्बं शिवाप्तये ।

नौमि श्रीकण्ठविद्येशं तद्वाणीं नुतिरूपिणीम् ॥

अथ श्रीताम्रपर्णीतटकुटीरब्रह्मनिष्ठगरिष्ठ**श्रीमच्चिदम्बरानन्दतीर्थ**गुरुवरचरणसरोजसेवापरायणश्रीकालहस्तीशशरणः **श्रीशिवानन्दयतिः** श्रीमद्दीक्षितचरणविरचि**तात्मार्पणस्तव**सुधाणून् क्वचित् लेलिहानः केवलमौत्सुक्येन देहसंबन्धाभिमानतश्च व्याचिख्यासुः शिवाप्तये स्वाभीप्सितदेवस्मरणलक्षणं मङ्गलमुद्दिश्याह— **श्रीमद्दक्षिणकैलासपतिमिति** । श्रीमति दक्षिणकैलासस्थले श्रीमदुत्तरकैलासयात्राशक्तानां भजनार्थं दयया अत्राविर्भूय भक्तान् पातीति श्रीमद्दक्षिणकैलासपतिः, तं **साम्बम्** ज्ञानाम्बिकासमेतं शिवम् स्वप्रकाशम्; **शिवाप्तये** ; सकलकल्याणावाप्तये नौमि ।

तथा—**श्रीकण्ठविद्येशम्** , श्रीमद्दीक्षितचरणमित्यर्थः । **तद्वाणीम्** ; आत्मार्पणस्तुतिरूपिणीं च, **नौमि** ; " णु स्तुतौ " इति धातोः स्तौमि, स्तुतिं करोमीत्यर्थः । श्रीविद्येशदीक्षितयोः केन संबन्धेनैकत्वमित्येतत् उपरि सप्तमश्लोकव्याख्यायां विवरिष्यते । ' तद्वाणीं नौमि ' इत्युक्त्या यथाकथंचिद् वचनैः स्तुतिमात्रस्य ममाधिकारः, न हि तदर्थविवरणे इति । एवं साम्बशिवविद्येशतद्वाणीनां स्तुतिकरणरारम्भकत्वोक्त्या सर्वे गुरवः शब्दार्थसरणिशरणाः संतुष्टाः मदुक्तिस्खालित्यदोषान् विस्मृत्य माम् अनुगृह्णन्त्विति भावः ॥

सा स्तुतिः कीदृशीत्याह—

**कस्ते बोद्धुं प्रभवति परं देवदेव प्रभावं**
**यस्मादित्थं विविधरचना सृष्टिरेषा बभूव ।**
**भक्तिग्राह्यस्त्वमिह तदपि त्वामहं भक्तिमात्रात्**
**स्तोतुं वाञ्छाम्यतिमहदिदं साहसं मे सहस्व ॥ १ ॥**

**कस्त** इति । हे देवदेव ! दीव्यन्तीति देवा: विष्ण्वादय:, तेषामपि भासकत्वात् देवदेव: । तथा च **श्रुतिः**—“तस्य भासा सर्वमिदं विभाति” इति । **ते** ; तव, **परम्** ; उत्कृष्टम्, सर्वातिशायिनम् । **प्रभावम्** महिमानं, सुरनरादिषु को वा चेतन:, **बोद्धुं** ; बुद्धिवृत्त्या विषयीकर्तुं प्रभवति शक्नोति ; न कोऽपीत्यर्थ: । **श्रुतिः**—

“ देवा ह वै स्वर्गं लोकमगमयन्, ते देवा रुद्रमपृच्छन्,
को भवानिति ? (१) सोऽब्रवीत्, अहमेक: प्रथममासम्, वर्तामि
च भविष्यामि, नान्य: कश्चन मत्तो व्यतिरिक्त: ॥ (२) ”

इति श्रुत्या तेषां विष्ण्वादीनामपि श्रीरुद्रस्य पारमार्थिकरूपस्य अविज्ञातत्वे सति, त्वत्प्रभाववित् न कश्चिदस्तीति भाव: ।

अपि च—यस्मात् **एषा** ; सर्वजनदृग्विषया, **सृष्टिः** ; सर्ग:, **इत्थं विविधरचना** सती बभूव, इत्थमिति रचनावैविध्यमेव अभिनीय दर्शयति—यथा मयूरसूकरादे: वीर्यकणिका: नानावैचित्र्यवर्णा:, विविधभावाश्च समुत्पद्यन्ते । इदमेव महदिन्द्रजालमित्युक्तं **श्रीवसिष्ठेन**—

“ एतस्मात् किमिवेन्द्रजालमपरं यद्गर्भवासस्थितं
रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानाङ्कुरम् ।
पर्यायेण शिशुत्वयौवनजरावेषैरनेकैर्वृतं
पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथागच्छति ॥ ”

इति । एवंविधा सृष्टि: यस्मात् सर्वज्ञात् सर्वशक्ते: परमेश्वरात् बभूव । तस्य ते प्रभावं परं न कोऽपि बोद्धुम् अर्हतीत्यर्थ: । **तदपि** ; तथापि, **त्वम्**, **भक्तिग्राह्यः** असि । “ भक्ति: स्याद् भागसेवयो: ” इति **नानार्थरत्नकोशः** । “ भज सेवायाम् ” इति **धातुः** । संततमानससेवारूपया भक्त्या ग्राह्य: । गृहीतुम् अवगन्तुं शक्योऽसि । तथा च **ईश्वरगीता**—“ध्यानेन वृणुते यो मां सर्वदाहं वृणोमि तम्” इति । **भगवद्गीता** च—

“ अनन्यचेता: सततं यो मां स्मरति नित्यश: ।
तस्याहं सुलभ: पार्थ नित्ययुक्तस्य योगिन: ॥ ”

इति । तस्मात् **अहं त्वां भक्तिमात्रात्** ; अत्र मात्रशब्दप्रयोग: पुनर्वैदुष्यादिसाधनान्तरव्यावृत्त्यर्थ: । **स्तोतुं वाञ्छामि** ; यथाकथंचिद् अमृतत्वाप्तये शिव एव स्तोतव्यो हि । **श्रुतिरपि**—

“ कदु प्रचेतसे महे वचो देवाय शस्यते ।
तदिद्ध्यस्य वर्धनम् ॥ ”

इति । अस्या: श्रुतेरयमर्थ:—रे जना: ; **कत्**, कदा, **उ**, अनर्थक: । **प्रचेतसे** ; प्रकृष्टज्ञानाप्तये, **महे देवाय** ; महते देवाय, महादेवायेत्यर्थ: । **वचः** ; स्तुतिरूपम् । **शस्यते** ; कीर्त्यते । **तत् इत् हि अस्य**, परमेश्वरस्य, **वर्धनम्** ; प्रियकरमित्यर्थ: । पुनरपि—

" स्तुहि श्रुतं गर्तसदं युवानम् " ;
" कथ्यं कविं कल्पकं कामरूपं स्तुष्टुवांसो ऽमृतत्वं भजन्ते "

इति श्रुतिभ्यः कथंचित् स्तोतुं वाञ्छामि । मम इदम् **अतिसाहसम्**, स्तोतव्यस्य शिवमहिमलेशस्यापि अनवगम्यमानत्वे स्तोत्रारम्भणमिदम् अतिसाहसमेव, तत् सहस्व ; क्षमस्वेत्यर्थः ॥

ननु—अत्र स्तोत्रारम्भे भगवता श्रीमद्दीक्षितचरणेनापि, ' अथ-नम-स्वस्ति-श्रीमुख-शोभनपदप्रयोगाभावात् शिष्टाचारपरिप्राप्तस्वेष्टदेवतास्मरणलक्षणमङ्गलवचः कुतो न प्रयुज्यत इति मा शङ्किष्ठाः ' क ' इति स्तोत्रारम्भवर्णनतया सर्वाः श्रेष्ठदेवताः संतुष्टा भवेयुः इत्यभिप्रायः । तथा हि **नानार्थरत्नमालायाम्**—" को ब्रह्मात्मानिलार्काग्निचित्तधीयमकेकिषु " इति । अत्र **ब्रह्म**शब्देन अखण्डसच्चिदानन्दं तत्पदलक्ष्यार्थं ब्रह्म, वाच्यार्थेश्वरः, वेदश्चापरं ब्रह्म स्मृतम् । आत्मशब्देन त्वंपदलक्ष्यार्थं प्रत्यक्चैतन्यं सर्ववृत्तिसाक्षिकम्, त्वंपदवाच्यार्थं आत्मा च । **अनिलः** ; महाबलप्रदः वायुः; संवर्गविद्याश्रयः । **अर्कः**; कर्मसाक्षी रविः । **अग्निः**; यागहोमसाधनः । **चित्तश**ब्देन समष्टयन्तःकरणं हिरण्यगर्भसंज्ञमासीत् । **धीः** ; बृहस्पतिः । **यमः** ; सर्वनियन्ता चेति ' क ' इति वर्गोक्त्यैव संस्मृता भवति । न हि इतोऽपि अन्या स्वाभीष्टदेवताः शिष्यन्त इति श्रीकण्ठमतप्रतिष्ठापनाचार्यभाव इत्यवगम्यते ।

अत्रान्वयस्तु—देवदेव ते परं प्रभावम् इह बोद्धुं कः प्रभवति ? यस्मात् इत्थं विविधरचना एषा सृष्टिः बभूव ; तदपि त्वम् इह भक्तिग्राह्यः इसि । ततः त्वाम् अहम् भक्तिमात्रात् स्तोतुं वाञ्छामि, अतिमहद् इदं मे साहसं क्षमस्व इति ॥ १ ॥

**क्षित्यादीनामवयववतां निश्चितं जन्म तावत्**
**तन्नास्त्येव क्वचन कलितं कर्त्रधिष्ठानहीनम् ।**
**नाधिष्ठातुं प्रभवति जडो नाप्यनीशश्च भाव-**
**स्तस्मादाद्यस्त्वमसि जगतां नाथ जाने विधाता ॥ २ ॥**

**क्षित्यादीनामिति** । क्षीयन्ते निवसन्ति अस्यां सर्वे इति क्षितिः ; " क्षि निवासगत्योः " इति **धातुः** । अवयौति मिश्रीभवति इत्यवयवः । तद्वतां क्षित्यादीनां भूमिजलादीनां सावयवत्वात् तेषां जन्म तावत् निश्चितमेव । तज्जन्म च क्वचन लोके शास्त्रे वा कर्त्रधिष्ठानहीनं नास्त्येव । यथा घटादिजन्म कंचित् कर्तारं कुलालादिं, मृदाद्यधिष्ठानं च विना न सं भवति । तद्वत् कर्तारम्, अधिष्ठानं च विना न क्वापि कलितमित्यर्थः ।

यद्वा—कर्ता चाधिष्ठानं च कर्त्रधिष्ठाने, ताभ्यां विहीनं यस्मिन् कर्मणि तत् यथा भवति तथा, क्वचन कलितं नास्त्येवेत्यर्थः । तर्हि जन्मरूप एव नास्त्येवेत्यर्थः । तर्हि जन्मरूप एव धर्मः, कर्ता चाधिष्ठानं भवतु इति चेत्, न ; स्वयं जडत्वात् जडस्योत्पत्तौ अन्यो जडः कर्ता भवेत् इत्येतत् **बकबन्धनकौशलं भवेद्धि** ; तस्मात् जडस्य अन्यो जडः स्वयं वा न हि कर्ता भवितुमर्हति ।

अथ वा—कश्चित् चेतनो भावपदार्थः कर्ता भवतीति चेत्, न; स्वकर्मफलभोगावश्यंभावित्वेन अनीशत्वात्। यथा घटादिकर्ता तदुत्पादनध्वंसनस्वातन्त्र्यवान् दृश्यते। न तादृशः कश्चित् चेतनः सकलभुवनतनुकरणादि(षु) सृष्ट्यादिसमर्थो दृश्यते। तस्मात् अनीशो जीवभावश्च न कर्ता भवितुमर्हति। मायापि जडत्वेन निरस्ता आसीत्। **तस्मात्**; पारिशेष्यात् **आद्यः** यः सृष्टेः **पूर्व**मेव भवतीति आद्यः त्वमेव सकलजगतां विधातेति जाने। उत्पन्नस्य उत्पादकपूर्वकत्वनियमादिति भावः।

अन्वयस्तु—हे नाथ! अवयववतां क्षित्यादीनां जन्म तावत् निश्चितम्। तज्जन्म च कर्त्रधिष्ठानहीनं यथा भवति तथा कलितं नास्त्येव। जडः अधिष्ठातुं न प्रभवति। अनीशो जीवभावश्च न प्रभवति। तस्मात् पारिशेष्यात् त्वमेव सकलजगतां विधातेति जाने।

अत्र—स्तुतौ प्रथमश्लोकमारभ्य द्विचत्वारिंशच्छ्लोकपर्यन्तं **मन्दाक्रान्तावृत्त**मेव; तल्लक्षणं तु—, "मन्दाक्रान्ता जलधिषडगैर्म्भौ युतो तौ गुरू चेत्" इति; मगणभगणौ, यगणतगणौ, द्वौ गुरू चेत्, मन्दाक्रान्तेत्यर्थः ॥ १ ॥

**इन्द्रं मित्रं वरुणमनिलं पद्मजं विष्णुमीशं**
**प्राहुस्ते ते परमशिव ते मायया मोहितास्त्वाम्।**
**एतैः सार्धं सकलमपि यच्छक्तिलेशे समाप्तं**
**स त्वं देवः श्रुतिषु विदितः शंभुरित्यादिदेवः ॥ ३ ॥**

हे परमशिव! ब्रह्मादिपञ्चतत्त्वमूर्त्युपास्य ते मायया मोहिताः ते कारणवादिनः, ईशं सकलभुवनपञ्चकृत्यसमर्थं **त्वाम्**; **इन्द्रं** परमैश्वर्यवन्तं स्वर्गाधिपं ग्राम्यजनः राजकीयं राजानमिव सर्वकारणमाहुः। तथा अन्ये **मित्रम्**; अभिवर्षणातपादिना सर्वभूतेषु मेद्यति स्निह्यति इति मित्रम्। "ञि मिदास्नेहने" इति **धातुः**। तथा **वरुणम्**; वृणोति वरान् अमुम् लोक इति वरुणं सर्वकारणमाहुः। एवम् **अनिलं**; **पद्मजं**, **विष्णुं** वा कारणमाहुः। पारमार्थिकं सर्वकारणं त्वद्रूपमनादृत्य तत्तदुपाधिप्राधान्येन निगदन्तीति भावः।

यद्यपि—इन्द्रादिसर्ववैभवं पारमेश्वरमेव। "सर्वो वै रुद्रः" इत्यादि**श्रुतिभिः** स्वामिभृत्यन्यायेन त्वत्कृतमेवेति वादिनो न जानत इति; अतः **ते**; तव, **मायया मोहिता** इत्युक्तम्। अयं **कारणवादश्रुत्यापि** इत्थ विकल्प्यते। श्रुतिस्तावत्—

"ब्रह्मवादिनो वदन्ति—

"किं कारणं ब्रह्म कुतः स्म जाता
जीवाम केन क्व च संप्रतिष्ठाः।
अधिष्ठिताः केन सुखेतरेषु
वर्तामहे ब्रह्मविदो व्यवस्थाम् ॥ (१)

काल: स्वभावो नियतिर्यदृच्छा
भूतानि योनिः पुरुष इति चिन्त्यम् ।
संयोग एषां न त्वात्मभावा-
दात्माप्यनीशः सुखदुःखहेतोः ॥ (२)
ते ध्यानयोगानुगता अपश्यन्
देवात्मशक्तिं स्वगुणैर्निगूढाम् । (३)*

इति । अस्याः श्रुतेरर्थः **श्रीविद्यारण्यचरणैः** विविच्यते—

"ये वेदवादिनस्ते तु मीमांसन्ते मुमुक्षवः ।
जगतः कारणं ब्रह्मेत्येवं वेदेषु घुष्यते ॥
कालः स्वभावो नियतिर्यदृच्छा भूतपञ्चकत् ।
प्रधानं जीव एतानि मतान्युक्तानि शास्त्रिभिः ॥

* * *

ऋतुकाले भवेद् गर्भो वर्षर्तौ सस्यसंभवः ।
उदाह्रियत इत्यादि बहुधा **कालवादिना** ॥
**स्वभाववाद्यग्निमुष्णं** जलं द्रवमुदाहरत् ।
रूपज्ञानं चक्षुषैवेत्याहु**र्नियतिवादिनः** ।
धनिकत्वादिव्यवस्था **यदृच्छावादिनो**च्यते ॥

---

१. ब्रह्मवादिनः, ब्रह्मवदनशीलाः मुनयः सर्वे मिलित्वा वेदार्थेतरस्वातिरिक्तास्तितावादिपक्षनिरसपूर्वकं; "सर्वे वेदा यत्पदमामनन्ति" इति, "वेदार्थः परमाद्वैतं नेतरत्" इति श्रुतिस्मृत्यनुरोधेन स्वातिरिक्तापह्नवसिद्धं ब्रह्ममात्रं निष्प्रति-योगिकतया अवशिष्यत इति, वदन्ति, कथयन्तीत्यर्थः ।

ब्राह्मणवाक्येन योऽर्थः प्रकाशितः, तमेतमर्थम् उत्तरे मन्त्राः प्रतिपादयन्तीत्याह—किं कारणमित्यादिना । स्वाज्ञ-दृष्टिप्रसक्तस्वातिरिक्तस्वाविद्यापदतत्कार्यजातस्य किं कारणं ब्रह्म, अन्यद्वा ? किं तद् ब्रह्म निर्विशेषं ? सविशेषं वा ? किं तत् निमित्तम्, उपादानं वा ? यद्वा—निमित्तकारणमेवैतत् । वयमाकाशादिवत् कुतः स्म जाता स्थितिकाले ब्रह्मकार्यतया स्थिताः, सुषुप्तिप्रलयादौ उपादानब्रह्मणि लयं गताः सन्तः प्रबोधसर्गादौ पुनः ब्रह्मकार्यतया वयं जाताः ।

अथ वा—जलचन्द्रघटाकाशस्थानीयाश्च वयं सुषुप्तिप्रलयादौ उपाधिविलये बिम्बचन्द्रमहाकाशस्थानीयब्रह्मणा ऐक्यमनुभूय, पुनः प्रबोधादौ ब्रह्मविवर्ततया जाताः । जीवामः केन, केन वयं जीवामः, लडर्थे लोट्, अदृष्टेन ईश्वरेण स्वभावेन वा । क्व च संप्रतिष्ठाः ? स्वापादौ अस्माकं विकारिणि ब्रह्मणि वा अवस्थानम् । क्व च संप्रतिष्ठिता इत्यस्मिन् पाठे मुक्तौ कीदृशे ब्रह्मणि वयमेकत्वेन अवस्थिता इत्यर्थः । केन वयम् अधिष्ठिताः ? अधिदेवतादिना ईश्वरेण उभाभ्यां वा अधिष्ठिताः सन्तः, सुखेतरेषु सुखदुःखदप्रपञ्चेषु वर्तामहे हे ब्रह्मविदः वयं सम्यग् विचिन्त्य व्यवस्थां कुर्मः, इति ।

**भूतवादी** देहगतकाठिन्यादीनुदाहरत् ।
**प्रधानवादी** पुरुषान् सात्त्विकादीनुदाहरत् ॥
[1]मीमांसकाः कर्मवशाद् देवजन्माद्युदाहरन् ।
सर्वत्र युक्तेर्दृष्टत्वात् किं तत्त्वमिति चिन्त्यते ॥
सर्वेषामनिवार्यत्वात् तत्संघोऽस्त्विति चेन्न तत् ।
स्वतन्त्रे चेतने जीवे सति कालाद्यचेतनाः ॥
समप्रधानभावेन कथं संघीभवन्ति ते ।
तर्हि जीवो हेतुरस्तु तन्न दुःखादिदर्शनात् ॥
स्वतन्त्रः स्वात्मनो दुःखं कुर्वन् दृष्टो न हि क्वचित् ।
दोषान् सर्वेषु पक्षेषु पश्यन्तो बहुधा तदा ।
मायाशक्तिमनिर्वाच्यामपश्यन् ध्यानयोगतः ॥ ”

इति ।

**अत्रेदमनुमानम्**—यथा विवादाध्यासितं स्त्रीपुंनपुंसकवाच्यं तनुकरणादिकार्यं जगत्; सोपानवत् कर्तृपूर्वकं, कार्यत्वात् घटवत् इति । तथा च **शिवज्ञानबोधे**—

“ स्त्रीपुंनपुंसकादित्वाज्जगतः कार्यदर्शनात् ।
अस्ति कर्ता सहृत्वे सृजत्यस्मात् प्रभुर्हरः ॥

इति । आगमान्तरित**पौष्करे**—

“ विवादाध्यासितं विश्वं विश्ववित् कर्तृपूर्वकम् ।
कार्यत्वादनयोः सिद्धं कार्यं कुम्भादिकं यथा ॥
अचेतनस्य मायादेः प्रवर्तकतया पतिः ।
सिद्धः सर्वार्थवित् कर्ता व्यापकः सततोदितः ॥
धर्मेणेन साध्यते धर्मी क्वचित् कार्येण कारणम् ।
कारणेन क्वचित् कार्यं क्वचिदाम्नायदर्शनात् ॥
ततः प्रथमसृष्टेस्तु समस्तोपाधिवर्जितः ।

---

१ जीववादी इति मुद्रितकोशे

कर्ता महेश एवेष्टः प्रवृत्ताशेषशक्तिकः ॥

यथार्को दिनचेष्टायां संनिधेरुपकारकः ।

तथा संनिधिमात्रेण विदधात्यखिलं शिवः ॥"

इति **श्रीसूतश्च**—

"शिवात् सत्यपरानन्दप्रकाशैकस्वलक्षणात् ।

आविर्भूतमिदं सर्वं चेतनाचेतनात्मकम् ॥

सृष्ट्यर्थमैक्षत प्राज्ञा बहुस्यामिति शक्तिमत् ।"

इति । "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्"[1] इति **ब्रह्मसूत्राच्च** शिव एवाभिन्ननिमित्तोपादानः सर्वं निर्मिमीत इति सिद्धम् ।

तस्मात् त्वन्मायामोहिता एव भिन्नं कारणं वदन्ति ; परमार्थतस्तु—इन्द्रमित्रकालादिकरणैः एतैः सार्धं सकलसृष्ट्यादिकार्यं **यच्छक्तिलेशे,** यस्य ते शक्तीनां वामाज्येष्ठेच्छोद्यानां मध्ये कस्याश्चित् शक्तेः लेशे कटाक्षमात्रे समाप्तं कृतं भवति । **स** तादृशो **देवः त्वं शंभु**रिति, **आदिदेव** इति च **श्रुतिषु ; अथर्वशिखाद्यासु** विदितः । तथा च **श्रुतिः**—

"सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते,

सर्वाणि चेन्द्रियाणि च सहभूतैः ; न कारणं

कारणानां धाता ध्याता कारणं तु ध्येयः

सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये"[2]

इति । एवं बहुश्रुतिबलात् शंभुरेव सर्वकारणमिति निश्चीयते ।

अन्वयः—ते मायया मोहिताः ते वादिनः ईशं त्वाम् इन्द्रं, मित्रं, वरुणम्, अनिलं, पद्मजं, विष्णुं चाहुः । सकलमपि एतैः साकं यच्छक्तिलेशे समाप्तम् । स देवः त्वं श्रुतिषु शंभुरिति, आदिदेव इति च विदितः ॥

---

१ प्रकृतीति । प्रकृतिः उपादानं ब्रह्म । चकारेण निमित्तकारणमपि । कुतः? "येनाश्रुत श्रुतं भवति" इत्यादि-प्रतिज्ञा । "यथा सोम्य" इत्यादिः दृष्टान्तः । प्रतिज्ञा च दृष्टान्तश्च प्रतिज्ञादृष्टान्तौ, तयोः उपरोधः पीडनम्, संकोचः, तद्विपरीतः अनुपरोधः, तस्मात् इत्यस्य सूत्रार्थः ।

२ यस्मात् इदं सर्वं जगत् तत्सर्गस्थितिभिङ्गकर्तारः ब्रह्मविष्णुरूद्राश्च ते संप्रसूयन्ते पञ्चभूतैः सह सर्वाणि इन्द्रियाणि च संप्रसूयन्ते तत्कारणम् ईश्वराख्यं ब्रह्म, तदतिरेकेण भूतैः सह इन्द्रियाणि सत्त्वरजस्तमांसि वा न हि कारणपदं भवति । मद्व्यतिक्तम् अणुमात्रं न विद्यते इति, धाता परमेश्वरस्तु स्वयमेव सर्वध्येयः भूत्वा स्वकार्यत्वेऽपि मिथः कार्यकारण-भावम् आपन्नानां वियदादीनां कारणं भवति । सर्वकारणत्वेन यो ध्येयः, सोऽयं सर्वज्ञत्वसर्वेश्वरत्वसर्वकारणत्वसर्वान्तर्या-मित्वादिसर्वैश्वर्यसंपन्नः सर्वेश्वरः स्वांशसर्वप्राणिस्वामित्वात्, शंभुः, सर्वसुखकृत्, एवंविशेषणविशिष्टः परमात्मा सदा य विजयते" इति मन्त्रार्थः ।

एवं स्वप्रधानोपास्यं त्वाम् अप्रधानेन इन्द्रमित्रादिरूपेण वदन्तीत्युक्तम् । तत्परमार्थपरशिवरूपं कीदृक् ? कुत्र वा विभाति ? इत्यत आह—

**आनन्दाब्धेः कमपि च घनीभावमास्थाय रूपं**
**शक्त्या सार्धं परममुमया शाश्वतं भोगमिच्छन् ।**
**अध्वातीते शुचिदिवसकृत्कोटिदीप्रे कपर्दिन्**
**आद्ये स्थाने विहरसि सदा सेव्यमानो गणेशैः ॥ ४ ॥**

**आनन्देति** । हे कपर्दिन् ! कं शिरः पिपर्ति पूरयतीति कपर्दः, सोऽस्यास्तीति कपर्दी । "पृ पालनपूरणयोः" इति **धातुः** । कस्य वा जटानिष्ठगङ्गाजलस्य पूरेण जगद् दायते शुद्धीकुरुते इति वा कपर्दीत्यर्थः । "दैप् शोधने" इति **धातुः** । भुवनपावनजटाधारिन्नित्यर्थः । त्वम् **आनन्दाब्धेः** आनन्दा एव आपः सुधाः तासां निधेः । पूर्णानन्दात्मकस्य ब्रह्मणः कमपि घनीभूतं रूपम् ; कमपीत्युक्त्या इदमित्थमिति निरूपयितुमशक्यमिति भावः । पुनः किं रूपमिति चेत् ; स्वरूपेण वक्तुमशक्यमपि जात्यन्धस्य कस्यचित् क्षीरलक्षणोपदेशवत् शास्त्रेण केवलं किमपि कथंचित् उच्यते । गिरिनिर्झरशरद्घनकौमुदीतुहिनघनीभाववत् सुकुमारोदरप्रतीयमानप्रतिबिम्बवच्च किमपि अनिर्वचनीयं रूपम् । **उमया** ; प्रणवरूपिण्या, **शक्त्या** ; निजशक्त्या, **सार्धम् आस्थाय** ; प्राप्य, **शाश्वतम्** ; ब्रह्माद्युत्पत्तिलयावधिकम् , **परम्** ; उत्कृष्टम् ; न विषयभोगवत् दुःखशिरस्कमित्यर्थः ।

उमामहेश्वरसंवादरूपतत्त्वोपभोगमिच्छन् सार्वभौमचतुरङ्गादिलीलावत् ब्रह्मादिकं जगत् सृष्ट्वा, तदनु प्रविश्य सेव्यसेवकनियन्तृनियम्यभावतश्च भोगमिच्छन्नित्यर्थः । **श्रुतिरपि**—

"स एव मायापरिमोहितात्मा
शरीरमास्थाय करोति सर्वम् ।
स्त्र्यन्नपानादिविचित्रभोगैः
स एव जाग्रत्परितृप्तिमेति ॥"[१]

**इति विज्ञानकलप्रलयाकलसकलभेदेन वर्तमानभुवनतदधिपाराधनं भोगमिछन्नित्यर्थः ।**

एवं कुत्र सभायां विहरतीत्यत्राह—**अध्वातीत** इति । **अध्वातीते शुचिदिवसकृत् कोटिदीप्रे आद्ये स्थाने**; प्रलये स्थानादिसर्वविकाराभावात् पुनः सर्गादौ परमेश्वरेच्छया परशिवलोकविकारः, आदौ भवतीति आद्यं

---

१ यः स्वातिरिक्तकलनासह परमात्मेति ख्यातः स एव निर्मायोऽपि स्वाज्ञानरूपया मायया परिमोहितात्मेव स्थूलशरीरम् आस्थाय सर्वत्र आत्मात्मीयाभिमानतः सर्वव्यापारजातं करोति । किं च—स्त्र्यन्नपानादिविचित्रभोगैः स एव इन्द्रियैः इन्द्रियार्थग्रहणलक्षणजाग्रत्कलनापरितृप्तिमेति जाग्रदवस्थायां नानाविधसुखदुःखे आप्नोतीत्यर्थः ।

स्थानं तस्मिन् स्थाने, **गणशैः** सेव्यमानः सन् विहरसीत्यर्थः। अत्र अध्वातीतेत्युक्त्या वाङ्मनोऽगोचरं किमपि स्थानं गम्यते। तत्र के वा अध्वानः इत्यत्र क्ष्मातत्त्वाद्युपरिस्थानविशेषा (एव) गण्यन्ते। तदुक्तं **किरणागमे**—

"वर्णाध्वा च पदाध्वा च मन्त्राध्वा भुवनात्मकः।
तत्त्वाध्वा च कलाध्वा च षडध्वान इमे मताः॥"

इति। इमे षडध्वानस्तु वक्ष्यमाणाष्टादशतत्त्वपरिमाणगता इत्यतः तदिदमुच्यते। **सिद्धान्तसारे**ऽपि—

"क्ष्मातत्त्वं शतकोटियोजनमपः प्रारभ्य गौणान्तकं
पङ्क्त्या तद्गणनात् तथा प्रकृतितो मायावसानं शतात्।
साहस्राच्च सदाशिवावधि ततः शक्त्यं ततो लक्षतः
स्यादूर्ध्वं स शिवोऽप्यमेयविभवो बिन्दोरधिष्ठायकः॥"

इति। अस्यार्थः—आदौ **क्ष्मातत्त्व**विस्तारोच्छ्रायमानं शतकोटियोजनम्। इदमेव ब्रह्माण्डमानम्। **अप्तत्त्व**मारभ्य, **गुणतत्त्वा**वधि दशदशभागगणनात् अप्तत्त्वं सहस्रकोटियोजनम्। **तेजस्तत्त्वं** दशकोटिसहस्रयोजनम्। **वायुतत्त्वं** शतसहस्रकोटितत्त्वम्। **आकाशतत्त्वं** दशशतसहस्रकोटिकम्। **अहंकारतत्त्वं** कोटिसहस्रकोटिकम्। पश्चात् शतभागगणानात् **गुणतत्त्वं** शतकोटिसहस्रकोटिकम्। गुणस्य शतभागाधिका **प्रकृतिः** पद्मसंख्यावती। तच्छतगुणितो **रागो** निखर्वमानः। तच्छतगुणिता **नियतिः** महापद्मसंख्या। तच्छतगुणितं **विद्यातत्त्वं** महाशङ्खसंख्यम्। तच्छतगुणसंख्यं **कलातत्त्वं** महासमुद्रकम्। तच्छतगुणितं **कालतत्त्वं** परार्धसंख्म्। पश्चात् सहस्रभागवृद्धेः **मायातत्त्व**परिमाणं सहस्राधिकम्। **शुद्धविद्यातत्त्वं** तत्सहस्रभागाधिकम्। **महेश्वरतत्त्वं** तत्सहस्रभागाधिकम्। **सदाशिवतत्त्वं** तत्सहस्रभागाधिकम्। **शक्तितत्त्वं** तल्लक्षभागाधिकम्। एवं परार्धादुपरि संख्याभावात् तत्तद्गुणितसंख्यैवोक्ता। एवमष्टादशतत्त्वमानमुक्त्वा तदुपरि अमेयविभवः, अपरिमितमहावैभवः परमशिवलोके नामरूपात्मकप्रपञ्चस्य परस्य बिन्दोरपि अधिष्ठानतया देवो भगवान् विभासत इत्यर्थः॥

तत्र आगमे **प्रासादमन्त्रोद्धारे**---

"अकारश्चाप्युकारश्च मकारो बिन्दुरेव च।
अर्धचन्द्रनिरोधी च नादो नादान्त एव च॥
शक्तिश्च व्यापिनी चैव समना चोन्मना मता।
समनान्तं पाशजालमुन्मन्यन्ते परः शिवः॥"

इति। इदमेव द्वादशान्तपदमित्युच्यते **शिवयोगिभिः**। शक्त्यादिशक्त्यन्तशिवासनस्थानमानं चैतदेवेत्यर्थः। एवमुक्तान्येतानि तत्त्वानि शिवपदप्रेप्सुभिः उपसंक्रमितव्यत्वेन अध्वानीत्युच्यन्ते। अथाध्वप्रकारः—

" मन्त्राध्वा च पदाध्वा च वर्णाध्वा भुवनाध्वकः ।
तत्त्वाध्वा च कलाध्वा च षडध्वान इमे मताः ॥ "

इति षडध्वनां मध्ये मन्त्राध्वरूपमिदमुच्यते । शिवेशानः अस्त्रम् ; तत्पुरुषः कवचम् ; अघोरः शिखा ; वामदेवः शिरः ; सद्योजातः हृदयम् ; इति पञ्चमन्त्राः ॥

अथ **पदाध्वस्वरूपमुच्यते**—'ओं एकं व्योमव्यापिन्' इत्यादि 'नित्ययोगिनः' 'इत्यन्तमेका दशपदानि (११) 'ध्यानहाराय' इत्यदि, 'व्योमव्यापिन्' इत्यन्तं विंशतिपदानि (२०); 'अरूपिन्' इत्यादि, 'महेश्वर' इत्यन्तानि एकविंशतिपदानि (२१); 'महादेव' इत्यादि, 'शिवाय नमो नमः ओमित्यन्तम्' षट्त्रिंशत्पदानि (३६) अहत्य पदानि अष्टशीतिः (८८) ।

अथ **वर्णाध्व**स्वरूपमुच्यते—अकारादिस्वराः षोडश (१६) ; कादि त्रीणि (३) ; घादिञान्तं सप्त (७) ; टतपवर्गादिळान्तं चतुर्विंशत्यक्षराणि (२४) ; क्षमित्येकम् (१) आहत्य वर्णस्थानानि पञ्चाशत् (५०) ।

अथ **भुवनाध्व**स्वरूपमुच्यते—'अनाश्रितानि' इत्यादि निवृत्त्यन्तानि पञ्चदशभुवनानि (१५); सादाख्यादि वामान्तनि अष्टादशभुवनानि (१८); अङ्गुष्ठमात्रादि भीमवामान्तानि सप्तविंशतिभुवनानि (२७) श्रीकण्ठाद्यमरेशान्तानि षट्पञ्चाशद्भुवनानि (५६) अण्डाद् बहिः वीरभद्रभद्रकाल्यादि कालाग्निरुद्रान्तानि अष्टोत्तरशतभुवनानि (१०८) आहत्य चतुर्विंशत्युत्तरद्विशतभुवनान्यासन् (२२४) ।

अथ **तत्त्वाध्वस्व**रूपमुच्यते—शिवतत्त्वं, शक्तितत्त्वमिति द्वे (२); सदाशिवेश्वरशुद्धविद्याख्यानि पदानि त्रीणि (३); मायादि पुरुषान्तानि तत्त्वानि सप्त (७) प्रकृत्यादि अप्तत्त्वान्तानि त्रयोविंशतितत्त्वानि (२३); पृथिवी एका (१) आहत्य तत्त्वाध्वस्थानानि षट्त्रिंशत् (३६) ।

अथ **कलातत्त्व**स्वरूपमुच्यते—**शान्त्यतीतकलायाम्,** अनाश्रितादि निवृत्त्यन्तं पञ्चदशस्थानानि (१५); **शान्तिकलायां,** सदाशिवादि वामान्ता अष्टादशस्थानानि (१८); **विद्याकलायाम्,** अङ्गुष्ठमात्रादि वामान्तसप्तविंशतिस्थानानि (२७); **प्रतिष्ठाकलायां** श्रीकण्ठाद्यमरेशान्तानि षट्पञ्चाशत्स्थानानि (५६) ; **निवृत्तिकलायां,** महाकाल्यादि कालाग्निरुद्रान्ताष्टोत्तरशतस्थानानि (१०८) इहापि चतुर्विंशत्युत्तरद्विशतभुवनान्यासन् (२२४) एवं मन्त्रान् पदाध्वसु, पदानि वर्णाध्वसु ; तान् भुवनेषु, तानि तत्त्वेषु, तानि च कलासु, विलाप्य च तांश्च स्वात्मना सह शुद्धशिवे अखण्डाकाशरूपे सर्वव्यापिनि षडध्वनां पारे विराजमाने यत्र सदा गणेशैः विहरसि ।

अथ वा—मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञास्थानानि षडध्वानः । तदुपरि ब्रह्मरन्ध्रे आद्यस्थाने पिण्डोत्पत्तौ शिरस आदिमत्वात् आद्ये स्थाने द्वादशान्तपदे ; **गणैः** गण्यन्ते इति गणाः प्रपञ्चप्राणमनोबुद्धिदशेन्द्रियाणि, तैः सेव्यमानः सन् सदा विहरसीनि ।

अनध्वगाः, अध्वसु पारयिष्णव इति, सोऽध्वनः पारमाप्नोति " इत्याहि **श्रुती**नामयमेवार्थः । एतत् सर्वं मनसि निधाय भगवती **श्रुतिः** ब्रह्मचार्यभ्यर्थनया संग्रहेणाह—

" अध्वनामध्वपते श्रेष्ठस्याध्वनः पारमशीय ।"

" अध्वनामध्वपते स्वस्ति मा संपारय ॥ "

इति च । अनयोः श्रुत्योरयमर्थः—**अध्वनाम्** ; गर्भनरकसंसारमार्गाणाम्, दक्षिणोत्तरगाणां वा । **अध्वपते** ; मार्गबन्धो ! **श्रेष्ठस्य** ; पुनरावृत्तिशून्यस्य ; **अध्वनः पारम्** ; पर्यन्तम् । **अशीय** ; अश्नुवीय । पुनः **अध्वनाम् अध्वपत** इति गोवृषभकरिकलभादिशब्दवत् प्रयुज्यते । **अध्वपतेः** सूर्यान्तर्यामिन् ! अध्वगामिनः प्राणिनः स्वोदयप्रकाशदानेन पाषाणकण्टककर्दमपतनेभ्यः पातीति अध्वपतिः सूर्यः तस्यापि अस्वातन्त्र्यात् अन्तर्यामिणा परमेश्वरेण सूत्रधारिणेव पुत्तलिकादेः प्रेर्यमाणत्वात् अन्तर्याम्येवात्र विषयः । सर्वाध्वतारकत्वमन्त्रलिङ्गात् सौरमण्डल-मध्यवर्तिद्वादशसूर्यपुरुषान्तर्यामिन्नित्यर्थः । **स्वस्ति** ; परमश्रेयोमङ्गलं यथा भवति तथा । **मा**; माम् । **संपारय**; सम्यक् पारं नय । सर्वसंसारशोकनिवृत्तिपदं नय प्रापय । अथैवंभूते अध्वनां पारे आद्ये स्थाने परमशिवपुरे यत्र सदा गणेशैः विहरसि तत्पदं नयेति वाक्यार्थः ।

एवम् अरूपस्यापि परमेश्वरस्य स्वजनानुग्रहार्थं स्वीकृतलीलाविग्रहसद्भावः शास्त्रेषु व्यञ्जित एव ॥ उक्तं **श्रीब्रह्मानन्दैः**—

" बहुशास्त्रमधीत्यापि गुरुकारुण्यवर्जिताः ।
शिवस्य मूर्तिवार्तामप्यहो जानन्ति नैव हि ॥ "

इति । **श्रीपराशरश्च**—अरूपस्यापि ब्रह्मणः किमपि रूपमस्तीति शिवविदभिमतमुदीर्य, पुनराह—

" निष्कले तु परे तत्त्वे निरालम्बे निरञ्जने ।
किं करोति जनः क्षुद्रस्ततस्तान् नित्यमाश्रयेत् ॥
ज्ञानावलम्बनभ्रान्त्या मनुष्या मन्दबुद्धयः ।
मूर्त्युपेक्षां प्रकुर्वन्ति ज्ञानं तेषां न जायते ॥"

इति । तस्मात् अनिर्वाच्यं स्वानुभवैकवेद्यं किमपि ब्रह्मरूपं सर्वोत्तरस्थाने विहरतीति भावः ।

अन्वयः—हे कपर्दिन् त्वम् आनन्दाब्धेः किमपि घनीभावं रूपम् आस्थाय, उमया शक्त्या सार्धं परमं शाश्वतं भोगम् इच्छन्, अध्वातीते शुचिदिवसकृत् कोटिदीप्रे च आद्ये स्थाने सदा गणेशैः सेव्यमानो विहरति ॥ ४ ॥

उन्मनान्तसकलभुवनातीतसोमलोकाख्यपरमशिवपुरे भगवान् विहरतीत्युक्तम् । अत्युच्छ्रायदेशवासिनो देवस्य सर्वाधोभुवनवर्तिनाम् अस्माकं च कथमुपास्योपासकत्वधर्मः सेत्स्यति ? तस्योपास्यत्वे किं मानम् ? कतिविधावुपासकाः ? इत्यत आह—

**त्वं वेदान्तैर्विविधमहिमा गीयसे विश्वनेत-**
**स्त्वं विप्राद्यैर्वरद निखिलैरिज्यसे कर्मभिः स्वैः ।**
**त्वं दृष्टानुश्रविकविषयानन्दमात्रावितृष्णै-**
**रन्तर्ग्रन्थिप्रविलयकृते चिन्त्यसे योगिवृन्दैः ॥ ५ ॥**

**त्वमिति** । हे **विश्वनेतः** ! विश्वं सर्वजनं तत्तत्कर्मानुसारेण नयतीति विश्वनेता । तत्र प्रमाणम् अन्तर्यामिब्राह्मणम् । हे विश्वनेतः **त्वं वेदान्तैः**; वेदानाम् अन्ता उपनिषदः, ताभिः तदुक्तवाणीभिः । **विविधमहिमा**; विविधो महिमा अस्यास्तीति विविधमहिमा । तथा च **श्रुतिगिरः**—

" यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति ॥ "[१]

इति । " शान्तं शिवमद्वैतम् "; प्रणवं ह्मीश्वरं विद्यात् सर्वस्य हृदये स्थितम् " इति ; " द्वैतस्योपशमः ", " न सन्नासच्छिव एव केवलः " इत्यादि **श्रुतिभिः** शिवमात्रास्तित्ववेदयोनित्वाद्वैतत्वप्रणवाभिन्नत्वाव्ययत्वाद्यपदानैः विविधमहिमा गीयसे । **हे वरद** ! भक्तानाम् ईप्सितान् वरान् ददातीति- वरदः । **त्वं विप्राद्यैः**; विशेषतः पापेभ्यः आत्मानं परं च पान्तीति विप्राः ते आदौ येषां तैः, क्षत्रियादिभिः, **निखिलैः स्वैः**, स्वैः स्वोचितकर्मभिः; तद्यथा—" वसन्ते ब्राह्मणमुपनयीत ; ग्रीष्मे राजन्यम्; शरदि वैश्यम् " इति । " गर्भाष्टमे ब्राह्मणम् ; गर्भैकादशे राजन्यम् " इति च;

" भवत्पूर्वं चरेद् भैक्षं द्विजवर्णी दिने दिने ।
भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥ "

इति । क्वचित् **शाखाभेदेन**—" उदिते जुहोति, अनुदिते जुहोति " इति विकल्पश्च । " यदनुदिते सूर्ये प्रातर्जुहुयात् ; उभयमेवाग्नेयं स्यात् ; उदिते सूर्ये प्रातर्जुहोति; प्रत्येव तेन तिष्ठति; यदुदिते सूर्ये प्रातर्जुहुयात् ;

---

१ यदेति । यस्मिन् काले स्वातिरिक्तं नश्वरं स्वयमेव सत्यमिति च पश्यति इति पश्यः साधकः, साधनान्तरनैरपेक्ष्येण स्वयं प्रकाशरूपत्वात्, रुक्मवर्णं स्वाज्ञदृष्ट्या सर्वकर्तारम्, ईशितव्यप्राण्यदृष्टतः ईशम् । वस्तुतः पूर्णत्वात् पुरुषं निरुपाधिकसोपाधिकाभ्यां ब्रह्मयेनिं वस्तुतो निष्प्रतियोगिकचिद्धातुं स्वमात्रमिति वा पश्यते पश्यति । तदा तत्समकाले विद्वान् पश्यः पुण्यपापोपलक्षितव्यवष्टिसमष्टिप्रपञ्चकलने विधूय मिथ्यात्वेन निरस्य तन्निरसनेऽपि निरञ्जनः सन् निरतिशयत्वेन परमं स्वारतिरिक्तवैषम्यापह्नवसिद्धं साम्यं सत्तासामान्यं सन्मात्रमिति उपैति प्रतिपद्यत इत्यर्थः ।

यथातिथये ऽप्रद्रुताया शून्यायावसथायाहार्यं हरन्ति ; तादृगेव तत्" इति वचनानि ; 'न हि निन्दान्यायेन' तत्पक्षोद्बलकानि भवेयुः ।

तत्र **निरुक्तिकारश्च**—"प्रातः प्रातरनृतं ते वदन्ति, पुरोदयाज्जुह्वति येऽग्निहोत्रं दिवाकीर्त्यमदिवाकीर्तयन्तः सूर्योज्योतिर्हि न तथेतरेषाम" इति शास्त्रसिद्धः सर्वोऽपि अधिकारिभेदेन विधिरेवेत्यर्थः । तस्मात् ब्राह्मणमुखैः निखिलैः स्वैः कर्मभिः इज्यसे समाराध्यसे इत्यर्थः ।

किं च— **त्वं दृष्टानुश्रविकविषयानन्दमात्रावितृष्णैः**[१]—दृष्टविषयाः ; अन्नपानमञ्चतूलिकाभवनशयनधनसंतानभूषणस्रक्चन्दनवनिताद्याः, आनुश्रविकविषयाः ; गुरुशास्त्राणि अनुसृत्य श्रूयमाणाः कल्पद्रुकामधेनुचिन्तामण्यप्सरःसुधासंपन्नस्वर्गादिपदविभवाः, इन्द्रियार्थविषयाः ; तेषु य आनन्दः सुखातिशयः पूर्वपूर्ववासनया प्राणिनाम् उत्पद्यते । तथा चोक्तं **श्रीसूतेन**—

"ऐहिकानिन्द्रियैरर्थान् भुङ्क्ते देही निरन्तरम् ।
पुनर्भुक्तेषु चार्थेषु तत्समानेषु मानवाः ॥
करोति वाञ्छामवशः कल्पनामतिमोहितः ।
शोभनत्वेन यः क्लृप्तः पदार्थः पारलौकिकः ॥
तत्र बुद्धिं नृणां शास्त्रमुत्पादयति निश्चिताम् ।
भ्रमात् तद्भोगवाञ्छा च जायते सर्वदेहिनाम् ॥
दृष्टानुश्रविकद्वारा बुद्धिसंततिरात्मनाम् ।
कल्पिते विषये नित्यं जायते वेदवित्तमाः ॥"

इति ।

एवंभूतस्य उभयविधस्य विषयानन्दस्य मात्राया लेशादपि ये वितृष्णाः ; "तृष पिपासायाम्" इति **धातुः** । विषयानन्दलेशादपि विगततृष्णा येषां तैः, दृष्टानुश्रविकविषयानन्दमात्रावितृष्णैः । **योगिवृन्दैः**; शिवध्यायिनां समूहैः, **अन्तर्ग्रन्थिप्रविलयकृते,** अन्तः शरीरान्तराले ; मूलाधारमणिपूराज्ञाधारस्थिता ग्रन्थयः, पक्षिनीडवत्, लतागृहवच्च बहुजन्मनानावासनाभरितनाडीपुञ्जग्रथनरूपाः, तेषां प्रविलयकृते ग्रन्थित्रयस्यात्यन्तिकविनाशायेत्यर्थः । उक्तं हि **सहस्रनामस्तवे**—

---

१ दृष्टानुश्रविकेति । योगसूत्रानुवादस्यायमर्थः—स्रक्चन्दनादयः विषयाः दृष्टाः ; वेदोक्तस्वर्गादयः आनुश्रविकाः, तत्र उभयत्रापि सत्यामपि तृष्णायां विवेकतारतम्येन यतमानादिवैराग्यत्रयं भवति । यतमानत्वं नाम, 'अस्मिन् जगति किं सारम्, किमसारमिति गुरुशास्त्राभ्यां विज्ञास्यामि' इत्युद्योगः । स्वचित्ते पूर्वं विद्यमानानां दोषाणां मध्येऽभ्यस्यमानेन विवेकेन एतावन्तः पक्काः, एतावन्तो ऽवशिष्टा इति विवेचनं व्यतिरेकः । दृष्टानुश्रविकप्रवृत्तेः दुःखात्मकत्वबोधेन तां प्रवृत्तिं परित्यज्य मनसि औत्सुक्यमात्रेण तृष्णास्थापनमेकेन्द्रियत्वम् ; वितृष्णत्वं वशीकारः । तदिदम् अपरं वैराग्यम् अष्टाङ्गयोगप्रवर्तकत्वेन संप्रज्ञातस्य अन्तरङ्गम् । असंप्रज्ञातस्य तु बहिरङ्गमिति ।

“ मूलाधाराम्बुजारूढा ब्रह्मग्रन्थिविभेदिनी ।
मणिपूरान्तरुदिता विष्णुग्रन्थिविभेदिनी ॥
आज्ञाचक्रान्तरालस्था रुद्रग्रन्थिविभेदिनी ।”

इति; ग्रन्थिभेदमृते मुक्तेः मार्गान्तरं नास्तीति । अत्र श्रुतिरपि—

“ यदा सर्वे प्रमुच्यन्ते हृदयस्येह ग्रन्थयः ।
अथ मर्त्योऽमृतो भवत्येतावदनुशासनम् ॥”[1]

इति । तस्मात् अन्तर्ग्रन्थिप्रविलयकृते निमित्तम् योगिभिः चिन्त्यसे ध्येयो भवतीत्यर्थः । “ध्यै चिन्तायाम्” इति **धातुः** ।

अन्वयः—हे विश्वनेतः त्वं वेदान्तैः विविधमहिमा गीयसे हि । वरद ! विप्राद्यैः निखिलैः स्वैः कर्मभिः इज्यसे । त्वं दृष्टानुश्रविकविषयानन्दमात्रावितृष्णैः योगिभिः अन्तर्ग्रन्थिप्रविलयकृते चिन्त्यसे । अत्र **उल्लेखालंकारः** ॥ ५ ॥

ननु एवमधिकारिभिः किं फलं लभ्यत इत्याह—

**ध्यायन्तस्त्वां कतिचन भवं दुस्तरं निस्तरन्ति**
**त्वत्पादाब्जं विधिवदितरे नित्यमाराधयन्तः ।**
**अन्ये वर्णाश्रमविधिरताः पालयन्तस्त्वदाज्ञां**
**सर्वं हित्वा भवजलनिधावेष मज्जामि घोरे ॥ ६ ॥**

**नन्विति** । हे भगवन् ! **कतिचन** भाग्यवन्तः, **त्वाम्**; “ शिव एको ध्येयः शिवंकरः, सर्वमन्यत् परित्यज्य ” इति श्रुतिविहितसरण्या, विश्वस्य विजातीयप्रत्ययान्तरितसजातीयप्रत्ययप्रवाहीकरणरूपया सुचिर-संस्कृतया समुन्मन्या धीवृत्त्या निश्चलदारुशिलाकल्पस्थित्या च प्रतिपदमापूर्णिमाख्यासु दृष्टिषु एकतमायां निश्चिल-तार यन्तः या च त्वमेव ध्यासन्तः इति “ तत्र प्रत्ययैकतानता ध्यानम् ” **पातञ्जलोक्तं**[2] ध्यानं द्रष्टव्यम् । ते त्वद्ध्यानपराः **दुस्तरं** दुःखे **नापि तर्तुमशक्यम्**, **भवम्** भवजलधिम्, गोखुरवत् **निस्तरन्ति** लङ्घयन्ति । **इतरे**; ध्यानयोगास्थिरमानसास्तु—

---

**१ यदेति । यदा सर्वे प्रभिद्यन्ते भेदमुपयान्ति विनश्यन्ति, हृदयस्य बुद्धेरिह जीवत एव ग्रन्थयः ग्रन्थिवत् दृढबन्धनरूपा अविद्याप्रत्यया इत्यर्थः । अहमिदं शरीरम्, ममेदं धनं, सुखी, दुःखी च अहम्, इत्येवमादिलक्षणाः; तद्विपरीतब्रह्मात्मप्रत्ययोपजननाद्, ‘ब्रह्मैवाहमस्मि’ असंसारीति विनष्टेषु अविद्याग्रन्थिषु तन्निमित्ताः कामाः मूलतो विनश्यन्ति । अथ मर्त्यः अमृतः भवति इत्येतावदेव एतावन्मात्रम्, नाधिकमस्तीत्याशङ्का कर्तव्या । अनुशासनम् अनुशिष्टिः उपदेशः, सर्ववेदान्तानामिति वाक्यशेषः ।**

**२ प्रत्ययेति । तत्र यथोक्तदेशे प्रत्ययैकतानता एकविषयप्रवाहः; स च विच्छिद्य जायमानो ध्यानं भवति । तदुक्तम्—**

" अज्ञातशिवतत्त्वानामाकाराद्यर्चनं स्मृतम् ।
योजनाध्वन्यशक्तस्य क्रोशाध्वा परिगण्यते ॥ "

इति **श्रीवसिष्ठवचनानुसारेण त्वत्पादाब्जम्**; महालिङ्गादित्वदधिकरणमित्यर्थः । **नित्यम्**; अहरहः, दिनशून्यं विनैव, **आराधयन्तः, विधिवत्**, शास्त्रानुसारेण नित्यम् अर्चयन्तः सन्तः; **श्रुतिरपि**—" शिवलिङ्गं त्रिसंध्यमहरहरभ्यर्चयेत् " इति; " अथातो महादेवस्याहरहः परिचर्याविधिं व्याख्यास्यामः; स्नात्वा शुचौ देशे गोचर्ममात्रं गोमयेनोपलिप्य " इत्यादि**सूत्रविधिना** च[1] आराधयन्तश्च दुस्तरं भवं निस्तरन्ति ।

**अन्ये**; लिङ्गोपासनेऽपि प्रतिबन्धकबाहुल्येन लिङ्गार्चनश्रद्धाविहीना वर्णाश्रमविधिरताः अत्र—

तदेतत्सत्यम्--

" मन्त्रेषु कर्माणि कवयो यान्यपश्यन्
तानि त्रेतायां बहुधा संततानि ।
तान्याचरथ नियतं सत्यकामा
एष वः पन्था सुकृतस्य लोके ॥ "[2]

इति **श्रुति**बलात् विविधयागकृच्छ्राचारस्वाध्यायश्राद्धतर्पणादिनियमपराः वेदतदनुसारिस्मृतिपुराणरूपां त्वदाज्ञां परिपालयन्तः सन्तः क्रमात् दुस्तरमपि भवाब्धिं निस्तरन्ति । त एते त्रिविधाधिकारिणोऽपि त्वदाज्ञापालकतया **भवजलनिधिम्** संतरेयुरेव ।

यद्यपि—तारतम्यमस्तु नाम, अत्र अहमेक एव दुस्तरभवनिस्तरणदृढोपायभूतशिवध्यानतदर्चनतदुदितधर्माचारादिकमखिलं बुद्धिपूर्वकं त्यक्त्वा, **घोरे**; घोरं भीमं भयानकमिति । " घुर भीमार्थयोः " इति **धातुः** । पुत्रमित्रकलत्रादिहानिवृद्धिव्यतिकरहाहाक्रन्दनतरङ्गघोषे कामाद्यरिषड्वर्गदुष्टयादोनिस्तरे अपारे घोरे भवजलधौ मज्जामि ।

यथा महाह्रदमग्नो जनः इन्द्रियमनोवैकल्येन हिताहितं न जानाति; ज्ञात्वापि तदाहितकृत् भवितुं न शक्नोति, तद्वत् संसारसमुद्र एव मज्जामीत्यर्थः । कतिचन भाग्यवन्तः त्वां ध्यायन्तः दुस्तरं भवं निस्तरन्ति । इतरे त्वत्पादाब्जं विधिवत् नित्यमाराधयन्तः दुस्तरं भवं निस्तरन्ति । अन्ये वर्णाश्रमविधिरताः त्वदाज्ञां पालयन्तः दुस्तरं

---

" विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात् ।
परिशिष्टं च तन्मात्रं चिदानन्दं विचिन्तयेत् ॥ "

१ सूत्रविधिना चेति ; भगवद्बोधायनमहर्षिकृतधर्मसूत्रविधिनेत्यर्थः ।
इति योगसुधाकरः ।

२ तदेतदिति । कवयः क्रान्तदर्शिनः वसिष्ठादयः ऋग्वेदादिमन्त्रेषु तैरेव प्रकाशितानि यानि अग्निहोत्रादि कर्माणि अपश्यन् दृष्टवन्त इति यत् तत् सत्यम् । यावत् स्वाज्ञानं तावत् अवितथम्, स्वर्गादिफलसाधनत्वात् । तानि च

भवं निस्तरन्ति । अत्र निस्तरन्तीति क्रियापदं त्रिविधाधिकारिष्वप्युक्तम् । तथापि ध्यानपराणामेव मुख्यतया क्रमात् अन्येषां चान्वेति । तस्मात् स्वाधिकारात् उपर्युपरि ध्यानपदं गत्वा भवं तरन्तीति भावः ॥ ६ ॥

ननु---एवं सकलमार्गिणामीश्वरप्रसादे सति तव जन्मनः सफलकरणे शिवाराधने कः प्रतिबन्धः ? इति चेत् ; न प्रत्यक्षतः कश्चित्, तथापि मन्मनस्तोदकः कश्चित् बलीयानित्याह—

**उत्पद्यापि स्मरहर महत्युत्तमानां कुलेऽस्मि**
**न्नास्वाद्य त्वन्महिमजलधेरप्यहं शीकराणून् ।**
**त्वत्पादार्चाविमुखहृदयश्चापलादिन्द्रियाणां**
**व्यग्रस्तुच्छेष्वहह जननं व्यर्थयाम्येष पापः ॥ ७ ॥**

**उत्पाद्येति** । **स्मरहर !** अत्र '**महति**' इति विशेषणेन अस्मित् कुले श्रीशिवांशाविद्येश्वरावतारः सूच्यते । तथा च **श्रीनीलकण्ठमखिनः**—

"कृतदीक्षोऽघोरमुखे कुलकूटस्थो भरद्वाजः ।
विद्येश्वरेषु कश्चन पितामहो न इति विस्रम्भः ॥"

इति ।

"श्रीकण्ठोऽवततार यस्य वपुषा कर्व्यात्मनेवाच्युतः
श्रीमानप्पयदीक्षितः स जयति श्रीकण्ठविद्यागुरुः ॥"—

इति च । **ज्योतिर्विद**स्त्वेवमाहुः—

"वीणातत्त्वज्ञसंख्यालसितकलिसमाभाक्प्रमातीच वर्षे
कन्यामासे तु कृष्णप्रथमतिथियुतेऽप्युत्तरप्रोष्ठपाद्रे ।
कन्यालग्नेऽद्रिकन्यापतिरमितदयाशेवधिर्वैदिकेषु
श्रीगौर्यै प्राग्यथा ह स्म समजनि विरिञ्चीशपुर्यां कलेशः ॥"

---

**वेदविहितत्वेन ऋषिपूगदृष्टानि अग्निहोत्रादिकर्माणि होत्राध्वर्यवौद्गात्रप्रकारकत्रेतायां त्रयीसंयोगलक्षणायाम्, त्रेतायां वा युगे प्रायशो बहुधा कर्मिभिः—कर्मणां क्रियमाणत्वात् संततानि संप्रवृत्तानि । अतः यूयं सत्यं स्वार्जितकर्मफलं तद्विषयक-कामो येषां ते सत्यकामाः सन्तः, नियतं सर्वदा तानि अग्निहोत्रादिकर्मण्येव आचरथ निर्वर्तयथेत्यर्थः । स्वयं निर्वर्तितसु-कृतस्य कर्मणः फलं तत्र लोक्यते दृश्यते भुज्यत इति लोकः । तस्मिन् लोके स्वर्गादौ गत्वा कर्मफलाप्तये वः युष्माकम्, एष हि पन्थाः मार्गः । यानि त्रयीविहितानि अग्निहोत्रादिलक्षणानि एष पन्थाः नान्यः कर्मफलाप्तयेऽस्तीत्यर्थः ।**

इति। अयमर्थः—वीणातत्त्वज्ञेति, पञ्चाक्षराणि; तत्र ज्ञकारोऽनर्थकः। प्रातिलोम्येन तयुक्तवकारस्य चतुःसहस्र-संख्या; केवलतकारस्य षट्शतम्; णेति पञ्चाशात्; वीति चतुः संख्या; आहत्य चतुःपञ्चाशत्संयुतषट्शतोत्तरचतुःसंख्याके कल्यब्दे प्रमातीचवर्षे कन्यामासे कृष्णपक्षे प्रथमातिथौ उत्तरप्रोष्ठपदनक्षत्रे कन्यालग्ने **श्रीकलेशः** श्रीशिवावरणस्थाष्टविद्येश्वराणां मध्ये सप्तमस्थानाधिपः श्रीकण्ठविद्येश्वर इत्यर्थः। प्राक् कल्पान्तरे श्रीपरमेश्वरः वैदिकेषु अमितदयाशेवधिः सन् **श्रीगौरीदेव्यै** यथा ह स्म अवादीत्, तथैव, **विरिञ्चीशपुर्यां**, विरिञ्चिपुरे समजनि, संजात इत्यर्थः।

यद्यपि—श्रीमद्दीक्षितचरणस्य पितृपितामहपरंपराया वासस्थानम् आरणिसमीपवर्ति अडयप्पलमिति अग्रहार एव; तथापि विरिञ्चिपुरे मातुलमन्दिरमासीदिति किंवदन्त्या अवगम्यते; जन्मापि तत्रैवेति पर्यवस्यति। श्रीशिवोपदेशसूक्तिः उत्तरत्र विवरिष्यते। तेषां जन्मलग्नस्थितिस्तु---

" लग्नेरवीन्दुसुतयोर्मकरे च मान्दौ
मीने शशिन्यथ वृषे रविजे च राहौ।
चापे गुरौ क्षितिसुते मिथुने तुलायां
शुक्रे शिखिन्यलिगते शुभलग्न एवम्॥"

इति। एवंभूते शुभलग्ने श्रीकण्ठविद्येशोक्तरीत्या विरिञ्चिपुरे मातुलगृहे समजनीति पूर्वेण संबध्यते। तथा च **श्रीशिवसूक्तिः शिवरहस्ये** नवमांशे अष्टमाध्याये कलिविशेषकथने श्रीभगवत्पादावतारसूक्तिः—

" म्लेच्छाचारपराः सर्वे दरिद्राश्च द्विजातयः।
भविष्यन्त्यल्पमतयो यतिस्तत्र भविष्यति॥
शिवे मदंशसंभूतः **शंकरः** शांकरोत्तमः।
चतुर्भिः सह शिष्यैश्च कलाववतरिष्यति॥
तस्मै चोपनिषद्विद्या मया दत्ता महेश्वरि।
भूमौ पाषण्डषण्डानां खण्डनं स करिष्यति॥
कलावेव महादेवि **हरदत्ताभिधो** द्विजः।
अशैवदण्डनार्थाय भविष्यति महीतले॥
दीक्षितोऽपि भवेत् कश्चिन्मदंशो भूसुरोऽम्बिके।
भासुराचारनिरतः शैवश्छन्दोगवंशजः॥
शैवशास्त्रं तदा भूमौ लुप्तं विस्तारयिष्यति।
अन्येऽपि भक्ता देवेशि चेरे चोले च पाण्डयके॥

भविष्यन्ति महाभक्ता मयि सर्वासु जातिषु ।
सुन्दरो ज्ञानसंबन्धस्तथा माणिक्यवाचकः ।
तेषु मुख्यास्त्रयोऽऽप्येते......... ॥"

इत्यादिप्रपञ्च्यते। तस्मात् शिवांशावतारहेतुकतया महतीति विशेषं युक्तमित्यर्थः। किं च **उत्तमानाम्**; उत्कृष्टतमानाम्, श्रीरङ्गराजयज्वप्रभृतिकगोत्रर्षिपर्यन्तानां श्रौतकर्मानुष्ठानवरिष्ठानां, शिवैकशरणानाम्; अस्मिन् कुले, कुल्यते संस्त्यायते अनेनेति कुलम्; "कुल संस्त्याने" इति **धातुः**, तस्मिन्; **अस्मिन्** इत्यभिनीयनिर्देशेन बीजक्षेत्रसांकर्यदोषाभावोऽवगम्यते। अव्यभिचारिणी शिवैकभक्तिश्च। उक्तं **चार्याशतके**—

"दारुणमसिपत्रवनं
दारुणतममस्तु वान्धतामिस्रम्।
का वा क्षतिस्ततो नः
शैवा वयमा चतुर्वेदनात्॥"

इति। एवंभूते महति उत्तमानां कुले, '**उत्पद्यापि**' इति पदेन, यथा अन्नदा आपद्रक्षकप्रतिगृहीत्रादेः गौण-पुत्रतामापुः लोकेन यथा; अहं पुनः कथमिति चेत्? उत्पद्यापि श्रीरङ्गराजाध्वरिणः पुत्रभावेन जनित्वापीत्यर्थः।

ननु—न हि उत्तमजन्मकुलमात्रेण सर्वे तत्त्वविदो भवेयुः। न निहीनकुलजा इति नियमो दृश्यते। लोके बहुषु ब्राह्मणेषु कश्चिदेव तत्त्वविद् भवति। तिर्यग्गर्भसंभवा अपि महान्तो दृश्यन्ते। तथा च **ब्रह्मोत्तरखण्डे** कश्चिद्वृद्धः प्रामाणिक आह—

"किं भाव्यं किमभाव्यं वा संसारेऽस्मिन् भ्रमात्मके।
ईश्वरस्य तु या माया तस्याः को वेत्ति चेष्टितम्॥
हरिणी गर्भिणी भूत्वा **ऋश्यशृङ्ग**मसूयत।
सुराष्ट्रस्य तथा राज्ञः करं स्पृष्ट्वा सुराङ्गना॥
तत्क्षणाद् गर्भिणी भूत्वा मनुं प्रासूत तापसम्।
तथा सत्यवती कन्या शफरीगर्भसंभवा॥
तस्यां व्यासः समुत्पन्नः सर्वविज्ञानसागरः।
विनापि वासुदेवेन रोहिण्यास्तनयोऽभवत्॥"

इत्येवमादिदर्शनात्। न हि जन्मस्थानमात्रेण श्रैष्ठ्यं स्वत एव कारणमिति चेत्, सत्यम्। तथापि—

"शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते।
अथ वा योगिनामेव कुले महति धीमताम्॥"

इति **भगवत्सूक्तेः** । अत्रापि **शिवरहस्ये**—'शैवश्छन्दोगः' इति परमेश्वरानुग्रहसूक्त्या च श्रैष्ठ्यमस्त्येवेत्यर्थः ।

किं च—**त्वन्महिमजलधेः**; तव माहात्म्यसमुद्रस्य शीकराणाम् अणून् अत्यल्पांशान्, **आस्वाद्यापि**; शिवाराधनमेव अगतिकानां तारकमिति बहुधा विदित्वापि; **एष पापः**, अहम्, **इन्द्रियाणां चापलात्**, तत्तद्विषयविषयभोगवाञ्छया तुच्छेषु **तुदन्ति** मनः क्लेशयन्तीति **तुच्छाः**, तेषु अहरहः उपभुज्यमानेषु खरसूकरशुनकादिवत् स्त्र्यन्नपानादिविषयभोगेषु व्यग्रः उद्युक्तः जातरूकः सन् इदम् उत्कृष्टं ब्राह्मणकुलजन्मापि व्यर्थयामि व्यर्थीकुर्वे ।

"ब्राह्मण्यं प्राप्य लोकेऽस्मिन् न मूको बधिरो भवेत् ।
नापक्रामति संसारात् स खलु ब्रह्महा भवेत् ॥"

इति **श्रुत्या** ब्रह्मघ्नो भवामीति भावः ।

ननु—श्रीमद्दीक्षितोऽयं शिवांशावतारः, कार्वेटिनगरस्थ-**बोम्म**भूपमुखाराधितः, सांसारिकसर्वसाधनसंपन्नः, श्रौताचारनिरतश्च आसीत् इति जनश्रुतिरास्ते । पुनः किमर्थं, 'पापोऽहम्' इत्यादिना आत्मनिन्दया विषीदति इति चेत्; शृणु—अशुद्धचित्तानां सुखाभासः संसारः, स एव धीमताम् उरुदुःखप्रद एव । अथ वा, एतत्स्तुतिकर्तॄणां संसारिणाम् उपकाराय वा विषादानुकरणमिति पाक्षिकः । अपि च श्रीमन्नारायणस्यापि देवस्य भृगुशापच्छलेन दाशरथिरूपेण अवतीर्णस्य रामस्य सीतावियोगनागास्त्रबन्धनादिसमयप्रलापवत् शिवांशावताररूपस्यापि अस्य दिक्षितचरणस्य जन्ममात्रेण मानुषचेष्टाकरणं वा अस्तु । नैतावता अस्मदादिवत् सांसारिकदुःखादि सत्यं बुध्वा हर्षशोकाद्यनुभवः तेषां भवेत् किम् ?

"विषादो नैव विपदः संपदो नैव संपदः ।
स्वस्वरूपं भवेत् संपत् तदन्यत् सुधियां विपत् ॥"

इति **न्यायेन** पारमेश्वराधिगतमनुष्यजन्मादिप्रतीत्या किंचिद् स्वरूपभानप्रत्यूहशरीरधर्मभानमेव धीमतां दुःखहेतुः क्वचित् क्वचित् भवति । 'सततमिदं भूयाद्', 'इदं मा भूत्' इति शोभनाशोभनभ्रमजनितरागद्वेषवतां भवक्लेशस्वभाव एव धीमतामनुकरणमिति गम्यते । यदि अन्यथा इन्द्रजिदाहवादिस्थले **श्रीरामचन्द्रव**चनम्—

"परित्यक्ष्याम्यहं प्राणान् वानराणां च पश्यताम् ।
धिङ् मां दुष्कृतकर्माणमनार्यं मत्कृते ह्यसौ ॥
लक्ष्मणः पतितः शेते शरतल्पे गतासुवत् ।"

इत्यादिदीनत्ववसां यथार्थत्वाङ्गीकारे न हि साधुसंमतः । तथा इहापि किंचित् भवक्लेशमनुसृत्य वा प्राणिनामेतत् स्तुतिकर्तॄणाम् उपकाराय वा केवलम् एष पापोऽहं जन्म व्यर्थयामीत्यादिबहुषु स्थलेषु उच्यत इति भावः ।

अन्वयः—एष पापः उत्तमानां महति कुले उत्पद्यापि, त्वन्महिमजलधेः शीकराणून् आस्वाद्यापि, इन्द्रियाणां चापलात् तुच्छेषु व्यग्रः सन्, त्वत्पादार्चाविमुखहृदयश्च सन् जननं व्यर्थयामि। आः कष्टम्। स्मरहरेति संबोधनेन कामादिदोषान् व्यपोह्य, मां त्वत्स्वरूपध्यानमुदितं कुर्या इति भावः ॥ ७ ॥

उक्तमेवार्थं प्रकारान्तरेण पुनर्विज्ञापयति—

**अर्कद्रोणप्रभृतिकुसुमैरर्चनं ते विधेयं**
**प्राप्यं तेन स्मरहर फलं मोक्षसाम्राज्यलक्ष्मीः।**
**एतज्जानन्नपि शिव शिव व्यर्थयन् कालमात्म-**
**न्नात्मद्रोही करणविवशो भूयसाधः पतामि ॥ ८ ॥**

**अर्केति**। हे स्मरहर। **ते**; तव, **अर्चनम्**; आराधनम्, **अर्कद्रोणप्रभृतिकुसुमैः विधेयम्**। अर्चयन्ति अस्य पुष्पैरित्यर्कः। "मन्दारश्चार्कपर्णोऽत्र शुक्लेऽलर्कप्रतापसौ" **इत्यमरः**। द्रोणम्, प्रसिद्धं कालहस्त्याद्रौ। अर्कद्रोणप्रभृतीनाम् ओषधीनां कुसुमैः; कुस्यन्ति श्लिष्यति अत्र भ्रमरादिरिति कुसुमानि। अथ वा कुत्सितानि सुमानीति वा। निरावरणकुत्सितदेसमुत्पन्नाति सुतानीं वा। मल्लिकाचम्पकादेरिव आवरणपालकजलसेकादिक्रियां विनैव साधारणवृष्टिमात्रेण अभिवृद्धानि। अत एव कैश्चिदपि अनभिलषणीयानीति यावत्। श्रीशिवार्चनसाधनद्रव्यसौलभ्यं प्रसिद्धं हि **गीतासु**—

"चन्दनं बिल्वकाष्ठस्य पुष्पाणि वनजान्यपि।
फलानि तादृशान्येव यस्य प्रीतिकराणि च ॥
दुष्करं तस्य सेवायां किमस्ति भुवनत्रये।
वन्येषु यादृशी प्रीतिर्वर्तते परमेशितुः ॥
उत्तमेष्वपि नास्त्येव तादृशी ग्रामजेष्वपि।
तं त्यक्त्वा तादृशं देवं यः सेवेतान्यदेवताः ॥
स तु भागीरथीं त्यक्त्वा काङ्क्षते मृगतृष्णिकाम्।"

इति। **वायुसंहितायाम्**—

"नद्यां तु सिकतावारि कुसुमं सुलभं वने।
नास्त्येव करणक्लेशः कर्तव्यः सकृदञ्जलिः ॥
एवं पूजास्वशक्तस्य ज्ञानं किं सुलभं भवेत्।"

इति।

अत्र अर्कादिग्रहणात् मन्दारचम्पकेन्दीवरपद्मादिसंपादनव्यायामो मास्तु । शाल्मलीवाहसोन्मत्तमुखैरपि कुसुमैः तव अर्चनं विधेयं विधातुं भवतीत्यर्थः । सत्येवं यथा भारवाहिनां बहूनां मध्ये तत्तद्भारदूरदेशाद्यनुगुणं वेतनफलं न, तथेह भवति । किं तु काश्मीरनिक्षिप्तशाल्यादिकलमवदनन्तफलदमित्याह— **तेनेति** । **तेन** अर्कद्रोणादिकुसुमवन्यफलकुल्याकूपसलिलादिविहीनसाधनवता पूजनेनापि प्राप्यं फलं प्रयोजनम् मोक्षसाम्राज्यलक्ष्मीरेव; मोक्षो मोक्षणम् अवसानम्, अविद्याकामकर्मदुःखादेः, तस्य मोक्षस्य अखण्डानन्दलक्ष्मीरित्यर्थः । तथा च **शिवपुराणम्**—

"शिवे दत्तं हुतं जप्तं फलान्नादिनिवेदनम् ।
एकं चाक्षय्यफलदं तद्विधानान्न संशयः ॥"

इति ।

एवमतिप्रसादलाभाय विष्ण्वादयोऽप्याराधयन्तीति तत्रैवाह—

"इन्द्रनीलमयं लिङ्गं विष्णुः पूजयते सदा ।
विष्णुत्वं प्राप्तवांस्तेन सोऽभूदीशः सनातनः ॥"

इति । **भारते**—

"यस्य ब्रह्मा च विष्णुश्च त्वं च शक्र सहामरैः ।
अर्चयध्वे सदा लिङ्गं तस्माच्छ्रेष्ठतरो हि कः ॥
ऋषयश्चापि देवाश्च गन्धर्वाप्सरसस्तथा ।
लिङ्गं यस्यार्चयन्ति स्म तदाराध्यतमः शिवः ॥"

इति । **जैमिनिभारतेऽपि**—

"ज्योतींषि त्रिदशा नागा यक्षाश्चन्द्रार्कमारुता ।
सर्वेषु पुरुषकारेण मनुष्या देवतां गताः ॥"

इति । निष्कामानां सकामानां च भुक्तिमुक्तिप्रदं शिवार्चनं त्वद्रूपप्राप्तिफलपर्यन्तं भवतीत्येतत् जानन्नपि; हे शिव शिवेति वीप्सा भीतिं द्योतयति । तथा च **वार्तिकाचार्याः**—

"लोकेऽपि महतीं भीतिमापन्नाः शिवशासनाः ।
तूर्णं शिवशिवेत्युच्चैर्भजन्ति भयहारिणम् ॥"

इति ।

इह भयकारणं तु अस्यल्पश्रमसाध्यपूजाया महाफलप्रदत्वं जानन्नपि 'नाहं शिवमर्चयामि' इति भीत्या शिव शिवेति स्मृतम् । हे **आत्मन्! कालम्**; अनेककल्पमारभ्य एतावत्पर्यन्तं वा कालं व्यर्थयन् विगतार्थमेव

कुर्वन्, **करणविवशः,** अत एव आत्मद्रोही च सन् सर्वेश्वरस्य सर्वात्मकस्य तव महिमानं विस्मृत्य जीवदेहतत्सं-बन्धेषु अहं ममेति भावालम्बनमेव आत्मद्रोहः । अत्र **श्रुतिः**—

"अन्यथा सन्तमात्मानं योऽन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणे ॥"

इति अन्यद्रोहिणामेव प्रायश्चित्तं विधीयते । न हि आत्मद्रोहिण इत्यतश्च भूयसा अत्यन्तमधः पतामीत्यर्थः ।

अयं भावः—लोके अत्यन्तदुःखी सुखेप्सुः अल्पायासेन महासुखसाधनप्राप्त्युपायं विजानन्नपि भवन-क्षेत्रादिकं सर्वस्वं पणबन्धं विधाय, सततं द्यूतरतिः सन् कथमुद्गच्छेदिति भावः । **परिवृत्त्यलंकारः** । तल्लक्षणं तु—"परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः" इति ॥ ८ ॥

दृढप्रयत्नेन सर्वं सर्वस्य सिद्ध्येदिति चेत्, न; मदन्तः शत्रुः बलीयान्, तेन अहं योद्धुं न शक्नोमीत्याह—

**किं वा कुर्वे विषमविषयस्वैरिणा वैरिणाहं**
**बद्धः स्वामिन् वपुषि हृदयग्रन्थिना सार्धमस्मिन् ।**
**उक्ष्णा दर्पज्वरभरजुषा साकमेकत्र नद्धः**
**श्राम्यन् वत्सः स्मरहर युगे धावता किं करोतु ॥ ९ ॥**

**किं वेति** । हे स्वामिन्! **अहं विषमविषयस्वैरिणा ;** विषमाः कण्टककर्दमप्रस्तारवद् अधरोत्तरा ये विषया इन्द्रियार्था अप्राप्यविषया इत्यर्थः । तेषु, **स्वैरिणा,** स्वच्छन्दं विशृङ्खलं धावता अशक्तस्य मम **वैरिणा हृदयग्रन्थिना ;** हृदयस्थिता अविद्याकामकर्मवशंगतनानावासनाजटिलेन ग्रन्थिना **सार्धं ; अस्मिन् वपुषि ;** उप्यते कर्मभिरिति वपुः तस्मिन् वपुषि, स्वामिना, त्वयेति शेषः । **बद्धः** किं कुर्वे ; किमपि कर्तुं न शक्नुयामित्यर्थः।

हे स्मरहर! इति पृथक् संबोधनतः अत्र दृष्टान्तः मया विज्ञाप्यत इत्यभिमुखीकरणं गम्यते । **दर्पज्वरभरजुषा ;** दर्पस्य मदस्य ज्वरभरं ज्वराधिक्यं भजता ; अतः विषमदेशेषु स्वच्छन्दे **धावता उक्ष्णा ;** उक्षति रेतः सिञ्चति इत्युक्षा, "उक्ष सेचने" इति **धातुः** । तेन **साकम्, युगे ;** युग्यबन्धनदण्डे ; **एकत्र ;** दृढपाशेन नद्धः बद्धः, **श्राम्यन् वत्सः ;** प्रथमे वयसि वसतीति वत्सः, "वस निवासे" इति **धातुः** । एक-हायनो वत्सः किं वा करोतु ? अकिंचित्करः सन् नश्येदेवेत्यर्थः । यथा दर्पितेन धावता उक्ष्णा **साकम्** एकत्र युगे **नद्धः वत्सः** प्रतियोगितुल्यबलाभावात् विषमदेशेषु पातं पातं मूर्च्छितो भवेत् । तद्वत् अन्तः **हृदयग्रन्थिना** सार्धम् **अस्मिन् वपुषि** त्वया नद्धः स्वामिनम् अन्तरेण पशुमिमं बन्द्धुं मोक्तुं वा क ईष्टे ? तस्मात् अकिंचित्करः श्रान्तः अभवत् । ततः त्वया अयं पशुः मोचनीय इति भावः ।

अन्वयः---हे स्वामिन्! अहं विषमविषयस्वैरिणा वैरिणा हृदयग्रन्थिना सार्धम् अस्मिन् वपुषि स्वामिना त्वया बद्धः किं वा कुर्वे? हे स्मरहर! दर्पज्वरभरजुषा धावता उक्ष्णा साकम् एकत्र युगे नद्धः श्राम्यन् वत्सः किं करोतु? । अत्र **विषमालंकारः**; तल्लक्षणं तु---" विषमं वर्ण्यते यत्र घटनाननुकूलयोः " इति[1] ॥ ९ ॥

दुरिन्द्रियनिग्रहेऽपि असमर्थोऽहं काम्यकर्म कृत्वा तत्फलं यथेच्छमनुभवामीत्युक्ते जन्मजरानरकगर्भवासादिदुःखं स्मृत्वा बिभेमि । ततो भवच्चरणप्रपदनं विना अन्या गतिर्नेत्याह—

**नाहं रोद्धुं करणनिचयं दुर्नयं पारयामि**
**स्मारं स्मारं जनिपथरुजं नाथ सीदामि भीत्या ।**
**किं वा कुर्वे किमुचितमिह क्वाद्य गच्छामि हन्त**
**त्वत्पादाब्जप्रपदनमृते नैव पश्याम्युपायम् ॥ १० ॥**

**नाहमिति** । हे **नाथ! अहम् दुर्नयम्**; दुःखेन स्ववशं नेतुं योग्यम्, **करणनिचयम्**; करणानाम् इन्द्रियाणां समूहम्, **रोद्धुम्**; दुर्विषयेभ्यः प्रतिनिवर्तयितुं प्रत्यङ्मुखीकर्तुम्, **न पारयामि**; न शक्नोमीत्यर्थः । अत्र **श्रुतिः**---

" पराञ्चि खानि व्यतृणत् स्वयंभू-
स्तस्मात् पराङ् पश्यति नान्तरात्मन् । "[2]

इति । बहिर्मुखानि करणानि चरन्तु । इह धनदारभोगानेव भुञ्जामीति चेत्; पुनः पुनः भुक्तार्थेष्वेव भोगविशेषु भोगवाञ्छया कर्म कर्तव्यम् । कर्मफलभोगाय जन्म भवेत् । जन्मिनः कर्म कर्तव्यमिति अविच्छिन्ननदीस्रोतोवत् अनिवार्यमेव । तथा च **श्रुतिः**—

" कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳसमाः ।
. . . . . . . . ॥
असुर्या नाम ते लोका अन्धेन तमसावृताः ॥

---

१ ० घटनाननुरूपयोः इति मुद्रितपाठः

२ पराञ्चीति । स्वाज्ञदृष्टिविकल्पितमूलाविद्याबीजांशयोगतः स्वयमेव भवतीति स्वयंभूः । स्वयं स्वतन्त्रो भूत्वा पराग् अञ्चन्तीति पराञ्चि, खानि, तदुपलक्षितश्रोत्रादीनि इन्द्रियाणि पराग्रूपशब्दादिविषयगहनगोचरस्वभावानि भवन्त्विवति व्यतृणत् प्रत्यग्भावपराङ्मुखतया हिंसितवान् । यस्मादेवं तस्मात् इन्द्रियार्थोपलब्धा जीवः पराङ् प्रत्यग्भावावरणशब्दादीनेव पश्यति । नान्तरात्मन् अन्तरात्मानं प्रत्यञ्चं कदापि न पश्यतीत्यर्थः । प्रायश एवंस्वभावा लोकाः; इति अस्य मन्त्रस्य तात्पर्यार्थः ।

तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः । "[1]

इति । **पूर्वाचार्याश्च**—

" कुर्वते कर्मभोगाय कर्म कर्तुं च भुञ्जते ।
नद्यां कीट इवावर्तादावर्तान्तरमश्नुते ॥
व्रजन्ते जन्मनो जन्म लभन्ते नैव निर्वृतिम् । "

नाहं रोद्धुं करणनिचयं दुर्नयं पारयामि
स्मारं स्मारं जनिपथरुजं नाथ सीदामि भीत्या ।
किं वा कुर्वे किमुचितमिह क्वाद्य गच्छामि हन्त
त्वत्पादाब्जप्रपदनमृते नैव पश्याम्युपायम् ॥ १० ॥

इति **न्यायेन ; जनिपथरुजम्** ; जननमरणमार्गसंभवं, तेषाम्, **स्मारं स्मारम्** ; स्मृत्वा स्मृत्वा, **भीत्या** सीदामि । **ज्ञानयोगखण्डे**—

" इत्थं परिणतो गर्भः पूर्वकर्मवशान्मुने ।
महद्दुःखमवाप्नोति रौरवे नरके यथा ॥
तां पीडां च विजानाति तदा जातिस्मरो भवेत् ।
नानायोनिसहस्राणि पुरा प्राप्तानि वै मया ॥
आहारा विविधा भुक्ता पीताश्च विविधाः स्तनाः ।

---

१ कुर्वन्निति । 'शतायुषः पुरुषः शतेन्द्रियः इति श्रुत्यनुरोधेन शतं समाः संवत्सराः ताः श्रौतस्मार्तनित्यनैमित्तिककर्माणि कुर्वन्नेवे जिजीविषेत् । स्वाज्ञस्य तूष्णीमवस्थानापेक्षया काम्यधिया वा कर्मकरणमेव श्रेयः इत्यर्थः । 'नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः, इति स्मृतेः ।

असुर्या इति । काम्यधिया कर्मानुष्ठातारः अविद्वांसः प्रेत्य इमं देहं त्यक्त्वा । अथ, "पश्यतेहापि सन्मात्रमसदन्यत्" इति, "प्रजातिर्देवाननुशशास" इति च श्रुत्यनुरोधेन असदपह्नवसिद्धसन्मात्रभावारूढाः सुराः, तद्भावविरला असुराः, तेषाम् आवासभूताः असुर्या नाम लोकाः, काम्यैकर्मफलानि यत्र लोक्यन्ते भुज्यन्ते इति लोकाः, स्वर्गादयो जन्मानि वा चिन्मात्रभावावरकान्धेन स्वाज्ञानतमसा वृताः तान् लोकानेव मुहुः मुहुः गच्छन्ति । घटीयन्त्रवत् अविश्रान्तं जन्ममरणानि प्राप्नुवन्तीत्यर्थः । केन दोषेणैव एवं संसरन्तीत्यत्र—

" इह चेदवेदीथ सत्यमस्ति नो चेदिहावेदीन्महती विनष्टिः ।"
" योऽन्यथासन्तमानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥"

इति श्रुतेः ।

" लब्ध्वा कथं चिन्नरजन्म दुर्लभं
तत्रापि पुंस्त्वं श्रुतिपारदर्शनम् ।
यस्त्वात्ममुक्त्यै न यतेत मूढधीः
स आत्महा स्वं विनिहत्य हन्यते ॥ "

इति सर्वज्ञभगवत्पादोक्तेश्च । ते आत्महनः जन्मनाशवन्तः जनाः भवन्ति । विद्यमानाविद्यमानवस्तुवस्त्वाभासतिरस्करणपुरस्करणदोषेणेत्यर्थः ।

जातश्चैव मृतश्चैव जन्म चैव पुनः पुनः ॥
अहो दुःखोदधौ मग्नो न पश्यामि प्रतिक्रियाम् ।
यदि योन्यां प्रमुञ्चामि तं प्रपद्ये महेश्वरम् ॥
. . . . . . . . . .
इत्थं गर्भगतं स्मृत्वा योनियन्त्रप्रपीडनात् ।"

नाहं रोद्धुं करणनिचयं दुर्नयं पारयामि
स्मारं स्मारं जनिपथरुजं नाथ सीदामि भीत्या ।
किं वा कुर्वे किमुचितमिह क्वाद्य गच्छामि हन्त
त्वत्पादाब्जप्रपदनमृते नैव पश्याम्युपायम् ॥ १० ॥

इति ।

एवमादिसांसारिको **रुजं** स्मृत्वा भीत्या विषीदामि । न हि किंचिदुत्तरणोपायं वेद्मि । सत्येवम् इहास्मिन् विषयद्वैविध्ये **किं वा कुर्वे**? किं वाद्य विधातुम् **उचितम्**? **क्व** वा **गच्छामि**? **हन्त** इति विषादे । सर्वथा समालोच्यमाने त्वत्पादाब्जप्रपदनमृते; तव पादारविन्दयोः प्रपदनं संच्छिन्नद्रुमवत् पतनं विना; "पृथग् विनान्तरेणर्ते" इति **कोशः** । **अन्यमुपायं न पश्यामि**; उपैति आत्मनः हितम् अनेनेति उपायः, तं न पश्यामीत्यर्थः । अथवा—त्वत्पादाब्जप्रपदनमृते; "प्रपदनं निरोधो विदुषां मुदे" इति **श्रुत्या** अनन्यशरणः शरणवरणं विना उपायान्तरं न पश्यामीत्यर्थः ।

अन्वयः—हे नाथ ! अहं दुर्नयं करणनिचयं रोद्धुं न पारयामि, जनिपथरुजं स्मारं स्मारं भीत्या सीदामि; किं वा कुर्वे? किमिहोचितम् ! अद्य क्व गच्छामि? हन्त ! त्वत्पादाब्जप्रपदनमृते अन्यम् उपायं न पश्यामि । **विनोक्त्यलंकारः**—"विनोक्तिश्चेद् विना किंचित् प्रस्तुतं हीनमुच्यते" इति तल्लक्षणम् ॥ १० ॥

**उल्लङ्घ्याज्ञामुडुपतिकलाचूड ते विश्ववन्द्य**
**त्यक्ताचारः पशुवदधुना मुक्तलज्जश्चरामि ।**
**एवं नानाविधभवततिप्राप्तदीर्घापराधः**
**क्लेशाम्भोधिं कथमहमृते त्वत्प्रसादात् तरेयम् ॥ ११ ॥**

**उल्लङ्घ्येति** । हे **विश्ववन्द्य** ! **उडुपतिकलाचूड** ! उड्डीयन्त इति उडूनि "डीङ् विहायसगतौ" इति **धातुः** । तेषां पतिः चन्द्रः, तस्य कलाः अमृतमय्यः तिथिरूपाः, तासु चतुर्थीकला जटामण्डलमकुटयोः संधौ किंचिद् वामभागे अस्यास्तीति तथोक्तः । **ते**; तव, **आज्ञाम्**; श्रुतिपुराणस्मृत्यादिरूपाम् आज्ञाम् **उल्लङ्घ्य** अतिक्रम्य; "यावज्जीवमग्निहोत्रं जुहुयात्", "शिवलिङ्गं त्रिसंध्यमहरहरभ्यर्चयेत्", "नाप्सु मूत्रं पुरीषं कुर्यात्" इति विधिनिषेधरूपाम् आज्ञाम् उल्लङ्घ्य अतिक्रम्य; **त्यक्ताचारः**; बुद्धिपूर्वं त्यक्तः सदाचारः येन सः त्यक्ताचारः । अत एव **पशुवत्** लोकरीतिं, नरपतिशासनं च अविज्ञाय शाल्यादिकं भक्षयन् तत्क्षणे क्षेत्रपालशिक्षितः कर्षणवहनादिक्लेशेन कुर्वन् कदा वा मद्दुःखविनाशः? तत्र क उपायः? इत्यभिसंधाय चतुष्पात् पशुः क्वचित् क्लिश्यन् क्वचित् मत्तश्चरेद् यथा, तद्वत् मुक्तलज्जः चरामीत्यर्थः ।

हे **विश्ववन्द्य** ! **एवं नानाविधभवततिप्राप्तदीर्घापराधः**; एवम् उक्तप्रकारेण नानाविधभवततयः संसृतिपरं पराः, तास्वेव संप्राप्ताः दीर्घाः चिरकालसंभृताः अपराधाः; "रध हिंसायाम्" इति **धातुः** । हननादि-

दुष्कर्माणि अस्य सन्तीति तथोक्तः । अहं क्लेशाम्भोधिः, "अविद्यारागोऽस्मिताद्वेषोऽभिनिवेश इति पञ्चक्लेशाः" इति[1] **श्रीपतञ्जलिः,** स पञ्चविधः क्लेश एव अम्भसां निधिः, तं **क्लेशाम्भोधिम् , त्वत् प्रसादाद् ऋते ;** विना कथं तरेयम् ? न कथंचन तर्तुं शक्नुयामित्यर्थः । तस्मात् त्वं, प्रसीदेति भावः । **विनोक्त्यलंकारः ।** लक्षणं तु पूर्ववत् ॥ ११ ॥

एवं त्वदाज्ञोल्लङ्घनापराधकृदपि अहं सकृत् त्वां सभयं प्रार्थयेयं यदि त्वं करुणया क्षाम्यस्येव, तदापि आगः कुर्वन् निर्लज्जं कथं प्रार्थयामीत्याह—

**क्षाम्यस्येव त्वमिह करुणासागरः कृत्स्नमागः**
**संसारोत्थं गिरिश सभयप्रार्थनादैन्यमात्रात् ।**
**यद्यप्येवं प्रतिकलमहं व्यक्तमागःसहस्रं**
मूर्खः
**कुर्वन् मूकः कथमिव तथा निस्त्रपः प्रार्थयेयम् ॥ १२ ॥**

**क्षाम्यस्येवेति** । **हे गिरिश !** कैलासपते ! गिरि भक्तानां वाचि **सदा** शेते, वेदलोकव्यवहारमधुर-भाषणशक्तिप्रदः इति गिरिशः । **करुणासागरः त्वम् इह ;** अपराधिविषये, **संसारोत्थम् ;** संसरति अस्मिन्निति संसारः, तत्र निवसताम्, दारसुतधनादीनां स्नेहतः परेषां वैरतश्च समुत्थं संभूतम्, **कृत्स्नम् ;** कृत्यते व्याप्रियते अनेनेति कृत्स्नम्, **आगः ;** "आगोऽपराधो मन्तुश्च" इति **कोशः** । "अग कुटिलायां गतौ" इति **धातुः** । **सभयप्रार्थनादैन्यमात्रात् ;** सभयं यथा भवति तथा अभ्यर्थनवचनानां दैन्यस्य दीनभावाभिनयस्य लेशात् करुणा-निधित्वात् **क्षाम्यस्येव** ।

**एवं यद्यपि प्रतिकलम् ;** कला अत्यल्पपरिमाणाः, तासु कलासु प्रतिकलम्, **आगःसहस्रम् ;** अपराधकोटिम्, कुर्वन् ; अत एव **मूकः ;** मूयते बध्यते वातादिना वाग्वृत्तिः अस्येति मूकः ; "मुङ् बन्धने" इति **धातुः** । मूर्ख इति पाठान्तरम् । एवंभूतः **अहं निस्त्रपः ;** निर्गता त्रपा लज्जा यस्मात् निस्त्रपः, "त्रपूष् लज्जायाम्" इति **धातुः** । **कथं** वा **प्रार्थयेयम् ?** अज्ञदशायाम् अपराधशतं कुर्वन् कश्चित् स्वामिसंनिधौ क्षमापणसमयेऽपि पुनः अधिकापराधी सन् निर्लज्जं कथं विज्ञापयिष्यतीति भावः ।

अन्वयः—हे गिरिश ! करुणासागरः त्वम् इह मदभ्यर्थनविषये संसारोत्थं कृत्स्नम् आगः सहस्रं सभयप्रार्थनादैन्यमात्रात् क्षाम्यस्येव ; एवं यद्यपि प्रतिकलम् अगःसहस्रं व्यक्तं कुर्वन् मूकः निस्त्रपश्च सन् कथमिव प्रार्थयेयम् इति भावः ॥ १२ ॥

**सर्वं क्षेप्तुं प्रभवति जनः संसृतिप्राप्तमाग-**
**श्चेतः श्वासप्रशमनसमये त्वत्पदाब्जे निधाय ।**

---

१. आविद्येति । पञ्चविपर्यया इत्यर्थः । ते स्पन्दमाना गुणाधिकारं दृढयन्ति । परिणामम् अवस्थापयन्ति, कार्यकारणस्रोत उपमयन्ति, परस्परानुग्रहतन्त्रीभूत्वा कर्मविपाकं चाभिनिर्हरन्ति इति सूत्रार्थः ।

**तस्मिन् काले यदि मम मनो नाथ दोषत्रयार्तं**
**प्रज्ञाहीनं पुरहर भवेत् तत्कथं मे घटेत ॥ १३ ॥**

हे नाथ ! **जनः श्वासप्रशमनसमये , चेतः** ; चेतयति इति चेतः अन्तःकरणम्, **त्वत्पदाब्जे विधाय** ; अनितरवृत्तिकं संस्थाप्य, **संसृतिप्राप्तम् सर्वम् आगः क्षेप्तुम्**, त्यक्तुं शक्नोति । अपराधशतं कृत्वापि मरणकाले पश्चात्तापेन सह प्रपन्नस्य रक्षणीयत्वादिति भावः । **तस्मिन् काले** ; चरमश्वाससमये, **दोषत्रयार्तं मनः** ; दोषाणां त्रयं दोषत्रयम् ; दोषाः आध्यात्मिकाः, आधिभौतिकाः, आधिदैविकाः इति त्रिविधाः । अथ वा ; अश्रद्धा, कुतर्कधीः, मान्द्यरूपा वा । अथ वा ; संशय, असंभावना, विपरीतभावना वा दोषाः, तेषां त्रयेण आर्तं पीडितं मनः ; मनुते अनेनेति मनः । **प्रज्ञाहीनम्** ; " प्रज्ञा त्रैकालिकी मता " इति **वचनात्** पूर्वानुभूत-दुःखानि, भाविपरलोकयातना गर्भवासादीनि अद्य ऊर्ध्वश्वासहिक्कादिसंभवानि अधुनातनानि च प्रकर्षेण जानातीति प्रज्ञा । " ज्ञा अवबोधने " इति **धातुः** । **मम मनः** ; तया प्रज्ञया हीनं पृथक् भवेद् यदि, हे **पुरहर** ! अवस्थात्रयसाक्षिन्, तत् काले मूढस्य मम चेतः समर्पणं कथं वा घटेत, न घटत एवेति भावः ।

अन्वयः—जनः श्वासप्रशमनसमये चेतः त्वत्पादाब्जे विधाय, संसृतिप्राप्तं सर्वम् आगः क्षेप्तुं प्रभवति । हे नाथ! तस्मिन् काले दोषत्रयाप्तम् मे मनः प्रज्ञाहीनं भवेद् यदि, मम तत् कथं घटेत । **असङ्गत्यलंकारः** ; तल्लक्षणं तु—" विरुद्धं भिन्नदेशत्वं कार्योत्पत्तेरसङ्गतम् " इति ॥ १३ ॥

एवमुक्तप्रकारेण मरणसमये मनोदोषान् व्यपोह्य चेतः समर्पणे तदा का वा बाधा ? इत्यत आह—

**प्राणोत्क्रान्तिव्यतिकरदलत्संधिबन्धे शरीरे**
**प्रेमावेशप्रसरदमिताक्रन्दिते बन्धुवर्गे ।**
**अन्तःप्रज्ञामपि शिव भजन्नन्तरायैरनन्तै-**
**राविद्धोऽहं त्वयि कथमिमामर्पयिष्यामि बुद्धिम् ॥ १४ ॥**

**प्राणोत्क्रान्तीति** । हे **शिव** ! स्वयंप्रकाश ! " वश कान्तौ " इति **धातुः** । शिवशब्दः एवं निरुच्यते—

" हिसिधातोः सिंहशब्दो वशकान्तौ शिवः स्मृतः ।
वर्णव्यत्ययतः सिद्धः पश्यकः कश्यपो यथा ॥ "

इति । " शीङ् स्वप्ने " इति वा । अविद्यां वाति गच्छति इति ; " अनेन जीवेनानुप्रविश्य नामरूपे व्याकरवाणि " इति[1] **श्रुतेः** । ' शिवः अतिशुद्धः ' इति, आश्रितशिवदः इति च । **तथा चोक्तम्**—

---

१ अनेन जीवेन आत्मनेति । आत्मधारणकर्त्रा आत्मनेति वचनात् स्वात्मनः अव्यतिरिक्तेन चैतन्यस्वरूप-तया अपरिशिष्टेन इत्येतद् दर्शयति । अनुप्रविश्य ; तेजोऽबन्नभूतमात्रासंसर्गेण लब्धविशेषविज्ञाना सती नाम च रूपं च नामरूपे व्याकरवाणि विस्पष्टं मा करवाणि असौ नामायम्, इदं रूपमिति व्याकुर्यामित्यर्थः ।

“ अनादिमलसंश्लेषप्रागभावात् स्वभावतः ।
अत्यन्तपरिशुद्धात्मेत्यतोऽयं शिव उच्यते ॥
अथवाशेषकल्याणगुणैकघन ईश्वरः ।
आश्रितात्यन्तशिवदः शिव इत्युच्यते बुधैः ॥
शिवः सर्वसमः . . . . . . . . . . ।”

इति **शैवे** । **कर्णपर्वणि**—

“ समा भवन्ति ते सर्वे दानवाश्चमराश्च ये ।
शिवोऽस्मि सर्वभूतानां शिवत्वं तेन मे स्मृतम् ॥ ”

इति । शिवः स्वजनार्थसिद्धिद इति **आनुशासनिके पर्वणि**—

“ समेधयति यन्नित्यं सर्वार्थानामुपक्रमम् ।
शिवमिच्छन् मनुष्याणां तस्मादेष शिवः स्मृतः ॥ ”

इति । शिवशब्दस्य शिवशक्त्युभयवाचकत्वं **वायुसंहितायाम्**—

“ शं सुखं परमानन्दमिकारः पुरुषः स्मृतः ।
वकारः शक्तिरमृतं शिव इत्युच्यते बुधैः ॥ ” ॥

इति । साक्षात् **श्रुत्यादिषु** शिवनामप्रसिद्धिरस्यैव हि—

“ **अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ।** ”

प्राणोत्क्रान्तिव्यतिकरदलत्सन्धिबन्धे शरीरे
प्रेमावेशप्रसरदमिताक्रन्दिते बन्धुवर्गे ।
अन्तः प्रज्ञामपि शिव भजन्नन्तरायैरनन्तैः
आविद्धोऽहं त्वयि कथमिमामर्पयिष्यामि बुद्धिम् ॥

इति । विशिष्य वैदिकैरेव शिवशब्द आशास्यमानो दृश्यते—

“ शिवा ऋतवः सन्तु, शिवा ओषधयः सन्तु,
शिवा वनस्पतयः सन्तु, अहोरात्रे शिवे स्यातां,
स्वस्ति शिवं कर्मास्तु ”

इति परममङ्गलवाचकत्वात् प्रयाणकाले यमभटकटुभाषणोद्भटसकलभयहरं नामेदं स्मरणीयमिति, इममर्थं व्यञ्जयन् **दीक्षितचरणः** शिवेति संबुद्धिं कृतवानिति धीमद्भिः विज्ञातव्यम् ।

हे **शिव !** अस्मिन् **शरीरे प्राणोत्क्रान्तिव्यतिकरदलत् संधिबन्धे**; प्राणस्य उत्क्रान्तिः उत्क्रमणम् ऊर्ध्वगमनम् , तस्य व्यतिकरेण संबन्धेन, दलन्तः संधीनां गुल्फजानुकटिकूर्परादीनां बन्धः यस्य तत् ; तस्मिन् शरीरे, तदा प्राणोत्क्रान्तिव्यतिकरदलत् संबन्धे सति, तथा **बन्धुवर्गे;** बध्नन्ति प्रेम्णेति बन्धवः, दारसुतादयः तेषां वर्गः समूहः तस्मिन् । **प्रेमावेशप्रसरदमिताक्रन्दिते** सति, प्रियस्य भावः प्रेम, तस्य

आवेशः प्रसह्य अन्तःप्रवेशः, तस्य प्रसरेण परंपरया हृदयतोदिन्या धिया दमितं विकुण्ठितम् आक्रन्दितं रोदनघोषश्च यस्य तस्मिन् बन्धुवर्गे सति; उक्तं **गीतासु**—

"नीयते मृत्युना जन्तुः परिष्वक्तोऽपि बन्धुभिः ।
सागरान्तर्जलगतो गरुडेनेव पन्नगः ॥
हा कान्ते हा धनं पुत्राः क्रन्दमानाः सुदारुणम् ।
मण्डूक इव सर्पेण मृत्युना नीयते नरः ॥
मर्मसूत्कृष्यमाणेषु मुच्यमानेषु संधिषु ।
यद् दुःखं म्रियमाणस्य स्मर्यतां तन्मुमुक्षुभिः ॥
दृष्ट्वा वाक्षिप्यमाणायां संज्ञया ह्रियमाणया ।
मृत्युपाशेन बद्धस्य त्रता नैवोपलभ्यते ॥
अयःपाशेन कालेन स्नेहपाशेन बन्धुभिः ।
आत्मानं कृष्यमाणं तं वीक्षते परितस्तथा ॥
हिक्कया बाध्यमानस्य श्वासेन परिशुष्यतः ।
मृत्युना कृष्यमाणस्य न खल्वस्ति परायणम् ॥
संसारयन्त्रमारूढो यमदूतैरधिष्ठितः ।
क्व यास्यामीति दुःखार्तः कालपाशेन योजितः ॥
किं करोमि क्व गच्छामि किं गृह्णामि जहामि किम् ।
इति कर्तव्यतामूढः कृच्छ्राद् देशात् त्यजत्यसून् ॥"

प्राणोत्क्रान्तिव्यतिकरदलत्सन्धिबन्धे शरीरे
प्रेमावेशप्रसरदमिताक्रन्दिते बन्धुवर्गे ।
अन्तः प्रज्ञामपि शिव भजन्नन्तरायैरनन्तैः
आविद्धोऽहं त्वयि कथमिमामर्पयिष्यामि बुद्धिम् ॥

इत्यादि द्रष्टव्यम् ।

एवं शरीरे खण्डशः छिद्यमाने बन्धुवर्गे प्रेम्णा रुदितघोषे च सति, **अन्तः**; हृदयदेशे, **प्रज्ञाम् अपि भजन्**, अहं अनन्तैः अन्तरायैः अविरुद्धश्च सन् अन्तःप्राप्तिभाक् त्वम् अस्य मुमूर्षोः न हिताय भवेत् । अपि तु दुःखायैव ईश्वराज्ञा भवति । तदा अन्तःप्रज्ञया बहिः वक्तुम् अशक्तोऽपि धनदारादीन् स्मृत्वा खिद्यति । उक्तं हि वैराग्यशतके

"प्रायेण मुह्यति चेतः
प्राणभृतः प्राणनिर्गमावसरे ।
पुण्येन यदि न मुह्यति
पुत्रं वान्यत् स्मरन् म्रियते ॥"

इति । **श्रीसूतश्च** मरणचिन्तामाह—

“ स्वपादं खण्डितं पश्यन्नग्रतः पृष्ठतोऽपि वा ।
पङ्के वा पांसुके वापि सप्तमासान्न जीवति ॥
. . . . . . . . .
श्वभ्रे यो निपतेत् स्वप्ने तस्य मृत्युरुपस्थितः ।
घोषं न शृणुयात् कर्णे ज्योतिर्नेत्रे न पश्यति ।
. . . . . . . . .
अग्नौ यो निपतेत् वापि यो वा नष्टस्मृतिः सदा ॥
याम्यं शब्दं च यो ब्रूयात् तस्य मृत्युरुपस्थितः ।”

प्राणोत्क्रान्तिव्यतिकरदलत्सन्धिबन्धे शरीरे
प्रेमावेशप्रसरदमिताक्रन्दिते बन्धुवर्गे ।
अन्तः प्रज्ञामपि शिव भजन्नन्तरायैरनन्तैः
आविद्धोऽहं त्वयि कथमिमामर्पयिष्यामि बुद्धिम् ॥

इति । पुनः तया प्रज्ञया यमदूता हि वह्निपतनादि जानाति । बहिर्मुखे इमे मन्मृतिं काङ्क्षन्ते ; अपरे अपहसन्ति ; अन्ये रुदन्ति ; एते रन्ध्रम् अन्विष्यन्ति ; इति विचार्य असंख्यातैः देहबाधैः पिपीलिकामक्षिकामत्कुणमशकाद्यन्तरायैश्च आविद्धः सन्, इह सुखावस्थायामपि अवशाम् इमां बुद्धिं त्वयि प्रत्यगात्मनि तदा समर्पयिष्यामि, कथं त्वदधीनां करिष्ये इत्यर्थः । **प्रेयोऽलंकारः** ; तल्लक्षणं तु—“ चत्वारो रसवत्प्रेम ऊर्जस्वांश्च समाहितः ” इति ॥ १४ ॥

यत एव मुक्तरीत्या चरमसमयबुद्धिसमर्पणानवकाशः प्रसिद्ध एवास्ते ; ततः अद्यैव बुद्ध्या आत्मानं समर्पयामीति विज्ञापयति—

**अद्यैव त्वत्पदनलिनयोरर्पयाम्यन्तरात्म-**
**न्नात्मानं मे सह परिकरैरद्रिकन्याधिनाथ ।**
**नाहं बोद्धुं शिव तव पदं न क्रिया योगचर्याः**
**कर्तुं शक्नोम्यनितरगतिः केवलं त्वां प्रपद्ये ॥ १५ ॥**

**अद्यैवेति** । हे **अन्तरात्मन्** ! अन्तः हृदयारविन्दे स्थित्वा दर्शनश्रवणादिकृदिन्द्रियप्राणादिचेष्टासाक्षितया सदाहमिति स्वरूपेणैव अवभासत इति आत्मा ; अयमात्मशब्दो निरुच्यते **स्मृत्या**—

“ यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।
यच्चास्य संततो भावस्तस्मादात्मेति गीयते ॥ ”

इति । अयमर्थो **अनुभूतिप्रकाशे** निरूच्यते च ; तद्यथा—

“ व्याप्नोत्यनवशेषेण सर्पादीन् स्रगिवाखिलान् ।

कल्प्यानधिष्ठानतया प्रत्यगात्मा[१] भवेत् ततः ॥
सर्वाधिष्ठानसन्मात्र इत्यशेषजगत्प्रति ।
अधिष्ठानतया[२] व्याप्तिं श्रुतिर्ब्रूते सदात्मनः ॥
स्वचिदाभासमोहेन तदुत्थानखिलान्यतः ।
आदत्ते नात्मनः प्राज्ञस्तत आत्मेति तं विदुः ॥
परे आत्मनि सर्वेऽपि संप्रतिष्ठन्त एकले ।
पृथिव्याद्या अनात्मान इति चाथर्वणी वचः[३] ॥
आत्माभासाः पराधीना [४]धीवृत्तीर्विषयोन्मुखाः ।
प्रत्यग्गतिर्यतोऽतोऽसावात्मेत्युक्तो मनीषिभिः ॥
विश्वे वा स्थूलभुङ् नित्यं तैजसः प्रविविक्तभुक् ।
आनन्दभुक् तथा प्राज्ञ इति चागमशासनम् ॥
अव्यावृत्ताननुगतः पूर्णस्वात्मन्यवस्थितः ।
यतोऽस्य संततो भावस्तस्मादात्मेति गीयते ॥
तद्विष्णोरिति मन्त्रोऽपि विष्णोस्तत्परमं पदम् ।
चक्षुर्वदाततं व्योम्नि व्याचष्टे प्रत्यगात्मनि ॥
चतुर्विधनिरुक्त्यात्र चत्वारोऽर्थाः प्रकीर्तिताः ।"

अद्यैव त्वत्पदनलिनयोरर्पयाम्यन्तरात्मन्
आत्मानं मे सह परिकरैरद्रिकन्याधिनाथ ।
नाहं बोद्धुं शिव तव पदं न क्रिया योगचर्याः
कर्तुं शक्नोम्यनितरगतिः केवलं त्वां प्रपद्ये ॥

इति । इत्थंभूत हे **आत्मन्!** मे अभिमानिन आत्मानम् अन्तःकरणम्, सह परिकरैः इन्द्रियप्राणाद्या। परितः स्वस्वस्थानेषु स्थित्वा सश्रद्धं स्वामिकार्यं कुर्वन्तीति **परिकराः**। तैः सह **आत्मानं त्वत्पदनलिनयोः अर्पयामि** ।

अथवा—परिकराः पुत्रपौत्रशिष्यादयः तैः सह आत्मानम् इदं शरीरम् अद्यैव समर्पयामि । शरीरादेः त्वत्पदसमर्पणेन निवृत्तकर्मबन्धः सन् त्वद्रूपेणैव अवशिष्ये इति भावः ।

किमेवं समर्पयसीति चेत्? हे **अद्रिकन्याधिनाथ!** शिव! मङ्गलप्रद! अहं तव पदम् राहोःशिर इतिवत् पद्यते पदम् । तव सच्चिदानन्दरूपं बोध्दुम् ईदृक् तादृक् इति बुद्धिवृत्त्या विषयीकर्तुं न शक्नोमि । तथा च न क्रियाश्च कर्माणीत्यर्थः । संस्कृतिरूपाः क्रियाः **श्रीगौतमेनोक्ताः** ; ता उच्यन्ते—

---

१ प्रत्यङ्ङात्मा इति मुद्रितपाठः. २ ०तयावाप्ति इति मु० पाठः. ३ चाथर्वणे इति मु० पाठः.
४ धीवृत्तिः इति मु० पाठः.

" गर्भाधानं, पुंसवनं, सीमन्तोन्नयनं,जातकर्म, नामकरणम् ,
अन्नप्राशन-चौलोपनयनम् ; चत्वारि वेदव्रतानि ; स्नानम् ,
सहधर्मचारिणीसंयोगः, पञ्चानां यज्ञानामनुष्ठानम्, देव-पितृ-
मनुष्य-भूत-ब्रह्मणामेतेषां च ; अष्टका, अन्वष्टका, पार्वणश्राद्धम् ,
श्रावणी, आग्रयणी, चैत्र्याश्वयुजी चेति, सप्त पाकसंस्थाः
अग्न्याधानम्, अग्निहोत्रम्, दर्शपूर्णमासम्, आग्रयणम्,
चातुर्मास्यम , निरूढपशुबन्धः, सौत्रामणीति सप्तहविर्यज्ञसंस्थाः ;
अग्निष्टोमोऽत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः,
अतिरात्रः, अप्तोर्याम इति सप्त सोमसंस्थाः "

इति । एते चत्वारिंशत् संस्काराः । एतदवान्तराः स्नानसंध्यातर्पणदेवतार्चनकृच्छ्रचान्द्रायणादिप्रायश्चित्तसहिताः क्रियाश्च कर्तुं न शक्नोमि । तथा च **योगचर्याम्** ; योगसिद्धये देहादिशोधनार्थं चीयते क्रियत इति योगचर्या, ताम् । तदुक्तम् **आदिनाथेन योगाचार्येण**—

" अत्याहारः प्रवासश्च प्रजल्पो नियमाग्रहः ।
जनसङ्गश्च लौल्यं च षड्भिर्योगो विनश्यति ॥
उत्साहो निश्चलं धैर्यं तत्वचिन्ता शिवार्चनम् ।
जनसङ्गपरित्यागः षड्भिर्योगः प्रसिद्ध्यति ॥"

**इति साधकबाधकानुक्त्वा पुनराह**—

" धौतिर्वस्तिश्च नीतिश्च ताडनं लौलिकं तथा ।
कपालभातिश्चैतानि षट् कर्माणि प्रचक्षते ॥
कर्मषट्कमिदं प्रोक्तं घटशोधनकारणम् ।
सूर्यभेदनमुज्जायी तथा सीत्कारशीतली ॥
भस्त्रीकं भ्रमरी मूर्च्छा केवला चाष्टकुम्भकाः । "

इति ।—इमानि योगकर्माणि आचरितुं न शक्नोमि । अत एव **अहम् अनितरगतिः** ; इतरगतिशून्यः, **त्वां केवलं प्रपद्ये** इत्यर्थः । कर्मणाम् **आत्मतत्त्व विचारेषु** बुद्धिव्यवसायहीनः त्वामेव शरणं व्रजे इति भावः ।

अन्वयः—हे अन्तरात्मन् ! मे आत्मानं परिकरैः सह त्वत्पदनलिनयोः अद्यैव समर्पयामि । अद्रिकन्याधिनाथ ! शिव ! अनितरगतिः अहं तव पदं बोद्धुं क्रियाः कर्तुं योगचर्याम् आचरितुं च अन्यत् किंचित् कर्तुं च

न शक्नोमि, अतः केवलं त्वामेव प्रपद्ये इति भावः। अस्य प्रस्तुतस्य **आत्मसमर्पणस्तवस्य** तात्पर्यभूतोऽयं श्लोकः ॥ १५ ॥

ननु—एवं प्रपन्नेन त्वया किं लब्धव्यम्? परमेश्वरेण वा किं कर्तव्यइति प्रश्नस्य उत्तरभूतया **प्राचीनगाथया** स्वाभिमतं विज्ञायति—

**यः स्रष्टारं निखिलजगतां निर्ममे पूर्वमीश-**
**स्तस्मै वेदानदित सकलान् यश्च साकं पुराणैः ।**
**तं त्वामाद्यं गुरुमहमसावात्मबुद्धिप्रकाशं**
**संसारार्तः शरणमधुना पार्वतीशं प्रपद्ये ॥ १६ ॥**

**य इति। यः**; ईशः, **पूर्वं** सृष्टेः पुरा निखिलजगताम् **स्रष्टारम्**; विधिम्, **निर्ममे**; सृष्टवानित्यर्थः। ननु—विष्णोर्नाभिकमलाद् विधिः बभूव। तस्य फालदेशाद् रुद्रः उदभूत् इति **भागवते** दृश्यते। कथम् अकाण्डे रुद्राद् विधिसृष्टिरिति चेत्; उच्यते—प्रकृतिः, विकृतिरिति सृष्टिः द्विविधा; तत्र प्रकृतिसृष्टिः श्रुति-प्रसिद्धा; "आत्मा वा इदमेक एवाग्र आसीत्, नान्यत् किं च न मिषत्", "स ईक्षत लोकान्नु सृजा" इति,[1] "आत्मन आकाशः संभूतः", "सदेव सोम्येदमग्र आसीत्", "एकमेवाद्वितीयं ब्रह्म", "तदैक्षत बहु स्याम्", "सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते, सर्वाणि चेन्द्रियाणि च, सह भूतैः न कारणं कारणानां धाता, कारणं तु ध्येयः" इति;

"सोमः पवते जनिता मतीनां
जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य
जनितेन्द्रस्य जनितोत विष्णोः ॥"

---

१ आत्मा वा इदमिति। अनात्मतत्कार्यापह्नवसिद्धोऽयमात्मा "अज आत्मा महान् ध्रुवः" इति श्रुतेः वैशब्दः कालत्रयेऽपि निष्प्रतियोगिकत्वद्योतकः, "आत्मतोऽन्यन्न किं चन" इति श्रुतेः। आत्मातिरेकेण जगतः सत्त्वात् निष्प्रतियौगिकत्वं कुतः? इत्याशङ्क्य परमार्थदृष्ट्या आत्मा निष्प्रतियोगिक एव। तथापि स्वाज्ञदृष्टिविकल्पितनामरूप-कर्मात्मकमिदं जगदग्रे सृष्टेः प्राक् तत् स्थितिप्रलययोरपि स्वज्ञादृष्ट्या आत्मैक आसीत्।

एक एवाग्र आसीत् इत्युक्त्या ततो नास्तीति द्योत्य इत्यत्र उत्पत्तेः प्राग् अव्याकृतनामरूपभेदात्मभूतात्मैकत्व-शब्दप्रत्ययगोचरमिदं जगत्। इदानीं तु व्याकृतनामरूपभेदवदनेकप्रत्ययगोचरमात्मैकत्वशब्दप्रत्ययगोचरं चेति विशेषः। यथा फेनादिव्याकरणात् प्राक् फेनादिकं सलिलैक शब्दप्रत्ययगोचरं यदा सलिलात् पृथक्त्वेन फेनं सलिलं चेति व्यवह्रीयते। वस्तुतः फेनादिकं जलमात्रम्। तद्वत् फेनस्थानीयजगत् सत्त्वासत्त्वाभ्याम् आत्ममात्रम्। तदतिरेकेण नान्यत् किं चिदपि मिषत् व्यापारवत् नास्त्येव। "मद्व्यतिरिक्तमणुमात्रं न विद्यते" इति श्रुतेः। तथापि स्वाज्ञविकल्पितमूलाविद्याबीज-शावष्टम्भत. सर्वज्ञेशो भूत्वा स ईक्षत प्राणिकर्मफलभोगस्थानभूतान् लोकान् नु सृजेयम् इत्येवम् आलोचनं कृतवान् इति।

इति,

" यो देवानां प्रथमं पुरस्तात्
विश्वाधिको रुद्रो महर्षिः ।
हिरण्यगर्भं जनयामास पूर्वं
. . . . . . . . . . . ॥ "

इति,

" वामाङ्गादसृजद् विष्णुं दक्षिणाङ्गात् प्रजापतिम् ।
मध्यतो रुद्रमीशानं त्रीन् पुत्रानसृजच्छिवः ॥ "

इति च **सनत्कुमारसूक्तेः** । परमेश्वरादेव रुद्रविष्ण्वादि चेतनम्, महदादिशून्यपर्यन्ताचेतनं च उत्पद्यते । प्रकृतिसृष्टिरियमेव ।

विकृतिस्तु—परमेश्वरपारमेश्वरशापानुग्रहाभ्यां विश्वामित्रादेरिव विष्ण्वादेरितरस्यापि स्रष्टृत्वं स्रष्टव्यत्वं वा भवतु नाम । अवान्तरकाले विधिविष्णू परस्परजिगीषया तपसा शिवमाराध्य परस्परं जनयामासतुः । विधेः विष्णुनाभिसमुत्पत्तिप्रकारस्तु **ब्रह्माण्डलैङ्गपुराणयोरेवं** दृश्यते ; तत्र तु हरिं प्रति देववचनम्—

" उमाया स हरिः साक्षाद् यो हरिः सा शिवा स्मृता ।
प्रकृतिस्त्वं पुमान् रुद्रस्त्वयि तद्वीर्यमाहितम् ॥
त्वन्नाभिपङ्कजाज्जातः पञ्चवक्त्रैः पितामहः । "

इति; इयं विकृतिसृष्टिरित्यर्थः ।

एवं रुद्राविर्भावः **शिवपुराणे**ऽप्युक्तम् ; सृष्टिसामर्थ्यसिद्धये तपस्यतो विधेः ललाटादाविर्भावः कथ्यते—

" ललाटे चिन्तयन् ब्रह्मा तपस्युग्रे व्यवस्थितः ।
तल्ललाटादभूच्छंभुः सृष्ट्यर्थं तन्न दूषणम् ॥ "

इति । न दूषणमिति वचनस्य तात्पर्यमित्थम्---यथा दाशरथिवासुदेवादीनां पुरुषवीर्यसंसर्गमातृगर्भवासविहीन-सुषिरनिर्गमनादिवत् दोषाभावात् विशुद्धाध्यात्मा विमुक्तदेशात् स्तम्भनरहरिवद् आविर्भावमात्रात् न किमपि दूषणमिति भावः ।

यश्च परमेश्वरः तस्मै स्वसृष्टाय ब्रह्मणे सकलान् वेदान् पुराणैः साकम्, चकारात् सर्वतन्त्रैः सहेत्यर्थः । **अदित** अदिशत् । संसारार्तः **असौ आद्यं** पार्वतीशम् आद्यं **गुरुम्** ; परमेश्वरस्य सर्वान् प्रति आदिगुरुत्वं

प्रसिद्धम् । **श्रीपतञ्जलिनापि** सूत्रितम्—"सर्वेषामपि गुरुः कालेनानवच्छेदात्" इति[१] । तथा **शिवपुराणे** च—

"प्रतिसर्गं प्रसूतानां ब्रह्मणां शास्त्रविस्तरम् ।
उपदेष्टा स एवासीत् कालावच्छेदवर्तिना ॥
कालावच्छेदयुक्तानां गुरूणामप्यसौ गुरुः ।"

इति । **यज्ञवैभवखण्डे** गुरुपारंपर्यकथने

"यः शिवः सर्वभूतानामीश्वरः स्वत एव तु ।
ईशानः सर्वविद्यानां स एवादिर्गुरुर्बुधाः ॥
तस्य शिष्यो महाविष्णुः सर्वज्ञानमहोदधिः ।
तस्मादात्तपरिज्ञानो ब्रह्म सर्वजगत्पतिः ॥
सनत्कुमारो भगवान् ब्रह्मणः श्रुतवेदनः ।
सनत्कुमारात् सर्वज्ञात् कृष्णद्वैपायनो मुनिः ॥
अवाप्ताखिलविज्ञानस्तस्मादेतच्छ्रुतं मया ।"

यः स्रष्टारं निखिलजगतां निर्ममे पूर्वमीशः
तस्मै वेदानदित सकलान् यश्च साकं पुराणैः ।
तं त्वामाद्यं गुरुमहमसावात्मबुद्धिप्रकाशं
संसारार्तः शरणमधुना पार्वतीशं प्रपद्ये ॥

इति । तस्माद् आद्यगुरुः परमेश्वर एव । पाश्चात्यगुरुपरंपरा भिन्ना च दृश्यते ;

"ब्रह्मा देवानां प्रथमः संबभूव
विश्वस्य कर्ता भुवनस्य गोप्ता ।"

इति । "भृगुर्वै वारुणिः" "अथ हैनं पैप्पलादोऽङ्गिराः सनत्कुमारश्च" इति तस्मात् आद्यं गुरुम् आत्मबुद्धि-प्रकाशमानं तं प्रसिद्धं त्वां शरणं रक्षकं प्रपद्ये । अत्र सकलजगत्स्रष्टुः वेदविद्याप्रदानेन आद्यगुरुत्वेन, आत्मबुद्धि-प्रकाशत्वेन, ब्रह्मविद्यायाः पार्वत्याः पतित्वेन च, निहीनोऽपि अहं त्वदनुग्रहमात्रात् मुक्तो भवेयमिति भावः ।

अन्वयः—य ईशः सकलजगतां स्रष्टारं पूर्वं निर्ममे ; यश्च तस्मै निखिलान् वेदान् पुराणादिभिः साकम् अदित । संसारार्तः असौ अहं पार्वतीशम् आत्मबुद्धिप्रकाशम् आद्यं गुरुं तं त्वाम् अधुना शरणं प्रपद्ये । अत्र **परिकराङ्कुरालंकारः** । तल्लक्षणं तु—"साभिप्राये विशेष्ये तु भवेत् परिकराङ्कुरः" इति ॥ १६ ॥

---

१ ये सर्गादौ अत्पन्नाः पूर्वे ब्रह्मादयः, ते मासर्त्वयनहायनादिरूपेण कालेन परिच्छिद्यन्ते । तदुक्तम्—

"ये रम्या ये शुभाचाराः सुमेरुगुरवोऽपि ये ।
कालेन विनिगीर्यन्ते गरुडेन पन्नगाः ॥"

इति । अतः तेषामपि भगवान् एक एव गुरुः ईश्वरः, कालेनानवच्छेदात् ; "ज्ञः कालकालः" इति श्रुतेः । अनेन ईश्वरस्य महाप्रभावत्वमुक्तं भवति ।

न हि मादृशेनेव मोहपाशादुन्मुच्य रक्षसीति, किं तु ब्रह्मविष्ण्वादीन् सर्वान् पाशानपि पाशेन बध्व स्वकार्यं कारयित्वा, अचिरेण पाशान् मोचयित्वा पासीत्याह—

**ब्रह्मादीन् यः स्मरहर पशून् मोहपाशेन बध्वा**
**सर्वानेकश्चिदचिदधिकः कारयित्वात्मकृत्यम्**[१] ।
**यश्चैतेषु स्वपदशरणान् विद्यया मोचयित्वा** [२]
**सान्द्रानन्दं गमयति परं धाम तं त्वां प्रपद्ये ॥ १७ ॥**

**ब्रह्मादीनिति** । हे **स्मरहर**! **चिदचिदधिकः ; चित् ज्ञनं, तद्वन्तः** चेतनाः, **अचित्** अज्ञानम्, महदादिशून्यान्तजडम्, तदुभयविधस्य जगतोऽपि अधिकः । " विश्वाधिको रुद्रो महर्षिः," " एक एव रुद्रो न द्वितीयाय तस्थुः,"[३] " सोऽब्रवीद् अहमेकः प्रथममासम्, वर्तामि च भविष्यामि, नान्यः कश्चन मत्तो व्यतिरिक्तः " इत्यादि**श्रुतिभ्यः** प्रातिभासिकस्य सर्वस्य श्रीरुद्रः अधिष्ठानमात्रः, पारमार्थिक इति भावः ।

एवं **चिदचदधिकः एकः** ; मुख्यार्थः केवल इत्यर्थः । **यः**, ब्रह्मविष्णू शक्रप्रभृतीन् सर्वान् **पशून्** ; " एषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम् " इति **श्रुत्या** स्वेतरान् द्विपाद् चतुष्पात् पशून् सर्वान् अविशेषेण पश्यन्ते बध्यन्ते अनेनेति पाशः ; मोह एव पाशः, तेन **बध्वा** स्ववशान् कृत्वा, पुनः तान् **आत्मकृत्यं** कारयित्वा आत्मनः स्वस्य कृत्यम् उपासारूपं **कारयित्वा**।

यद्वा—आत्मनां तेषां कृत्यं तत्तद्वर्णाश्रमविहितधर्मान् कारयित्वा, **यश्च एतेषु** पशुषु **स्वपदशरणान्** अनन्यमनसा शिवैकशरणान्, अत एव निर्लज्जं निर्भयं भस्मसंपादनतन्निष्ठापरान् आशिरः पादम् अच्छाच्छभसितभास्वरान् निजभक्तान् **विद्यया** शिवज्ञानदानेन **मोचयित्वा** मोहबन्धात् उन्मुच्य सान्द्रः संपूर्ण आनन्दः **सान्द्रानन्दम्** , **परम्** निरतिशयं **धाम** स्वरूपं गमयति अवगमयति ।

अथ वा— आनन्देति चतुर्थश्लोकनिगदितसकलभुवनातीतपरशिवलोकं वा गमयति प्रापयति । एवं पशुपाशपतिलक्षणानि उच्यन्ते । **जाबाल्युपनिषदि**—

" कथं जीवाः पशव इति ? कथं तत्पतिरिति ? स तमुवाच यथा तृणाशिनो विवेकहीनाः परप्रेष्याः कृष्यादिकर्मसु नियुक्ताः सकलदुःखभराः, स्वस्वामिबध्यमाना गवादयः पशवः । यथा तत्स्वामिन इव सर्वज्ञ ईशः पशुपतिः । तज्ज्ञानं केनोपायेन जायते । पुनः स तमुवाच विभूतिधारणादेव ", तथा च **श्रुत्यन्तरे,** च—

१ कारयत्यात्मतुल्यम् इत्यान्ध्रदेशे मुद्रितकोशे ।

२ योजयित्वा इत्यपि पाठो दृश्यते ।

३ एक इति स्वातिरिक्तरुगूद्रावकः, रुद्र एक एव, तस्य निष्प्रतियोगिकत्वेन अद्वैतरूपत्वात् । तदतिरिक्तस्वाविद्यापदतत्कार्याणि न कदाचिदपि द्वितीयाय तस्थुः स्थितवन्तः, तेषाम् आविद्यकत्वेन कारणतुल्यत्वात् इति ।

"तेषामसुराणां तिस्रः पुर आसन्" इत्यारभ्य, अनन्यसाध्यं पुरत्रयं जित्वा जगद्रक्षणात् पशुपतिः त्वमेव; वयं सर्वे पशवः इत्यङ्गीचक्रुः सुराः । **शैवपुराणे**—

"स्वतः सिद्धं पतित्वं मे युष्माकं पशुतापि च ।
तदेव दर्शयाम्यद्य पणबन्धविनोदतः ॥"

इति । **भारते**ऽपि—

"आत्मनः पशवः प्रोक्ताः सर्वे संसारवर्तिनः ।
तेषां पतित्वात् देवेशः शिवः पशुपतिः स्मृतः ॥"

इति; **कर्णपर्वणि** च—

"पतित्वं चापि मे लोकाः सर्वे कल्प्यन्तु पीडिताः ।
पशूनां वः पतिश्चाहं भविष्यामि सुरोत्तमाः ॥
इति देवा वचः श्रुत्वा देवदेवस्य शूलिनः ।
विषादमगमन् सर्वे पशुत्वं प्रति शङ्किताः ॥"

इत्येवमादिप्रमाणैः परमेश्वरस्य पतित्वं, तदन्यस्य सर्वस्य पशुत्वं च सिद्धवत्कृत्य मोहपाशेन तान् बध्वा आत्मकृत्यं कारयित्वा च तेषु प्रपन्नान् विद्यया मोचयित्वा सान्द्रानन्दं परं धाम प्रत्यगात्माभिन्नब्रह्मस्वरूपं गमयति अवगमयतीति भावः ।

अन्वयः—हे स्मरहर ! चिदचिदधिकः य एकः सन् ब्रह्मादीन् सर्वान् पशून् मोहपाशेन बध्वा, तान् आत्मकृत्यं कारयित्वा, यश्च एतेषु त्वत्पदशरणान् विद्यया मोचयित्वा; सान्द्रानन्दं परं धाम यो गमयति, तं त्वां प्रपद्ये । अत्र चतुर्थचरणः भवत्प्रपदनं प्रति पुरोक्तानां हेतुत्वात् **काव्यलिङ्गं** वा अलंकारः । तल्लक्षणं तु—"समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनन्" इति[1] ॥ १७ ॥

ननु—अमर्त्या बहवः सन्ति, तान् व्युदस्य कथं मामेव शरणं वृणीषे इत्यत्राह—

**भक्ताग्र्याणां कथमपि परैर्योऽचिकित्स्याममर्त्यैः**
**संसाराख्यां शमयति रुजं स्वात्मबोधौषधेन ।**
**तं सर्वाधीश्वर भवमहादीर्घतीव्रामयेन**
**क्लिष्टोऽहं त्वां वरद शरणं यामि संसारवैद्यम् ॥ १८ ॥**

---

१ °लिङ्गमुदाहृतम् इति मुद्रितकोशे.

**भक्ताग्र्याणामिति** । हे **सर्वाधीश्वर** ! सर्वेभ्यो हि उपरि ईश्वर ! निग्रहानुग्रहविचक्षण ! **भक्ताग्र्याणाम्** ; महाशिवभक्तानाम् अग्रे भवन्तीति भक्ताग्राः, तेषाम् , **परैः** ; अन्यै, अशिवैः । यद्वा—परैः श्रेष्ठैः देवानां मध्ये प्रसिद्धैरिति वा ; यथाकथंचित् ईश्वरैः अन्यैः अनीश्वरैः इत्यर्थः । तैः, **अचिकित्स्याम्** ; चिकित्सया रोगं निवर्तयितुमशक्याम् । **संसाराख्याम् रुजम्** ; यस्तु **आत्मबोधौषधेन** ; शिवज्ञनमहौषधदानेन ; **शमयति** ; समूलमुन्मूलयति ।

**हे वरद ; भवभयमहादीर्घतीव्रामयेन** ; भवतीति भवः संसारः, स एव महान् दीर्घः तीव्रश्च आमयः यस्य सः । आ मीनातीति आमयः ; "मीञ् हिंसायाम्" इति **धातुः** । तद्विशिष्टे अस्मिन् देहादौ । **क्लिष्टः अहम् संसारवैद्यम्** ; विद्याम् आयुर्वेदः स्वयं च वेदेति, परांश्च वेदयति च संसारवैद्यः **तम्** । **श्रुतिश्च**---
"अध्यवोचदधि वक्ता प्रथमो दैव्यो भिषक्" इति ;

"मा त्वा रुद्र चुक्रुधा मा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीराꣳ अर्पय भेषजेभिर्भिषक्तमं त्वां भिषजां शृणोमि ॥"[१]

इति च । तस्मात् संसारवैद्यं त्वामेव शरणं यामीत्यर्थः ।

अयं भावः —इतराचिकित्स्यदीर्घतीव्रमहाभवरोगक्लिष्टोऽहं साक्षात् संसारचिकित्सकं त्वां विना कमन्यं भवपीडितं देवं शरणं यास्यामीति भावः । तथा च **श्रीमद्दीक्षितेन्द्रैः**—

"घोरं भवमपहन्तुं किंचिदघोरं भवं प्रपद्ये ।
संसरणकातराणां संसरणिः शांभवी भक्तिः ॥" वैराग्यशतकम् ८२ ॥

इति । **श्रीभगवत्पादाश्च**—

"जननमृतियुतानां सेवया देवतानां
न भवति सुखलेशः संशयो नास्ति तत्र ।
अजनिममृतरूपं साम्बमीशं भजन्तं
य इह परमसौख्यं ते हि धन्या लभन्ते ॥" शिवानन्दलहरी ८३ ॥

इति **शिवानन्दलहर्यामाहुः** । तस्मात् संसृतिरोगम् आशु प्रशमयेत्यर्थः ॥ १८ ॥

---

१ हे इन्द्र त्वा त्वाम्, नमोभिः अयथाक्रियमाणैः नमस्कारैः ; हविर्भिर्वा मा चुक्रुधाम; मा क्रोधयाम, क्रुद्धं मा कार्ष्म । "क्रुध कोपे" अस्मात् ण्यन्तात् लुङि चङि रूपम् । हे वृषभ ! कामानां वर्षित ; दुष्टुती, दुःस्तुत्या अशोभनया स्तुत्या मा चुक्रुधाम इत्येव । तथा सहूती, सहूत्या विसदृशैः अन्यैः देवैः सह आह्वानेन मा क्रोधयाम । श्रेष्ठो हि स्वस्मात् न्यूनेन सह आह्वाने क्रुद्धो भवति । स त्वं नः अस्माकं वीरान् पुत्रान् भेषजेभिः त्वदीयैः भेषजैः औषधैः उत् अर्पय, उत्कृष्टं संयोजय । हे रुद्र त्वा त्वाम्, भिषजां चिकित्साभिज्ञानां मध्ये भिषक्तमम् अतिशयेन भैषज्यस्य कर्तारं शृणोमि । "प्रथमो दैव्यो भिषक्" इति मन्त्रान्तरेऽप्युक्तम्" इति सायणाचार्यः ।

**ध्यातो यत्नाद् [1]विजितकरणैर्योगिभिर्यो विमृग्य-[2]**
**स्तेभ्यः प्राणोत्क्रमणसमये संनिधायात्मनैव ।**
**तद्व्याचष्टे भवभयहरं तारकं ब्रह्म देव-**
**स्तं सेवेऽहं गिरिश सततं ब्रह्मविद्यागुरुं त्वाम् ॥ १९ ॥**

ध्यात इति । **हे गिरिश ! विजितकरणैः;** विजितानि करणानि स्वभावात् पराङ्मुखानि यैः, तैः **योगिभिः;** शिवतत्त्वावाप्त्युपायभूतध्यानयोगः येषामस्तीति तथोक्तैः योगिभिः **विमृग्यः;** मृगयितुम् अन्वेष्टुं योग्यः । **यत्नात्;** अभ्यासात्, **ध्यातश्च** । "तत्र प्रत्ययैकतानता ध्यानम्" इति **पातञ्जलसूत्रात्** संततम् अनन्यवृत्त्या धिया ध्यातश्च, भवतीति शेषः । यश्च देवः **तेभ्यः;** योगिभ्यः, **प्राणोत्क्रमणसमये;** मुख्यप्राणस्य उत्क्रमणम् उत्क्रान्तिः, शरीरात् ऊर्ध्वगतिः । तत्समये **आत्मनैव;** स्वेनैव संनिधाय, आत्मनैवेति अवधारणात् यथा दक्षिणदेशवैषम्यसमीकरणार्थं स्वसमानं कुम्भजमुनिम्; महाविषहरणाय सुन्दरदासं वा प्रास्थापयदीश्वरः; तथा तारकोपदेशाय यं कंचित् प्राहिणोदिति, न; किं तु अप्राकृतनिष्कलस्वरूपेणैवेत्यर्थः । **संनिधाय;** साक्षात्कृत्य, **भवभयहरम्;** संसारभीतिनिवर्तकम् । अतश्च, **तारकम्;** "गर्भजन्मजरामरणसंसारमहद्भयात् तारयतीति तस्मादुच्यते तार(क)म्" इति **अथर्वशीर्ष**निर्वचनात् तारकम् प्रसिद्धं **ब्रह्म** अखण्डात्मचैतन्यम्, **व्याचष्टे;** विस्पष्टम् उपदिशति । उपदिश्य पशून् भवदुःखात् मोचयतीत्यर्थः । **अहम्;** तमेव, **ब्रह्मविद्यागुरुं त्वां सेवे;** भजामीत्यर्थः ।

आत्मना एव इत्येवकारस्वारस्यमेवमूह्यम्—मरणसमये योगिनामेव ब्रह्मनाडीमार्गेण आत्मानं ब्रह्मरन्ध्रं नीत्वा, ब्रह्मादिभुवनानि गन्तुं पुनरागन्तुं वा; तत्र द्वादशान्तपदे स्वात्मानं निरुध्य, निरंशध्यानयोगं काष्ठपाषाणवत् कर्तुं लिङ्गशरीरं तप्तायःपिण्डनिक्षिप्तजलबिन्दुवत् समाप्य, घटाकाशमहाकाशवत् अखण्डसच्चिदानन्दरूपम् अवाप्तुं च शक्नोति । यत्नात् ध्यातॄणां मरणकाले सर्वप्राणानां पारवश्यात् शिवध्याने शिवाह्वाने, शिवपूजने, शिवस्तोत्रे वाप्यधिकाराभावात् कृतध्यानानाम् अस्माकं विनष्टिरेव भवेद्वा इति तद्भीतिनिवारणाय सर्वज्ञः कृपानिधिः कृतज्ञश्च परमेश्वरः केनापि अनाहूत एव सन् स्वात्मनैव संनिधाय तारकं ब्रह्म व्याचष्टे इति भावः ।

"ज्ञानप्रसादेन विशुद्धसत्त्व-
स्ततस्तु तं पश्यते निष्कलं ध्यायमानः"[3]

---

१. निशितकरणैः इति पाठान्तरम्        २. विमुक्त्यै; विमुक्तैः इति च पाठान्तरम्

३ ज्ञानेति । सर्वप्राण्यन्तःकरणाविद्यातुर्यभागत्वेन यन्निष्पन्नं तद्धि ज्ञानं ब्रह्मदर्शनहेतुत्वेन प्रसिद्धम् । तूला-विद्यास्थूलादिभागत्रयावृतदृष्टीनां न हि तज्ज्ञानप्रसादो भवति । ततः संनिहितमपि आत्मतत्त्वं न हि प्रकाशते । नित्यादिकर्मतयोपयोगफलार्पणसंतुष्टेश्वरप्रसादतः स्थूलास्थूलादिभागत्रयावृतौ निष्पन्नायां, अथ ज्ञानप्रसादो भवति । ततः विशुद्धान्तःकरणत्वहेतोः प्राणादिनामान्तषोडशकलापह्नपसिद्धं निष्कलं स्वावशेषधिया ध्येयमात्मानं स्वमात्रमिति पश्यति विशुद्धसत्त्वोऽयमात्मानं पश्यति ससाधनम् इत्यस्य मन्त्रस्यार्थः ।

"आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासाद् देवं पश्येन्निगूढवत् ॥"[१]

इत्यादिश्रुतेश्च । **मुक्तिखण्डे**—'यत्र कुत्रापि निहीनदेशे स्थितानामपि उपासाकानां विशिष्टशिवस्थानेषु यथेच्छं निवसतां च शंभुः तारकमन्ते उपदेक्ष्यति' इति दृश्यते । तदुक्तम्—

"यानि कर्माणि बाह्यानि मरणादूर्ध्वमच्युत ॥
मम ज्ञानप्रदानीति कथितानि मया तव ।
तानि कल्याणवृत्तस्य विद्धि नान्यस्य कस्यचित् ॥
पापिष्ठानामपि श्रद्धाविहीनानां जनार्दन ।
मुक्तिदं मरणादूर्ध्वं शिवक्षेत्रेषु वर्तनम् ॥
पुरा कोलाहलो नाम वृषलो विधिचोदितः ।
कामेन पीडितः स्वस्य पितरं पङ्कजेक्षण ॥
हत्वा मातरमादाय गत्वा मोहेन केशव ।
वेदारण्ये यथाकामं चरित्वा मरणं गतः ॥
तत्र वर्तनमात्रेण स पुनः पुरुषाधमः ।
प्रणष्टपापः शुद्धात्मा वेदारण्यपतेर्मम ॥
प्रसादादेव वेदान्तज्ञानं लब्ध्वा मृतोऽभवत् ॥"

इति । तस्मात् श्रद्धया ध्यानवतां निष्कामानां विशुद्धानां तत्तच्छिवक्षेत्रमाने शिवप्रसादं विश्वस्य स्वच्छन्दं निवसतामपि ईश्वरः तारकपूर्वकं मुक्तिं ददात्येवेति भावः । तस्मात् अन्यत्र वशीकृतमनसां ध्यायिनामेव शिवज्ञानं भवेत् शिवस्थान-वसिनां स्वैराचार एव शिवार्चापि भवतीति भावः ।

अन्वयस्तु—हे ! गिरिश विजितकरणैः योगिभिः यत्नात् ध्यातः विमृग्यश्च, यो देवः तेभ्यः प्राणोत्क्रमणसमये आत्मना एव संनिधाय भवभयहरं तारकं तद् ब्रह्म व्याचष्टे । अहं तं देवं ब्रह्मविद्यागुरुं त्वामेव सेवे ॥१९॥

हे देव ! पुनः पुनरुक्तार्थमेव विज्ञापयितुं लज्जीभूये ; तस्मात् कारुण्यादेव मां पाहीत्याह—

**दासोऽस्मीति त्वयि शिव मया नित्यसिद्धं निवेद्यं**
**जानास्येतत् त्वमपि यदहं निर्गतिः संभ्रमामि ।**

---

१ आत्मानमिति । आत्मानम् अन्तःकरणम्, अधरारणिं कृत्वा, प्रणवम् उत्तरारणिं च कृत्वा, सर्वापवादाधिष्ठान-ब्रह्मास्मीति वेदान्तविचारजं ज्ञानं युक्तिभिरनुचिन्तनं, तन्निर्मथनम् अभ्यासः, तस्मात् ज्ञाननिर्मथनाभ्यसात् पण्डितो विद्वान् स्वाज्ञानपाशं दहति भस्मीकरोतीत्यर्थः ।

**नास्त्येवान्यन्मम किमपि ते नाथ विज्ञापनीयं**
**कारुण्यान्मे शरणवरणं दीनवृत्तेर्गृहाण ॥ २० ॥**

**दासोऽस्मीति** ! हे **शिव** । स्वप्रकाश ! **त्वयि** ; त्वत्संनिधौ, **निर्गतिः अहं दासः अस्मि** । त्वं मत्स्वामीति च, **नित्यसिद्धम्** ; चिरकालसिद्धमेव तात्पर्यं, **मया निवेद्यम्** ; निवेदयितुं योग्यं भवति, नित्यसिद्धत्वात् **तत् जानास्येव** । मामयं रक्षिष्यति अन्यो वेति नानागोपुरशिखराग्राश्वत्थपीठविशेषेषु सर्वतः कृताञ्जलिः **संभ्रमामि** इति, **एतदपि** जानास्येव । पाशबद्धपक्षिवत् उड्डीयोड्डीय परितोऽटित्वा पतितः, पुनः पुनः बद्धस्तम्भवत् त्वामेव अगतिः **शरणं** वृणोमीति एतदपि जानासि । हे **नाथ** ! **मम** विज्ञापनीयं **किमपि अन्यत्** नास्ति । बद्धस्य परतन्त्रस्य पशोः तत्ताङ्कने अङ्गकम्पवत् परितोटवत् न दोषाय भवेदिति च जानासि । तस्मात् **दीनवृत्तेः मम** शरणं शरणप्रदानरूपानुग्रहं कारुण्यादेव स्वीकुरुष्व गृहाणेत्यर्थः । हे **नाथ** ! अनवगतार्थविज्ञापनस्य अनवकाशाद् विदितार्थयाच्ञायाः पञ्चवितोक्त्या च करुणया केवलं रक्षणीयोऽयमिति स्मरेति प्रार्थना ।

ननु—दासोऽस्मीति त्वयि शिव मया नित्यसिद्धं निवेद्यमिति यदुक्तम्, नैतत् युज्यते । पशुपतिपाशभेदा नित्या एवेति **शैवागमाः** । **श्रीमद्दीक्षितचरणः** वैदिकसार्वभौम इति प्रसिद्धिश्चास्ते । तेन नाद्वैतभङ्गवादः कार्य इति चेत्, न; पारमार्थिकमद्वैतं न कदापि भज्यते । तथापि विज्ञानात्मन एव देहाद्युपाधिसंपर्कवशात् कलुषीभूतस्य ध्यानादिसाधनानुष्ठानात् संप्रसन्नस्य देहादिसंघातात् क्रमिष्यतः परमात्मनैक्योपपत्तेः । "अनेन जीवेनात्मनानु प्रविश्य" इति **श्रुतेः** । "एष संप्रसादोऽस्मात् शरीरात् परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इति च । "यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय" इति दृष्टान्त**श्रुतेश्च** व्यावहारिकभेदाभेदौ वर्तेते एव ।

परमार्थतस्तु—श्रुतौ तेजःप्रभृति पदार्थसृष्टिकथने अन्यत्र वा जीवसृष्टिश्रवणाभावात् जीवो नित्यः परमात्मैव नैव भिद्यते, तदादावेव मूर्खस्यास्य जगतस्त्वमेव शिव इति परमाद्वैतोपदेशेन सद्यः कर्मोपासनज्ञानकाण्डत्रयबहिष्कृतोऽधः पतेदेव । तस्मात् क्रमेण गन्तव्यो मार्गः कविना प्रदर्शित इति सर्वं समञ्जसम् ॥ २० ॥

पुनरपि स्वस्य रक्षणं प्रार्थयते—

**ब्रह्मोपेन्द्रप्रभृतिभिरपि स्वेप्सितप्रार्थनाय**
**स्वामिन्नग्रे चिरमवसरस्तोषयद्भिः प्रतीक्ष्यः ।**
**द्रागेव त्वां यदिह शरणं प्रार्थये कीटकल्प-**
**स्तद्विश्वाधीश्वर तव कृपामेव विश्वस्य दीने ॥ २१ ॥**

**ब्रह्मोपेन्द्रेति** । हे **विश्वाधीश्वर** ! विशति सर्वम् अस्मिन्निति विश्वम्, तस्य सर्वस्य अधीश्वर ! स्वामिन् । **तोषयद्भिः** ; स्तुतिभिः संतोषयद्भिः । **ब्रह्मोपेन्द्रप्रभृतिभिः** ; विधिविष्णुशक्रमुखैरपि **स्वेप्सितप्रार्थनाय** ; स्वस्य स्वस्य ईप्सितानि स्वेप्सितानि ब्रह्मणः पुनः पुनः सृष्टिसामर्थ्यसिद्धये ; विष्णोः दुर्वासोमुनिशापप्रच्छन्नायाः बृन्दासक्तपति-

कुपिताया लक्ष्म्याः पुनरवाप्तिवाञ्छया शक्रस्य वृत्रादिशत्रुवधार्थम्, **वरुणादेः** शापादिनिवृत्त्यर्थं च स्वेप्सितप्रार्थनाय तोषयद्भिः संस्तुवद्भिः, तव **अग्रे,** श्रीकैलासदक्षिणकैलासश्रीवाञ्छस्थानकोणेषु दूरतः स्थित्वा; **चिरम् अवसरः,** त्वत्प्रसादसमयः कदा भवेत्? इति। कदा वा प्रमथामार्गे मह्यं प्रसीदेयुः। शुभशंसिश्रीशैलादिविलोचनापाङ्गोऽस्मासु कदा वा निपतेदिति। परमेश्वरस्य भुवनविहारः कदा भविष्यतीति च समयः प्रतीक्ष्यः सत्येवं **कीटकल्पः** कीटसमानः अहम् इह भवदुःखविषये तथाभूतं **त्वां द्राक्** क्षिप्रमेव **शरणं** रक्षणलक्षणं प्रार्थये इति **यत्**; तत्; **तव, कृपाम्**; दयाम्, **दीन एव** इति **विश्वस्य** विस्रम्भं कृत्वा तथा प्रार्थये इति भावः॥ २१॥

**कर्मज्ञानप्रचयमखिलं दुष्करं नाथ पश्यन्**
**पापासक्तं हृदयमपि चापारयन् संनिरोद्धुम्।**
**संसाराख्ये पुरहर महत्यन्धकूपे विषीदन्**
**[1]हस्तालम्बप्रपतनमिदं प्राप्य ते निर्भयोऽस्मि॥ २२॥**

**कर्मज्ञानेति।** हे नाथ! त्वदनुग्रहाय कर्म, योगः, ज्ञानं वा समभ्यसनीयम्। तत्कर्मज्ञानादिसंदोहम् **अखिलं दुष्करम्,** दुःखेनापि कर्तुम् अशक्यं **पश्यन्** अस्मि। किं च **पापासक्तम्**; पापेषु दुष्कर्मसु, आसक्तम् **हृदयम् अपि**; मनः, **संनिरोद्धुम्** अन्तरेव सदा स्थापयितुं **च अपारयन्** अशक्नुवानः **अस्मि**। हे **पुरहर! संसाराख्ये,** संसारः, स इत्याख्या यस्य तस्मिन् **अन्धकूपे**; कुत्सिता आपः अस्मिन्निति कूपः, तस्मिन्, अन्धत्वविशेषणेन अतीव निम्नदेशः, कर्दमकण्टकवल्लीसंच्छन्नः शब्दप्रतिशब्दाद्यनवकाशदोषयुक्ताधोदेशश्च यस्य तस्मिन्। **संसाराख्ये** अन्धकूपे, केनापि हेतुना निपतितः भवेत्। माम् एवंविधं नागरिकः को वा जानन्, कदा वा उद्धरिष्यतीति **विषीदन्** इव आसम्।

अथ तादृशोऽहं केनापि पुण्यवशेन अद्य ते **हस्तालम्बप्रपतनम् इदम्**; हस्तालम्बः अवलम्बसाधनहस्तः, तस्य प्रपतनम्, जलाहरणरज्जुवत् अधो निःसृतं हृदयदेशविभासमानम् त्वत्स्वरूपसक्षात्काररूपम् इदं प्राप्य, इदमिति स्वानुभवरीतिमभिनीय दर्शयन्नाह—ते हस्तालम्बप्रपतनमिदं प्राय निर्भयोऽस्मीति भावः। कथंचित् मम दासः संसारान्धकूपे पतित्वा चिरं विषीदति, तस्य गत्यन्तराभावात् मम हस्तालम्बनात्मकं संशयविपर्यासरहितं चिदानन्दरूपोऽहमस्मि इत्यनुभवरूपमिदं शिवभजनं प्राप्य समुत्तीर्णो भवेदिति यस्मात् मयि दया अद्य जाता, तस्मात् निर्भयः अस्मि इति भावः। **रूपकालंकारः**; तल्लक्षणं तु—

"विषय्यभेदताद्रूप्यं रञ्जन[2] विषयस्य यत्।
रूपकं तत् ... ... ... ॥"

इति॥ २२॥

---

१ हस्तालम्बमित्यपि पाठः   २ ताद्रूप्यरञ्जनमिति मुद्रितकोशे

यद्यपि हृदयारविन्दे अकस्मात् सच्चिदानन्दपरमशिवः साक्षात्कृत एव; "अधीहि भगवो ब्रह्म" इत्यादिवेदमर्यादां विनैव तूष्णीं स्थितस्य ममापि शिवसाक्षात्कारोऽद्भुत एवासीत्; तथापि तद्दार्ढ्याय मद्विस्रम्भाय च श्रीमूलगुरुदीक्षया अनुग्रहो लब्धव्य इति देवं स्तौति—

**त्वामेवैकं हतजनिपथे पान्थमस्मिन् प्रपश्चे**
**मत्वा, जन्मप्रचयजलधेर्बिभ्यतः पारशून्यात् ।**
**यत्ते धन्याः सुरवर मुखं दक्षिणं संश्रयन्ति**
**क्लिष्टं घोरे चिरमिह भवे तेन मां पाहि नित्यम् ॥ २३ ॥**

**त्वामिति ।** **हे सुरवर !** देवशिखामणे ! **हतजनिपथे**; अतिकष्टजनिमृतिमार्गवति, **अस्मिन् प्रपश्चे**; हतजनिपथे, जनेः पन्था जनिपथः, हतः क्लिष्टः जनिपथ. हतजनिपथः तस्मिन् प्रपश्चे; **अस्मिन्निति** पदेन जनिपथनिन्दा सूच्यते। **त्वम् एकमेव,** पशोः जीवस्य संसरतः सहायभूतं **पान्थम्,** पन्थानं गच्छतीति पान्थम्, **मत्वा**; जीवो गर्भनरकस्वर्गादिकं यद् यद् याति, तच्छिवोऽपि मार्गबन्धुः सन् यातीत्यर्थः। **श्रुतिश्च**—

"ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ प्रथमे परार्ध्ये ।"[1]
"द्वा सुपर्णा सयुजौ सखायौ समानं वृक्षं परिषस्वजाते"[2]

इति । "गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्" इति **व्याससूत्रं** च[3] । **पाद्मे** ऽपि—

"यथा राहुरदृश्यो ऽपि दृश्यते रविमण्डले ।
तद्वत् सर्वगतोऽप्यात्मा लिङ्गदेहे तु दृश्यते ॥

---

१ ऋतमिति । स्वाज्ञदृष्टिविकल्पितकर्मफलस्य स्वदृष्ट्या ऋतत्वात् तदेव ऋतं द्वौ आत्मानौ पिबति नेतरः। तथापि छत्रिन्यायेन पात्रजीवसामानाधिकरण्यात् पिबन्तौ उच्येते । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति" इति श्रुतेः। सुकृतस्य स्वकृतकर्मणः फलहेतुः यत्र अस्मिन् शरीरे लोक्यते स लोकः तस्मिन् लोके। बाह्याकाशापेक्षया हार्दाकाशस्य परमत्वात्; तस्मिन् परमे । यत्र ब्रह्म उपलभ्यते तत् परार्धं तस्मिन् परार्धे । हार्दाकाशे कल्पिताकातूलान्तःकरणायमानगुहां प्रविष्टाविति संसारासंसारित्वेन, छायातपौ इव परस्परविलक्षणौ इति ब्रह्मवादिनः वदन्तीत्यर्थः।

२ द्वा सुपर्णेति । द्वा द्वौ सुपर्णा सुपर्णौ पक्षिविशेषौ । सयुजौ सर्वदा एकत्र युक्तौ सखायौ सखायौ समानाख्यानौ । इत्थंविधौ जीवेशौ समानं युगपत् उच्छेदनसामान्यात् वृक्षं शरीरं, परिषस्वजाते; वृक्षमेकं सुपर्णाविव संश्रय इत्यर्थः। क्षेत्रसंक्षको हि वृक्षः—

"ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः।" इति श्रुतेः,
"इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते" इति स्मृतेश्च ॥

३ गुहा बुद्धिः, हृदयं वा; तां प्रविष्टौ तस्याः अन्तः स्थितौ जीवपरमात्मनौ हि यस्मात् तस्य जीवस्य दर्शनं प्रत्यक्षेण तस्य परमात्मनश्च दर्शनश्रुत्या, "गुहाहितम्" इत्यादिकया, तस्मात् इति सूत्रार्थः।

नीयमाने यथा कुम्भे घटाकाशोऽपि नीयते ।
तद्वत् सर्वगतोऽप्यात्मा लिङ्गदेहे विनिर्गते ॥
निश्चलः परिपूर्णोऽपि गच्छतीत्युपचर्यते । ”

इति । तस्मात् संसारमार्गेषु संचरतां मार्गेषु संसरतां पशूनां तत्र तत्र पान्थं पथि सहायभूतं त्वाम् एकमेव मत्वा, चितिं विना तदाभासस्य अनवस्थितेः सदा सुस्निग्धवत् सहायं पान्थं मत्वा ; **पारशून्यात्** ; अपारात् भवसागरस्य भवत् प्रसाद विना अनिवृत्तेः अपारत्वविशेषणं युक्तमेव ; तादृशात्, **जन्मप्रचयजलधेः बिभ्यतः** ; भवभीरवः धन्याः सनकसनन्दनभरद्वाजमुनिप्रमुखाः पञ्चमुखारविन्दस्य ते रौद्रम् अघोरं यद् **दक्षिणं मुखं संश्रयन्ति।** अत्र वर्तमानक्रियापदेन कैवल्यमुक्तिमपि करस्थां बुध्वापि श्रीगुरुमूर्तिदर्शनानन्दानुभवदृष्टास्वादः सन्तः लोकहिताय वा अद्यापि समाश्रयन्तीति भावः ।

हे नाथ! तस्मात् इह **घोरे भवे** चिरं क्लिष्टं मां तेनैव मुखेन पाहीति । अनेन श्रौतमार्गावलम्बनं, पूर्वाचारानुसरणं च सिद्ध्येदिति गम्यते । “अजात इत्येवं कश्चिद् भीरुः प्रपद्यते, रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम्” इति[1] हि **श्रुतिः** । किं च—“येनास्य पितरो याता येन याताः पितामहाः” इति **न्यायेन** कुलकूटस्थस्य भरद्वाजमुनेः शिवस्य अघोरमुखेनैव शिवज्ञानदीक्षोपलब्धेः तेनैव मुखेन मां पाहीति । एवं यदि श्रुत्यनुग्रहपूर्वकपूर्वाचारः समाश्रितो भवेत् ; अन्यथा श्रुत्यननुग्राहकपूर्वाचारमात्रस्य मौर्ख्यवादापत्तेः ; दक्षिणमुखेन मां पाहीति भावः ॥ २३ ॥

भक्तस्य तव मयैतावत् साधितम् ; इतः पश्चादप्यपेक्षसे चेत् ; सन्ति हि सुराः, तान् आश्रित्य स्वेप्सितम् आप्नुहीति चेत् ; न ; त्वत्प्रपन्नस्य अन्यस्य अनुसरणं न रोचते, स च कश्चिद् अन्योऽपि नास्ति, तस्मात् प्रपन्नं मां पाहीत्याह—

**एकोऽसि त्वं शिव जनिमतामीश्वरो बन्धमुक्त्योः**
**क्लेशाङ्गारावलिषु लुठतः का गतिस्त्वां विना मे ।**
**तस्मादस्मिन्निह पशुपते घोरजन्मप्रवाहे**
**खिन्नं दैन्याकरमतिभयं मां भजस्व प्रपन्नम् ॥ २४ ॥**

---

१ अजात इति । इति शब्दः हेत्वर्थः । यस्मात् त्वम् एवम् उक्तप्रकारेण अजातः जनिमृत्यशनायादिषड्भावषड्र्मिवैरल्याद् अजातः परमात्मा नाहं तत्सदृशः ; षड्भावषड्र्मिविशिष्टदेहित्वात् आत्मानं मत्वा कश्चित् जात्याद्यशनायादिभावषट्ककवड्र्मितः भीरुः सन् विशुद्धान्तः करणः योग्याधिकारी अहम्, हे रुद्र ! ते तव यत् ते सर्वापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणकैवल्यदानदक्षिणं समर्थं मुखं निष्प्रतियोगिकनिर्गुणं स्वावशेषधिया प्रपद्ये, तेन मुखेन योग्याधिकारिणं मां पाहि ; यत् ते नित्यं रूपं तन्मात्रं विधाय रक्षस्व ।

प्रपद्यते इत्यस्मिन् पाठे—कश्चित् मुमुक्षुः मोक्षसिद्ध्यर्थं त्वां प्रपद्यते, अतः अहमपि मोक्षसिद्ध्यर्थं त्वामेव प्रपद्य इत्यर्थः ।

**एकोऽसीति** । हे **शिव! जनिमताम्, बन्धमुक्त्योः ईश्वरः**; कर्ता **त्वम् एक** एव **असि** । त्वत्तः अन्ये सर्वेऽपि अनीश्वरा एवेति अवगम्यते । ननु—श्रुतिभारतादौ ईशशब्दो विष्ण्वादेरपि दृश्यते । तथा हि **भगवद्गीतायाम्**—

" तस्मात् प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम् । "

इत्यादि बहुषु स्थलेषु ईश्वरशब्दश्रवणात् कथं भव एव ईश्वरशब्दोऽस्तीति ; अत्राच्यते—या काचित् निग्रहानुग्रहशक्तिः यत्र यत्रास्ते, तेऽपीश्वरवाच्या जनेश्वरयोगीश्वरादिवद्भवन्ति । साक्षात् सर्वेश्वरत्वं तु हर एवेति अवगम्यते । तथा च **श्रुतिः**—

" तमीश्वराणां परमं महेश्वरं
तं देवतानां परमं च दैवतम् ।
पतिं पतीनां परमं परस्ताद्
विदाम देवं भुवनेशमीड्यम् ॥ "[1]

इत्यादि । **भारतेऽपि**—

" ईश्वरश्चेतनः कर्ता पुरुषः कारणं शिवः ।
विष्णुर्ब्रह्मा शशी सूर्यः शक्रो देवाश्च दानवाः ॥
सृजते ग्रसते चैतान् तमोभूतमिदं जगत् । "

इति । **पुराणेऽपि**—

" हरिर्यथैकः पुरुषोत्तमः स्मृतो
महेश्वरस्त्र्यम्बक एव नापरः । "

इति । **कालिदासश्च**—

" शब्दमीश्वर इत्युच्चैः सार्धचन्द्रं बिभर्ति यः । " कुमारसंभवः ६.७५ ॥

इति । **अमरकोशेऽपि**—

" ईश्वरः सर्व ईशानः शंकरश्चन्द्रशेखरः । "

---

**१ तमिति । तं प्रकृतं परमात्मानं जगद्धेतूनां ब्रह्मादीश्वराणामपि परमम् उत्कृष्टं महेश्वरं देवतानाम् इन्द्रादीनामपि देवत्वप्रापकत्वेन परमम् उत्कृष्टं दैवतं च व्यष्टिसमष्टिकारणाधिपतीनामपि परमं पतिं स्वामिनं प्राकृतेभ्यः परस्तात् परमं देवं भुवनेशं वेदेतिहासादिभिः ईड्यं विदाम विद्मः । लडर्थे लोट् । एवम् ईश्वरात्मतया ज्ञात्वा तत्पदवीं प्राप्य वर्तामहे । ईश्वरापत्तिर्हि मुक्तिरित्यर्थः ।**

इति ।

अपि च ; न्यायोपबृंहणं **शास्त्रमपि**—

" ईश्वरस्यांशभूयस्त्वात् रुद्रस्येश्वरता भवेत् ।
अल्पांशत्वाच्च विष्णुवादेर्नेश्वरत्वं व्यवस्थितम् ।
ईश्वरांशस्तथा ज्ञेया विष्णुब्रह्मादयः स्मृताः ॥
यथाकाशांशभूयस्त्वादाकाशमिति गीयते ।
आकाशांशाल्पभागित्वात् वायुर्नाकाशशब्दभाक् ॥
एवमीश्वरशब्दार्थो मायावी हि त्रिलोचनः ।
विष्ण्वादावंशलेशत्वादीशत्वं गौणमेव हि ॥
पशुशब्दो यथा पाशावयवेषु प्रयुज्यते ।
वनग्रामादिशब्दानामेकदेशप्रवृत्तिवत् ॥
एवमीशादिशब्दानां विष्ण्वादौ वर्ततां सुखम् ।
एक एव हि मुख्योऽयमीश्वरः श्रुतिचोदितः ॥"

इति **न्यायेन** अन्येषां गौणेश्वरत्वं वर्ततां नाम । ततस्त्वमेवेश्वर इत्यर्थः । **क्लेशाङ्गारावलिष्विति ;** उक्तं हि **श्रीविद्यारण्यमुनिभिः**—

" ब्रह्मज्ञानात् पाशहानौ क्षीणक्लेशो न जन्मभाक् ।
पाशांश्चतुर्विधाः शैवशास्त्रेषु प्रतिपादिताः ।
मलो माया कर्म तत्त्वतिरोधानं च ते मताः ॥
मलो ज्ञानक्रिया शक्त्याच्छादको दोष इष्यते ।
रागादिहेतुर्मायोक्ता कर्म पुण्यं च पातकम् ॥
मूढैस्तत्त्वतिरोधानं सर्वैरप्यनुभूयते ।

इति । **पातञ्जलमते** तु—" अविद्यास्मितारागद्वेषाभिनिवेशाः " इति ; पञ्च वा क्लेशा एव अङ्गाराः निर्गतज्वालाग्निखण्डाः, तेषाम् आवलिषु, **लुठतः मे**; मम अखिलरक्षकं **त्वां विना का गतिः** अस्ति ? न कापीत्यर्थः । **तस्मात् अस्मिन् अपि घोरजन्मप्रवाहे ;** अतिभयंकरजन्मप्रवाहे अस्मिन् मानुष्ये जन्मनि अपि, **खिन्नं दैन्याकरम् ;** दैन्यनिधिम्, अत्यन्तघृणास्पदमित्यर्थः । **अतिभयं माम् ;** दैवात् लब्धं मानुष्यं जन्म, इदानीमपि वृथास्मि चेत् ; परं भावि कथं भविष्यतीति भीतियुक्तम् । अत एव **प्रपन्नं** मां **भजस्व** शीघ्रम् आगत्य रक्ष त्राहीत्यर्थः ॥ २४ ॥

ननु त्वदनुग्रहः केन देवेन कया वा रीत्या कार्य इत्यत्राह—

**यो देवानां प्रथममशुभद्रावको भक्तिभाजां**
**पूर्वं विश्वाधिक शतधृतिं जायमानं महर्षिः ।**
**दृष्ट्वापश्यत् सकलजगतीसृष्टिसामर्थ्यदात्र्या**
**स त्वं ग्रन्थिप्रविलयकृते विद्यया योजयास्मान् ॥ २५ ॥**

**यो देवानामिति** । हे **विश्वाधिक** ! विश्वस्मात् उपरि विश्वाधिकः, महांश्चासौ ऋषिश्च महर्षिः, सर्वं स्वयं जानातीत्यर्थः । "ऋ गतिज्ञानयोः" इति **धातुः** । **भक्तिभाजाम्** ; शिवसेविनाम् । **अशुभद्रावकः**, अशुभानि संसारसमुत्पन्नानि दुःखानि द्रावयति नाशयति इति अशुभद्रावकः रुद्र इत्यर्थः । विश्वाधिकः रुद्रः **महर्षिः** भक्तिभाजाम् अशुभद्रावकः य ईशः, **देवानां प्रथमम्** ; पुरस्तात् अग्रे शिवसंकल्पमात्रेण, **जायमानम्**; प्रतिकल्पम् उत्पद्यमानम् । **शतधृतिम्** ; देवमानेन द्वादशचतुर्युगसहस्रकालं, परार्धद्वयकालमानं वा विधेः शतवर्षाणि स्वजीवितम् ईशाज्ञया धत्त इति शतधृतिः, तम् । **सकलजगतीसृष्टिसामर्थ्यदात्र्या** ; सकला च स जगती च सकलजगती, तस्याः सृष्टेः सामर्थ्यम् कौशलम् ददातीति सकलजगतीसृष्टिसामर्थ्यदात्री, तया **दृष्ट्या** अपश्यत् ।

ननु—भगवान् संकल्पेन विधिं ससर्ज, पश्चात् स तु किं चिकीर्षया अपश्यत् ? उच्यते—सकलजगतीसृष्टिसामर्थ्यदात्र्येत्युक्तं विस्मृतं किम् ? सकलजगत्सृष्टेः गुरुकार्यत्वात् तर्हि मत्तः कस्यचिदपि बोधकस्य अभावात् दीक्षानिमित्तमवलोक इत्यर्थः । अत्र **मान्त्रिकी, स्पार्शिकी, चाक्षुषी** च इति दीक्षात्रयं वैदिकानां प्रसिद्धमपि केचन वैदिकब्रुवा नास्माकं दीक्षेति वदन्ति, वेत्तारोऽपि ते तद्ग्रन्थान्न विमर्शन्त इति वा ? उक्तं हि **स्कान्दे हिमाचलखण्डे** दीक्षाशब्दो निरुच्यते ; यथा—

"दीपनादात्मबोधस्य क्षारणात् तमसोऽस्य च ।
दीक्षाशब्देन कथितं गुरोः साक्षा(न्निरीक्षणम्) ॥"

इति । तदेव विशदयति **परशुरामकल्पसूत्रे**—

"चक्षुरुन्मील्य यत् तत्त्वं ध्यात्वा शिष्यं समीक्षते ।
पशुपाशविमोक्षाय दीक्षेयं चाक्षुषी मता ॥"

इति । पुनः स्पार्शिकी मान्त्रिकीति दीक्षाद्वयमस्मदुक्तशिवसूत्रपूजाविधौ[१] द्रष्टव्यम् । **पुरुषार्थप्रबोधे तु**—

"ददाति शिवतादात्म्यं क्षिणोति च मलत्रयम् ।
अतो दीक्षेति सा प्रोक्ता दीक्षाशब्दार्थवेदिभिः ॥

---

१ शिवसूत्रपूजाविधाविति ; अनेन व्याख्यात्रा बोधायनमहर्षिप्रणीतकल्पसूत्रान्तर्गतशिवपूजासूत्रस्येपरि कारिकासहिता काचन विस्तृतव्याख्या रचितेति श्रूयते ; तत्र द्रष्टव्यमित्यर्थः ।

त्रिविधा सा भवेद् दीक्षा प्रथमा त्वाणवी परा ।
शाक्ती तु शाम्भवी त्वस्या सद्योमुक्तिविधायिनी ॥
आणवी बहुधा दीक्षा शाक्ती दीक्षा च शांभवी ।
एकैकयेति विद्वद्भिः पठ्यते शास्त्रकोविदैः ॥
स्मार्ती च मानसी चेति चाक्षुषी स्पार्शिकी तथा ।
वाचिकी च तथा हौत्री शास्त्री चेत्याभिषेचिकी ॥
एवमुक्तानेकविधा शैवीदीक्षाविचक्षणैः ।
या सा मध्ये तु हौत्राख्या कुण्डमण्डलमण्डपैः ॥
युक्ता वैदिकनिष्ठैः सा दीक्षा त्याज्यैव सर्वथा ।
वाचिक्यादिष्वपि समा मण्डलं मण्डपं तथा ॥
अत्र गुह्यतमत्वाच्च शिवाज्ञाभङ्गभीतितः ।
समस्तदीक्षास्वरूपं न मया संप्रदर्शितम् ॥ ”

इति ।

एवंभूतया दृष्टया योऽपश्यत्, स तादृशः ब्रह्मदेवस्यापि गुरुः, स त्वं मम **ग्रन्थिप्रविलयकृते** ; “ **कृतेऽर्थे** निमित्तम् ” इति **निघण्टुः**(?) ब्रह्मविष्णुग्रन्थीनां प्रविलयनिमित्तम् अस्मान् त्वदधीनान् **विद्यया** शिवज्ञानेन **योजय** संयोजय । अत्र प्रतिपादितेऽर्थे **श्रुतिश्च** भवति—

“ यो देवानां प्रथमं पुरस्ताद्
विश्वाधिको रुद्रो महर्षिः ।
हिरण्यगर्भं जनयामास पूर्वं
स नो बुद्ध्या शुभया संयुनक्तु ॥ ”[१]

इति । अत्र श्रुतिगतरुद्रशब्दमग्रहीद् **अशुभद्रावक** इति । रुद्रशब्द एवं निरुच्यते—रुत्या स्वाग्र्यया श्रुत्या अधर्मादीन् द्रावयतीति रुद्रः । रुत्या श्रुत्या धर्मं सदाचारं बोधयतीति रुद्रः । अथ वा —रुतं वेदसमूहं कल्पादौ

---

१ योदेवानामिति । य ईशः अग्न्यादिदेवानां प्रभवः च, उत्पतिक्रमात् प्रातिलोम्येन भवः यस्मिन् सः प्रभवं लयस्थानम् उद्भवति अस्मादिति उद्भवः उत्पत्तिस्थानमिति यावत् । उपसर्गाणाम् अनेकार्थत्वात् । विश्वश्चासौ अधिकश्चेति विश्वाधिकः, निरतिशयानन्दत्वात् । रुद्रपदं व्याख्यातम् । महांश्चासौ ऋषिश्चेति महर्षिः, निरतिशयमहत्वेन सर्वज्ञत्वात् । स एव सृष्टेः पूर्वं सर्वप्राण्यन्तः कारणाभिमानं हिरण्यगर्भं जनयामास । सोऽयम् ईश्वरः नः अस्मान् योग्याधिकारिणः तद्विषयया शुभया बुद्ध्या संयुनक्तु । येनाहं तत्पदं भजामि, तथा मां नियोजयतु इत्यर्थः ।

ब्रह्मणे ददातीति च रुद्रः । रुति नादान्ते द्रवति, द्रावयति, रञ्जयति, वा रुद्रः । " रुधिर आवरणे " इति धातोः अज्ञानम् अविद्यां द्रावयतीति, सर्वमन्तकाले सकलसंहारकृतमोगुणग्रहणेन रोदयतीति च रुद्रशब्दो निष्पन्नः । स्वयं रुदतीति रुद्रशब्दस्तु, " देवासुराः संयत्ता आसन् " इति श्रुत्यैव अग्निपरतया व्याख्यातत्वात् न मूर्खवादावकाशः ।

ननु—एवंभूतोऽपि श्रीरुद्रः स्वसृष्टानेव सर्वान् तमोगुणमधिष्ठाय संहरति । अनेन नैर्घृण्येन कर्मणा तस्य वा अन्यस्य किं प्रयोजनं ? भवतीति चेत् ; उच्यते—न हि तस्य किंचिदपि नैर्घृण्यमस्ति प्रयोजनं वा । किंतु घृणैव क्रियते । पशूनां महत् प्रयोजनं च । तथा च **शिवपुराणम्**—

" निदानज्ञस्य भिषजो रुग्णो हिंसां प्रयुञ्जतः ।
न किं चिदपि नैर्घृण्यं घृणैवात्र प्रयोजिका ॥ "

इति । **अस्यार्थः**—यथा गलपिलकार्दितस्य अशननिद्रादिविहीनस्य सततं हाहेति क्रन्दमानस्य दयालुः कश्चिद् महाभिषक् तत्सुखचिकीर्षया स्वयमभ्युपेत्य स्नुहिपत्रनिभसूक्ष्मशस्त्रेण व्रणलोलकीटपूयादि निःसार्य, पुनः औषधं विनिक्षिप्य, तस्य रोगिणः सुखनिद्राभ्यवहारादि दापयति । यथा वा—निदाघे पांसुक्रीडापरं मूर्खं वा बालकं जननी प्रशास्य स्तन्यं दत्वा, मञ्चमारोप्य निद्रापयति तद्वत् ; श्रीरुद्रः संसारयातायातचिरपरिश्रान्तान् जन्तून् दीर्घसुप्तिसुखचिकीर्षया तमोगुणोपाधिकः सन् सुचिरं सुखयत्येव । पुनः प्राणिकर्मपरिपाकवशात् पुनः तानुत्पाद्य भोगान् ददातीति । तदुक्तं **शैवसिद्धान्तसारे**—

" विश्रान्त्यै भविनां च खिन्नमनसां पाकाय कर्मावलेः
माया वाग्बलसंभवाय कुरुते शंभुर्महासंहृतिम् ।
शिष्यन्ते पशवः सशक्तिरमलाः शंभुश्च मायाद्वयं
सृष्ट्याद्यं कुरुते ततश्च दयया भोगाय पुंसां पुनः ॥ "

इति । एवं श्रीरुद्रः पशूनां दयया सुखं च ददाति । विच्छिन्नपाशानाम् आत्यन्तिकं मुक्तिसुखं च यो ददाति । स एव त्वम् अस्मान् विद्यया योजयेति भावः । **परिकरालंकारः** ; तल्लक्षणं तु—" अलंकारः परिकरः साभिप्रायविशेषणे " इति ॥ २५ ॥

यत एवं श्रीरुद्र एव भुभुक्षूणां, मुमुक्षूणां मुक्तिं च भुक्तिं च ददाति, दुःखार्तोऽहं त्वां विना कं शरणं यामि, त्वमेव गतिरित्याह—

**यद्याकाशं शुभद मनुजाश्चर्मवद्वेष्टयेयु-**
**र्दुःखस्यान्तं तदपि पुरुषस्त्वामविज्ञाय नैति ।**
**विज्ञानं च त्वयि शिव ऋते त्वत्प्रसादान्न लभ्यं**
**तद्दुःखार्त्तः कमिह शरणं यामि देवं त्वदन्यम् ॥ २६ ॥**

**यद्यकाशमिति** । हे **शुभद** ! **मनुजाः** ; मनुप्रजापतेः संभवा मनुष्या इत्यर्थः । **आकाशम्** ; अदृश्यम् अविभक्तं सुषिरमात्रं व्योम **चर्मवत्** वेष्टयेयुः । वेष्टसाधनं वस्त्रं लोकसिद्धमपि तस्य आतानवितानतन्तुनिचयस्य अन्तरालश्च सत्त्वात्, ततोऽपि घनीभूतचर्मवत् वृष्टिवातातपक्लेशपरिहाराय **वेष्टयेयुः** ; आच्छादयेयुः यदि तदपि **तदपि** पुरुषं पुरीतत् नाडीषु शेते इति पुरिशः, स एव पुरुषः ; "पुरमेकादश द्वारम्" इति **श्रुतेः** । सर्वासु पूर्षु शरीरेषु आत्मभावेन तिष्ठतीति सर्वपरिपूर्णत्वाद्वा पुरुषः तं, **त्वाम्** , महादेवम् , **अविज्ञाय;** अविदित्वा, **दुःखस्यन्तम्** ; संसारक्लेशस्य, अन्तम् स्वात्मरूपात्राप्तिसुखम् ; **न एति** ; न प्राप्नोति । तथा च **श्रुतिः**— "तमेवं विद्वानमृतत्वमेति", "नान्यः पन्था अयनाय विद्यते", "तरति शोकमत्मवित्," "य एतद् विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापि यन्ति" ;

"यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥" [१]

इति ; "तत्र को मोहः कः शोकः एकत्वमनुपश्यतः" इत्यादिभिः श्रुतिभिः दुःखास्यान्तः अज्ञानपाशनिवृत्तिः, आनन्दावाप्तिर्वा मोक्षः ; तं तव याथात्म्यविज्ञानं विना नैति न प्राप्नोति । हे शिवः ! **त्वयि** ; त्वद्विषये **विज्ञानं** सम्यग् ज्ञानं च त्वत्प्रसादाद् **ऋते** न लभ्यम् लब्धुं योग्यं न भवेत् । यत एवम् , तस्मात् **दुःखार्तः** अहं **त्वदन्यं कं देवं शरणं** गतिं **यामि** प्रपद्ये । अत्र वैधर्म्येण **मिथ्याध्यवसतिः अलंकारः** । तल्लक्षणं तु—

"किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यर्थान्तरकल्पनम् ।
मिथ्याध्वसितिः . . . . . . ॥"

इति ॥ २६ ॥

ननु—विविधशास्त्रपाटवेन पारमेश्वरज्ञानं लभ्यते, तेन मुक्तिरिति चेत् न ; सकलविद्याविलासोऽपि कालयापनमात्रफलकः, त्वत्प्रसाद एक एव मुक्तिफलद इत्याह—

**किं गूढार्थैरकृतकवचोगुम्भनैः किं पुराणै-**
**स्तन्त्राद्यैर्वा पुरुषमतिभिर्दुर्निरूप्यैकमत्यैः ।**
**किं वा शास्त्रैरफलकलहोल्लासमात्रप्रधानै-**
**र्विद्या विद्येश्वर कृतधियां केवलं त्वत्प्रसादात् ॥ २७ ॥**

**किमिति** । हे **विद्येश्वर** ! विद्यानाम् , अष्टादशविद्यास्थानानां, चतुःषष्टितन्त्राणां च ईष्टे इति विद्येश्वरः । **गूढार्थैः** ; गूह्यन्ते स्म इति गूढाः ; "गुहू संवरणे" इति **धातुः** । गूढाः संकुचिता अर्थाः येषां ते गूढार्थाः

१ यदेति । यदा चर्म वेष्टयिष्यन्ति मानवाः, तद्वत् आकाशं वेष्टयिष्यन्ति चेत्, तदा एवं विशिष्टशास्त्रोपसंहारभूतं पूर्वमन्त्रप्रकाशितम् , "निष्कलम्" इत्यादिविशेषणविशिष्टं षोडशकलापह्नवसिद्धत्वेन शिवं स्वप्रकाशमात्रं निष्प्रतियोगिकस्वमात्रमिति अविज्ञाय स्वातिरिक्तताप्रभवदुःखस्य अन्तः नाशः भविष्यति इति मन्त्रार्थः ।

नैः । **अकृतकवचोगुम्भनैः ;** न विद्यते पुरुषान्तरकृतकं वचनं न येषां तेषाम्; अकृतकवचसाम् **गुम्भनैः ;** उपर्युपरि वचनविन्यासैः वाक्यसमूहैः किं फलमस्ति । **पुराणैः ;**

" सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ "

इत्युक्तविधपुराणार्थप्रवचनपाण्डित्यैर्वा किं फलं लभ्यते । **पुरुषमतिभिदुर्निरूत्यैकमत्यैः ;** पुरुषधीवृत्तिभिः दुर्निरूप्यं दुःखेनापि निरुपयितुमशक्यम् ; ऐकमत्यम् एकधैव स्वसमयाचारेषु सांकेतिकतया मतीनां भाव ; येषां तैः । **तन्त्राद्यैः ;** शिवकापालतन्त्रैः, आदिशब्देन रसक्रियाग्निस्तम्भाभिचारादिभिर्वा किं लभ्यते न किमपीत्यर्थः ।

एवं सर्वशास्त्रस्य वैयर्थ्ये सति शिवज्ञानं केन सिद्ध्येदिति? अत्रोच्यते—**कृतधियाम् ;** वशीकृत-मनसाम्, शिवपदैकमनस्कानाम् ; **केवलं त्वत्प्रसादात्,** " षद्लृ विशरणगत्यवसादनेषु " इति **धातुः** । प्रसादो नाम अविद्याकामादिविशरणं पशोः पुण्यपापसाम्यगतिः, सर्वक्लेशावसादनं वा प्रसादस्वरूपमित्यर्थः । तादृशात् त्वत्प्रसादात्, केवलं **विद्या ;** शिवज्ञानं भवेदिति शेषः । तथा च **श्रीब्रह्मवचनम्**—

" परमाद्वैतविज्ञानं प्रसादादेव नान्यथा ।
यक्षराक्षसगन्धर्वसिद्धादीनामपीश्वरः ॥
परमाद्वैतविज्ञानं प्रसादाद‍ादेव नान्यथा ॥
प्रसादे सति कीटो वा पतङ्गो वाथ वानरः ॥
देवो वा दानवो वापि लभते ज्ञानमुत्तमम् ।
एष एव हि जन्तूनां सम्यग्ज्ञानं ददाति च ॥
न विष्णुनहमन्यश्च सत्यमेव मयोदितम् । "

इति ।

ननु—कथमिव ईश्वरो वा प्रसीदतु दुष्टस्य अस्य लोकस्य कर्मणोः फलभोगेन क्षयसाम्ये सति हि ईश्वरः प्रसीदेत् । जन्तोः सत्समीकरणशक्तिः नास्त्येव । सत्येवं कृतयत्नस्यापि अस्य किं भवेत्? इति चेत्; शृणु । ईश्वरं प्रत्युत श्रुतिः—" एष उ वा व साधु कर्म कारयति, तं यमेभ्यो लोकेभ्य उन्निनीषते, एष एवासाधु कर्म कारयति, तं यमेधो निनीषते " इति । सर्वज्ञेश्वरः कर्मक्षयसाम्यस्मरणसमये अनन्तशरीरानुप्रवेशात् कारयित्वा देवः रक्षत्येव, आरब्धं भोक्तव्यमेव ;

" आरब्धस्योपजीव्यत्वात् तत्त्वज्ञानस्य कर्मणः ।
अशक्यत्वाच्च मुक्तेषुरिव बाधो न विद्यते ॥ "

इति **स्मृतेः** ।

अत्र सर्वसंशयनिवर्तकमुत्तरं **श्रीवार्तिककाराचार्यैरुदीर्यते**—

“ आविद्या पञ्चपर्वैषा प्रादुर्भूता परात्मनः ।
ब्रह्मदेवमनुष्येषु पशुषु स्थावरेषु च ॥
पञ्चधा प्रविभक्तात्मा वर्तते चिद्व्यपाश्रया ।
तामविद्यां तथाभूतां भगवान् परमेश्वरः ॥
संहरत्युदयेनेव सहस्रांशुस्तमो यथा ।
ईदृशी परमा निष्ठा गुरोः साक्षान्निरीक्षणात् ॥
कर्मसाम्ये त्वनायासात् सिद्ध्यत्येव न संशयः । ”

इति प्रसादप्रकार एकः । अथ श्रीकाश्यादिदिशिवस्थानानि प्रापयन् सुखेत मुक्तिं दास्यतीति । तर्हि जन्मकर्माधिकारसाधनादिविचारो नास्त्येव । “ कृतप्रयत्नापेक्षः—” इति **ब्रह्मसूत्रात्**[1] प्रथमम् ईश्वर उपास्यः; स तु केनाप्युपायेन रक्षिष्यत्येवेति भावः । आहत्य त्वत्प्रसादादेव ब्रह्मविद्योदिति, तदन्यैः सकलप्रयत्नैः विफलमिति कथनात् वैधर्म्येण **विनोक्त्यलंकारः** ; तल्लक्षणं तु—“ विनोक्तिश्चेद् विना किंचित् प्रस्तुतं हीनमुच्यते ” इति ॥ २७ ॥

हे देव । त्वमत्यन्तहीनमपि दासं मां प्रहातुं न युक्तमित्याह—

**पापिष्ठोऽहं विषयचपलः संततद्रोहशाली**
**कार्पण्यैकस्थिरनिवसतिः पुण्यगन्धानभिज्ञः ।**
**यद्यप्येवं तदपि शरणं त्वत्पदाब्जं प्रपन्नं**
**नैनं दीनं स्मरहर तवोपेक्षितुं नाथयुक्तम् ॥ २८ ॥**

**पापिष्ठ** इति । हे स्मरहर ! कामिनीः स्मारयतीति स्मरः, तं हरतीति **स्मरहरः** । अहं पापिष्ठः पापकर्मण्येव स्थितः, “ ष्ठा गतिनिवृत्तौ ” इति **धातुः** । **विषयचपलः**; विषयेषु स्रक्चन्दनवनितादीन्द्रियार्थेषु मशकमक्षिकायवाग्वादाविव च पलवीः । संततद्रोहशालि सदाशिवगुरुवेदात्मनां द्रोहस्वभावः । कथम्, “ सोऽब्रवीत्

---

१ तुशब्दो वैषम्यनैर्घृण्यवारणार्थः । तन्निवारणं कुतः ? इत्यत आह—कृतेति । कृतप्रयत्नापेक्षः—कृतः जन्मान्तरे कृतप्रयत्र, तस्य अपेक्षां यस्य सोऽयं कृतप्रयत्नापेक्षः । तदेव कुतः ? इत्यत आह—विहितेति । विहितप्रतिषिद्धा अवैयर्थ्यादिभ्यः विहितम्, “ यावज्जीवमग्निहोत्रं जुहोति ” इत्यादिः; प्रतिषिद्धं च, “ न सुरां पिबेत् ” इत्यादि । तयोः अवैयर्थ्यम्, आदिशब्देन पुरुषकारादीनामपि, तेभ्यः ति इसूत्रस्य तात्पर्यार्थः ।

अहमेकः प्रथममासं वर्तामि च भविष्यामि, नान्यः कश्चन मत्तो व्यतिरिक्तः " इति श्रुत्युक्तः[1] शिवशासनोल्लङ्घनरूपः कश्चित् ;

" देहेन्द्रियादयो भावाः हानादिव्यापृतिक्षमाः ।
यस्य संनिधिमात्रेण सोऽहमित्यवधारय ॥ "

इति श्रीभगवत्पदाचार्यवचनोल्लङ्घनद्रोहो द्वितीयः । " शिवलिङ्गमहरहरभ्यर्चयेत् ", " नानृतं वदेत् " इत्यादि-वेदवचनोल्लङ्घनात्मकः तृतीयो द्रोहः ।

" अन्यथासन्तमात्मानं योऽन्यथाप्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥ "

इति श्रुत्या देहात्मबुद्ध्या आत्मद्रोहश्च मया अभ्यस्तः ।

एवं सदा सर्वद्रोहमेव करोमीति **संततद्रोहशाली** ; **कार्पण्यैकस्थिरनिवसतिश्च** ; कुटुम्बपीडनेनापि जीवनाय कथंचित् कल्पते इति कृपणः, " कृपू सामर्थ्ये " इति **धातुः** । अतियत्नेन जीवतीत्यर्थः । कृपणस्य भावः कार्पण्यम् । तस्य मुख्या स्थिरा निवसतिः निवासभूमिः अस्मि । किं च **पुण्यगन्धानभिज्ञः** ; पुणति शिवं करोतीति पुण्यम् । " पुण शुभकर्मणि " इति **धातुः** । तस्य पुण्यस्य गन्धलेशमपि न जानातीति पुण्य-गन्धानभिज्ञः । एवं यद्यपि उक्तदोषेषु सत्स्वपि, नाथ ! **तदापि** तथापि, **त्वत्पादाब्जमेव** गतिरिति **प्रपन्नं दीनं** मां प्रति तव **उपेक्षितुं** उदासीनं कर्तुं न **युक्तम्** । नाथ ! दासस्य मम दुष्कृतम् अखिलम्, **वृद्धकुमारन्यायेन** विस्मृत्य प्रशास्य वा नाथेन त्वया क्षन्तव्यमेव ॥ २८ ॥

नाथ त्वन्निरस्तोऽहं न केनापि रक्षणीयो भवेयम्, तस्मात् मद्रक्षणोदासीन्यं मा कुर्वित्याह—

**आलोच्यैवं मयि यदि भवान्नाथ दोषाननन्ता-**
**नस्मत्पादाश्रयणपदवीं नार्हतीति क्षिपेन्माम् ।**
**अद्यैवेमं शरणविहराद् विद्धि भीत्यैव नष्टं**
**ग्रामो गृह्णात्यहिततनयं किं नु मात्रा निरस्तम् ॥ २९ ॥**

**आलोच्येति** । हे **नाथ** ! मयि **अनन्तान्** असंख्यातान् दोषान्, " सायं निश्यव्ययं दोषा स्त्री वा ना दूषणाघयोः " इति **नानार्थरत्ननिघण्टुः** । **मयि दोषान्**, पापानि, **आलोच्य** ; शतधा परीक्ष्य, **भवान्** **अस्मत्पादाश्रयणपदवीम्** ; अस्माकं पादयोः अव्यभिचारिण्या धिया प्रपदनस्य शरणवरणस्य मार्गम् अयं नार्हति

[1] सोऽब्रवीदिति । य एवं देवैः पृष्टः सोऽयं रुद्रः अब्रवीत् । किमिति ? अस्मदादिप्रत्ययभासकप्रत्यग्रूपेण अहमेकः । तत्रोपपत्तिमाह—प्रथममिति प्रथमं सृष्टेः प्राक् अहमासम् स्थितवान्, इदानीं वर्तामि इतः भविष्यामि च कालत्रया-परिच्छिन्नोऽस्मि । नान्यः कश्चिदपि मत्तः सर्वेश्वरात्, व्यतिरिक्तः अस्ति ।

इति क्षिपेत् यदि ; त्यजसि चेत् , तदा **शरणविरहात्** ; संरक्षकाभावात् , **इमं** ; मां **भीत्या विनष्टं** विनाशं गतमेव **विद्धि** जानीहि । कथमेतत् ? लोके कश्चित् जीवनार्थं कृषिं वाणिज्यम् अन्यां जीविकां वृत्तिं यं कंचित् आश्रित्य जीवेत् , तथा त्वम् अन्यं देवं केनापि उपायेन अवलम्ब्य मुक्तो भवेत् इति चेत् , न ; अन्योपसर्पणयोग्यत्वात् । यतः अपि **अहिततनयं** मातुः पितुः गुरोर्वा अहितकारिणं प्रतिकूलकारिणम् । अतश्च मात्रादिभिः निरस्तं धिक्कृत्य बहिष्कृतं कंचन खलं **ग्रामः** ग्रामीणः, नगरं नागरिको वा जनः भृत्यशिष्यपुत्रादित्वेन विश्वस्य गृह्णाति किं नु न ? गृह्णात्येव । तर्हि शरणविरहात् भीत्या नष्टमेव विद्धि । ततश्च मात्रादिस्थानीयेन त्वया परित्यक्तस्य गत्यन्तराभावात् दयया मां रक्षेति भावः ।

ननु—"यथा मातृमान् पितृमान् आचार्यवान् ब्रूयात्" इति **श्रुतेः,** एते त्रयोऽपि हितकृत्वेन श्रूयन्ते । कथं कविना मात्रा निरस्तमित्युक्तमिति ? अत्रोच्यते—पुत्रस्य देहरक्षणबुद्धिपरिपालनविद्यादानाय मातृपित्राचार्यास्त्राचार्यास्त्रयोऽपि उपकुर्वन्त्येव । तथा च **श्रुतयः**—"प्राणस्येदं वशे सर्वं त्रिदिवे यत् प्रतिष्ठितम् ; मातेव पुत्रान् रक्षस्व" इति प्रश्ने,[1] "पितेव पुत्रमभिरक्षतादिमम्" इति **आयुष्यसूक्ते** च । "त्वं हि पिता योऽस्माकमविद्यायाः परं पारं तारयसि[2] इति च ।

एवं त्रयोऽपि एते समयभेदेन रक्षका अपि जनक आचार्यश्च कदापि मनाक् स्ववचनोल्लङ्घने सति सद्यः परित्यक्षत एव ; न पुनः स्वीकरिष्यतः । माता तु शतापराधिनमपि आत्मजं कदापि न त्यजति । पुनः पुनः हितमेव उपदेक्ष्यतीति लोकरीतिमनुसृत्योक्तमिति भावः । 'इह भीत्या नष्टम्' इत्यत्र ग्रामो गृह्णाति किं न्विति समर्थनात् **अर्थान्तरन्यासालंकारः** ; "उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः" इति तल्लक्षणात् ॥२९॥

हे ईश ! कथंचित् हितोपदेशेन वा मद्रक्षणमेव तव प्रयुक्तम् , नान्यदित्याह—

**क्षन्तव्यं वा निखिलमपि मे भूतभावि व्यलीकं**
**दुर्व्यापारप्रवणमथवा शिक्षणीयं मनो मे ।**
**न त्वेवार्त्या निरतिशयया त्वत्पदाब्जं प्रपन्नं**
**त्वद्विन्यस्ताखिलभरममुं युक्तमीश प्रहातुम् ॥ ३० ॥**

**क्षन्तव्यमिति** । हे ईश ! परमेश्वर ! दासस्य **मे भूतभावि व्यलीकम्** ; भूतम् , अज्ञदशाप्रसक्तम् , भावि ; शास्त्रज्ञानात् पश्चाद् संभविष्यत् । तदनन्तरासंभूतं निखिलमपि व्यलीकम् ; "पीडार्थं तु व्यलीकं स्याद्-लीकं त्वप्रियेऽनृते" इति **कोशः** । अपि च—

---

१ प्रणस्येदमिति । अस्यिन् लोके यद् उपभोगजातम् अस्ति, तत् सर्वं प्राणस्यैव वशे वर्तते । त्रिदिवे ; स्वर्गेऽपि यत् उपभोग्यं प्रतिष्ठितम् तस्याम् अपि प्रागाधीनत्वेन स एव तस्य ईशिता । अतः माता इव पुत्रान् अस्मान् रक्षस्व ; इति ।

२ त्वं हि नः अस्माकं पिता निष्प्रतियोगिकब्रह्ममात्रज्ञानजनयितृत्वात् । यतः स्वाविद्यासागरपारं तारयति अस्मान् , अतः पितृत्वं तदुपपन्नम् । यः शरीरमात्रं जनयति, सोऽपि पूज्यतरो दृश्यते । किमु वक्तव्यं ब्रह्मभावदातुः ? इत्यभिप्रायः ।

" सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥ "[1]

इति **स्मृतेः** । प्रियवत् सत्यमेव ब्रूयात् कुर्याद्वा । मम भूतभाव्यलीकम् अप्रियम् अनृतं च अनुष्ठितम् अखिलं परपीडनहेतुकं वचः, कर्म वा तत् श्रीमता क्षन्तव्यं वा । **अथ वा दुर्व्यापारप्रवणम् ;** दुष्कर्मप्रसक्तम् ; **मनो** वा शिक्षणीयम् , त्वद्दर्शनासक्तं यथा भवेत् तथा अनुशासनीयम् । एतत् प्रकारद्वयं विना **निरतिशयया** निर्गतोऽतिशयो हि उत्तरोत्तरभावः यस्याः सा निरतिशया, तया अत्यन्तम् ; **आर्त्या त्वत्पादाब्जं प्रपन्नम् त्वद्विन्यस्ताखिलभरम् ;** त्वयि स्वामिनि सर्वसाक्षिणि प्रत्यक्चैतन्यस्वरूपे विन्यस्तः अखिलव्यापारः येन तं मां **प्रहातुं** न युक्तमित्यर्थः । देहात्मबुद्ध्या कृतं सर्वमपि व्यलीकम् अद्य विदित्वा सर्वान्तर्यामिणः तव कार्यमिति निवृत्ताभिमानं मां न जह्या इत्यर्थः ॥ ३० ॥

**सर्वज्ञस्त्वं निरवधिकृपासागरः पूर्णशक्तिः**
**कस्मादेनं न गणयसि मामापदब्धौ निमग्नम् ।**
**एकं पापात्मकमपि रुजा सर्वतोऽप्यनन्यदीनं**
**जन्तुं यद्युद्धरसि शिव कस्तावतातिप्रसङ्गः ॥ ३१ ॥**

**सर्वज्ञस्त्वमिति** । हे **शिव** ! परमशिव ! त्वं सर्वं जानातीति सर्वज्ञः ; " यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः "[2] इति **श्रुतेः** । सर्वज्ञोऽसि । **निरवधिकृपासागरः ;** निर्गतः अवधिः अवसानं यस्मात् सः ; निरवधिः , सगरसुतैः निखातः सागरः, निरवधिकृपासागरः । यद्यपि बालदृष्टेः अपारत्वप्रतीतिसत्त्वेऽपि प्रमाणदृष्ट्या पारदर्शनात् तद्व्यावृत्त्यर्थमेव निरवधित्वविशेषणम् ; संपूर्णदयावानित्यर्थः ; । देवस्य दयानिधित्वे इदमुच्यते ; पुरा दक्षः शंभुमायामोहितः शिवमदूषयत् । शिवदूषणश्रवणमपि अतिदुष्करमिति **भागवते** उक्तम्—

" कर्णौ पिधाय निरगाद्यदकल्प ईशे
धर्मावितर्यसृणिभिर्नृभिरस्यमाने ।
छिन्द्यात् प्रसह्य रुशतीमसतां प्रभुश्चेत्
जिह्वामसूनपि ततो विसृजेत् स धर्मः ॥ "

इति ; **शिवपुराणे**—

---

**१ सत्यं ब्रूयादिति ; यथा दृष्टश्रुतं तत्त्वं ब्रूयात् । तथा प्रीतिसाधनं ब्रूयात् ; " पुत्रस्ते जातः " इति । यथा दृष्टश्रुतमपि अप्रियम् ; " पुत्रस्ते मृतः " इत्यादि न वदेत् । एष वेदमूलतया नित्यो धर्मः इति ।**

**२ य इति । यः सामान्यतः सर्वं जानातीति सर्वज्ञःविशेषतः सर्वं वेत्तीति सर्ववित् । यस्य तपः सृष्ट्यालोचनमपि स्वातिरिक्त मिथ्या स्वयं सन्मात्रमिति ज्ञातयम् । इति ।**

इति ; **कौर्मे**—

" यः सर्वभूतविनुतं विश्वेशं तु विनिन्दति ।
न तस्य निष्कृतिः शक्या कर्तुं कल्पशतैरपि ॥ "

" शिवनिन्दवचः श्रुत्वा यस्तु न व्याकुलो भवेत् ।
स चण्डालत्वमासाद्य नरकेषु पतिष्यति ॥ "

इति ; **पाद्मे**—

" शिवनिन्दापरं मूर्खं यदि शासितुमक्षमः ।
स्वकर्णौ तोदयेत् तोत्रैरिति शास्त्रविनिश्चयः ॥ "

इति च ; एवं निन्दाश्रवणस्य एवं प्रायश्चित्ते सति, 'साक्षान्निन्दकस्य दक्षस्य वीरेण छिन्नमपि शिरः पुनः संधाय समुज्जीव्य गाणापत्यं ददौ, इति **स्कान्द**कथा । अपि च—' श्रीरिटिमुनिकलत्रं वह्निदग्धमपि दयया समुज्जीव्य तस्यै श्रीगिरिजासख्यमदिशत् ' इति च । एवमादि इतिहासैः देवस्य निरवधिकृपासागरत्वप्रसिद्धेः स तादृश एव ; तथा पूर्णशक्तिश्च;

" परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च " [१]

इति **श्रुतेः** । किं च कालकूटविषहरणशमनमथनत्रिपुरहननादिविविधशक्तिवैचित्र्यदर्शनाच्च पूर्णशक्तिश्च असि ।

अयं भावः—कश्चित् प्रभुः शास्त्रज्ञानेन सर्वप्राणिनां सुखदुःखादिविजानन्नपि जनः स्वकर्मफलमेव भुङ्क्ते इत्युदास्ते पूर्णदयाभावात् । पूर्णदयोऽपि कश्चिद् भूपतिः स्वस्यापि स्वामिनः चक्रवर्तिनः शासितान् जन्तून् विपन्नान् उद्धर्तुं नाहं शक्नुयामिति बिभ्यति । न तथेह भवितुमर्हति । यतः त्वमेव सर्वज्ञः निरवधिकृपासागरः, पूर्णशक्तिश्च भवति । मामकीं दुःखपरंपरां ज्ञात्वा कृपया संनिधाय मामकं विधिलिखितं दुर्विलसितं पक्षपातिदेवगणमपि परिमृज्य, सर्वातिशायिन्या विविधया शक्त्या मयि अवश्यं रक्षणीये सति आपदब्धौ निमग्नम् एनं मां कस्मान्न गणयसि न जानासि ? । हे शिव ! पापात्मकं पापासक्तान्तःकरणमपि सर्वतो रुजा अत्यन्तदीनम् एकं जन्तुं मां यदि उद्धरसि, तव तावता को ऽतिप्रसङ्गो भवेत् ? अतिप्रसङ्गो नाम वेदलोकव्यवहारशास्त्रमतिक्रम्य

---

१ परेति । परा सर्वोत्कृष्टा अस्य शक्तिः प्रकृतिः, देवात्मशक्तियुक्तत्वात् । सेयं विविधा अनन्तकार्यकरणतया श्रूयते सर्वत्र । सेयं पराशक्तिः न तत्स्वाभाविकी इत्यत आह—निर्विशेषस्य तदभावेऽपि सविशेश्वरस्य स्वभावादेव कीर्त्यत इति स्वाभाविकी ; सर्वज्ञेयविषयत्वेन सर्वज्ञत्वादिलक्षणा अस्य स्वरूपत्वात् स्वाभाविकी नान्यायत्ता स्वसंनिधिमात्रेण प्रकृतिप्राकृतं सर्वं वशीकृत्य नियन्त्रा अधिष्ठितनियमनात् बलक्रिया च स्वभावसिद्धा नानन्यत्वात् इति ।

प्रकर्षेण कुत्रचित् सज्जते इति यत् सो ऽतिप्रसङ्गः। पूर्वोक्तरीत्या न कदापि भवितुमर्हति। ततो नातिप्रसङ्गः न भवेत्, मां रक्षेति भावः।

अन्वयः—हे शिव! त्वं सर्वज्ञः निरवधिकृपासागरः पूर्णशक्तिः च असि। आपदब्धौ निमग्नं मां कस्मात् न गणयसि? पापात्मकमपि सर्वतः रुजा अत्यन्तदीनम् एकं जनम् एनम् उद्धरसि यदि, तव तावता कः अतिप्रसङ्गः भवेत्?।

अत्र कथं न गणयसि? कः अतिप्रसङ्गः? इत्याक्षेपोक्त्या परमेश्वरस्य सर्वज्ञत्वादिमहिमाभिव्यक्तेः स्तुतिरेव अभिव्यज्यत इति **व्याजस्तुतिरलंकारः**। तल्लक्षणं तु—"उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुति-निन्दयोः" इति ॥ ३१ ॥

हे नाथ! मां रक्षेति जन्तूनाम् अभ्यर्थनात् शिवः प्रसन्नः तमनुगृह्णातीति अयं प्राचीनमार्गः केन वा क्षुण्णः? तदन्यः को वा मार्गो ऽस्तीति पृच्छति—

**अत्यन्तार्तिव्यथितमगतिं देव मामुद्धरेति**
**क्षुण्णो मार्गस्तव बत पुरा केन वानाथनाथ।**
**कामालम्बे बत तदधिकां प्रार्थनारीतिमन्यां**
***त्रायस्वैनं सपदि कृपया वस्तुतत्त्वं विचिन्त्य*** ॥ ३२ ॥

**अत्यन्तेति**। हे **अनाथनाथ**! अगतिकानाम् अत्यन्तपापानामपि महादेवेति सकृन्नामोच्चारणमात्रेण सनाथो भवेदिति अनाथनाथः; तथा च **शिवरहस्यम्**—

"कोटयो ब्रह्महत्यानामगम्यागमकोटयः।
सद्यः प्रलयमायान्ति महादेवेति कीर्तनात् ॥"
महादेवेति वक्तारं दृष्ट्वा तु यमकिंकराः।
पलायन्ते महाभीताः स्मरन्तो यमशासनम् ॥"

इत्यादिना सकलसुरैरपि पापिष्ठत्वेन प्रायश्चित्तानर्हतया यः परित्यक्तो भवति, तस्य नाथो ऽहमिति नामकीर्तनमात्रतः प्रायश्चित्तेन रक्षतीति महादेवः अनाथनाथ इत्यर्थः। हे सर्वनाथ! **अत्यन्तार्तिव्यथितम्**, अधिकाभिः आर्तिभिः पीडाभिः व्याथितं व्यथायुक्तम्। **अगतिम्**; न विद्यते कापि गतिः यस्य तम्, **माम्**; देव **उद्धर** ऊर्ध्वं तारयेति तवाभ्यर्थनमार्गः पुरा केन वा क्षुण्णः अभ्यस्तः चूर्णितः। **माघे**ऽपि—"क्षुण्णं यदन्तः करणेन वृक्षाः फलन्ति०" इति। **मूकपञ्चशत्याम्**—"क्षुण्णं केनचिदेव धीरमनसा" इति च प्रयोगदर्शनात्। प्राचीन मार्गः पुरा केन वा क्षुण्णः, प्रहत इत्यर्थः। हे देव! स तु क्षुण्णो भवेन्नाम। तदधिकामन्यामुक्तविपरीतां कां प्रार्थनारीतिं त्वदभ्यर्थनप्रकारम् आलम्बे समाश्रये, न कोऽपि प्रकारोऽस्तीति भावः।

तस्मात् त्वं **वस्तुतत्त्वं विचिन्त्य**; वस्तुनोः तत्त्वं वस्तुतत्त्वम्; जीवेश्वरयोः बुद्धिगुहां प्रविष्टयोः सोदरवत् सहस्थितयोः भोक्तृभोजयित्रोः पांसुकणकल्याणशैलवत् अधरोत्तरयोः, किंचिज्ज्ञसर्वज्ञयोः, सेव्यसेवकयोः वस्तुनोः तत्त्वं मम आकिंचिन्यं तव महदैश्वर्यवैभवं च विचिन्त्य पर्यालोच्य, सपदि कृपया केवलम् **एनं** मां त्रायस्व इत्यर्थः। मद्भाग्यवशात् कदाचिद् आवयोः वस्तुतत्त्वविचारो यदि भवति, तदैव मच्छोकनिवृत्तिः भवेदिति भावः ॥ ३२ ॥

**एतावन्तं भ्रमणनिचयं प्रापितोऽयं वराकः**
**श्रान्तः स्वामिन्नगतिरधुना मोचनीयस्त्वयाहम् ।**
**कृत्याकृत्यव्यपगतमतिर्दीनशाखामृगोऽयं**
**संताड्यैनं दशनविवृतिं पश्यतस्ते फलं किम् ॥ ३३ ॥**

**एतावन्तमिति।** हे **स्वामिन्! एतावन्तं भ्रमणनिचयम्**; बहुयोनिशततनरकगर्भमरणरूपभ्रमणसमूहम्। **अयं वराकः**; हीनजन्तुः; **प्रापितः** संयोजितः। अतः अद्य **श्रान्तः अगतिः** च खिन्नमनस्कः अभूत्। द्रुतं **मोचनीयः**। पतिमन्तरेण पशुं को वा मोचयिष्यति?। ततः अद्य मानुष्ये जन्मनि शिवाज्ञानदर्शनेन मोचनीयः।

किं च—अयं **कृत्याकृत्यव्यपगतगतिः**; कृत्यं विहितम्, अकृत्यं निषिद्धम्, ताभ्यां व्यपगता विदूरं गता मतिः यस्य स तादृशः **दीनशाखामृगः**; बहुयोनिसहस्रवीथीषु यातायातेन दीनभावं गतः, **अयं** पुच्छशून्यमर्कटः मर्कटसमानो वा अस्मि। एवंभूतम् एनं नरवानरं मां पदे पदे कालदण्डेन **संताड्य** तस्य **दशनविवृतिम्**; दैन्येन तत्कृतं दन्तप्रकटनं मां पश्यतः ते किं फलं अस्ति?।

लोके शैलूषादिनिहीनजनः स्वजीविकार्थं जालेन मादृशं कीशं पाशेन बध्वा प्रतिग्रामं प्रतिद्वारं समाकृष्य तत्र तत्र अभिनयं कारयित्वा तां तां भिक्षामादाय उपजीव्येत्। तस्य हि तज्जन्तुहिंसा स्वाभाविकी, सप्रयोजना च भवेत्। शंभुं प्रस्तुत्याह **श्रुतिः**—

"भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥"[१]

इति। भोगादिसकलनिरपृहस्य तव मद्दुःखकरणेन किं वा फलमस्तीति भावः। तस्मात् किमेभिः पल्लवितैः

---

**१ भोगार्थमिति। भोगार्थं, क्रीडार्थमिति च अन्ये सृष्टिं मन्यन्ते। अनयोः पक्षयोः दूषणम्, देवस्य एष स्वभावः, अयमिति देवस्य स्वभावपक्षमाश्रित्य सर्वेषां वा पक्षाणाम् आप्तकामस्य का स्पृहा इति। न हि रज्ज्वादीनाम् अविद्यास्वभावव्यतिरेकेण सर्पाद्याभासत्वे कारणं शक्यं वक्तुम् इत्यस्याः कारिकाया भाष्यम्।**

ज्वनैः मर्कटस्वभावोऽपि अयं रक्षणीय इति भावः। अत्र विशेषणबलात् स्वस्मिन् दीनशाखामृगतामारोप्य ज्ञानविवृत्त्यादिधर्मेण अनुरञ्जनात् **रूपकालंकारः**। तल्लक्षणं तु—

"विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।
रूपकं तत् . . . . . . ॥"

इति ॥ ३३ ॥

**माता तातः सुत इति समाबध्य मां मोहपाशै-**
**रापात्यैवं भवजलनिधौ हा किमीश त्वयाप्तम्।**
**एतावन्तं समयमियतीमार्त्तिमापादितेऽस्मिन्**
**कल्याणी ते किमिति न कृपा कापि मे भाग्यरेखा ॥ ३४ ॥**

**मातेति**। हे ईश! परमशिव! **माता तातः सुतः** इति; माति परिमिनोति गर्भे इति माता, "मा माने" इति **धातुः**; तनोति कुलमिति तातः, "तनु विस्तारे" इति **धातुः**; सौति एनं मातेति सुतः, "षु प्रसवैश्वर्ययोः" इति **धातुः**। इतिशब्देन जायामातुलादयो गृह्यन्ते। मात्रादिबन्धुवर्गेषु स्नेहवशात् यो **मोहः**, स एव पाशः, तेन **मोहपाशेन माम् समाबध्य भवजलनिधौ**; संसारसमुद्रे, **आपात्य**; सम्यक् पातयित्वा, **त्वया**; किं फलम् अवाप्तम्?। **हेति** विषादे। "तिरोऽन्तर्धौ तिर्यगर्थे हा विषादशुगार्त्तिषु" इति **कोशः**। सार्वभौममृगयाद्यूतादिवत् फलाभावेऽपि लीलामात्रतया मयि एवं क्रियतां नाम। **एतावन्तं समयम्**; अद्यतनपर्यन्तम्, **इयतीम्**, **आर्त्तिं** पीडाम् **आपादिते** संपादितेऽपि **अस्मिन्**; नरे; **कल्याणी**; कल्यं सुखं अणति प्रापयतीति कल्याणी नित्यशोभना **ते कृपा किमिति** न? अथापि **मे कापि**; अनिर्वचनीया, **भाग्यरेखा**; भव्यशंसिनी फाललिपिरपि किमिति नास्ति?—

"पुण्यैर्देवत्वमाप्नोति पापैः स्थावरतामियात्।
समाभ्यां पुण्यपापाभ्यां मानुष्यं प्राप्नुयान्नरः॥"

इति **पुराणवचनात्**। मानुष्ये जन्मनि अस्मिन् पापाधिक्येऽपि क्वचित् कोणे पुण्यलेशोऽपि नास्ति किम्? अस्ति चेत् अपि त्वत्कृपा नायाति किमिति भावः।

अन्वयः—हे ईश! माता तातः सुत इति मां मोहपाशेन समाबध्य भवजलनिधौ आपात्य त्वया किमवाप्तम्? हा कष्टम्! एतावन्तं समयम् इयतीम् आर्त्तिमापादिते अस्मिन् कल्याणी ते कृपा किमिति न भवति? अथ वा कापि मे भाग्यरेखा वा किमिति नास्ति? ॥ ३४ ॥

एवमतिदुःखेन विलप्य पुनः चक्षुरुन्मील्य व्यवहारदशापि अहं त्वया रक्षणीय एव, नो चेत् लोकापवादापहासयोः आस्पदं भवतीत्याह—

**भुङ्क्षे गुप्तं बत सुखनिधिं तात साधारणं त्वं**
**भिक्षावृत्तिं परमभिनयन् मायया मां विभज्य ।**
**मर्यादायाः सकलजगतां नायकः स्थापकस्त्वं**
**युक्तं किं तद्वद विभजनं योजय स्वात्मना माम् ॥ ३५ ॥**

**भुङ्क्षे** इति । हे **तात**! जनक! **त्वम्** आवयोः, उभयोः **साधारणम्**; समानम् आधारणमस्येति साधारणम्, समुदायमित्यर्थः । **गुप्तम्**; कुत्रापि निगूढदेशे स्थापितं सुखनिधिम्, सुखानि वैषयिकानि शब्द-स्पर्शादिसंसर्गसमुद्भवानि श्रुत्युक्तसार्वभौमादि ब्राह्मपदान्तसुखानि; "अन्यानि भूतानि मात्रामुपजीवन्ति"[१] इति **श्रुतेः** । सर्वाणि सुखानि अस्मिन् निधीयन्ते इति **सुखनिधिः**, तम्; आवयोः भोगार्हं **स्वयमेव** भुङ्क्षे । सुखनिधिम् अनुभवसि किं कुर्वन्? **भिक्षावृत्तिम्**; भिक्षान्नमेव वृत्तिः जीवनं ताम्, **परम्**, नितराम्, **अभिनयन्**; न हि ते भिक्षैव वृत्तिः जीवनम् ।

"यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः ।
मृत्युर्यस्योपसेचनं क इद्धा वेद यत्र सः ॥"[२]

इति; "यः सर्वान् लोकान् संभक्षः संभक्षत्यजस्रं सृजति विसृजति वासयति तस्मादुच्यते महेश्वरः" इति;[३] "तस्मै रुद्राय महाग्रासाय महेश्वराय नमः" इति च **श्रुतिभिः**; "अत्ता चराचरग्रहणात्" इति **ब्रह्मसूत्राच्च** ।[४] अपि च—महेशस्य तव भिक्षाप्रदानशक्तिः न कस्याप्यस्ति । तदपि देवासुरकुलगर्वभङ्गाय, दारुकावनमुनिजनज्ञानदानाय च कृतं भिक्षाटनद्वयमपि जीवनार्थमिति न प्रतीयते । किं तु जगद्धितायैवेति **पुराणैरव**गम्यते ।

ननु—कदाचित् ब्रह्मशिरच्छेदाघनिर्हरणाय विधिविहितद्वादशवार्षिककपालभिक्षाम् अटाटीदिति किं वदन्त्याह, किमुत्तरमिति चेत्; उच्यते—पुरा कल्पादौ परमेश्वरस्य वीर्यं शक्त्यंशेन हरिणा गृहीतम् । कालेन पञ्चमुखहैरण्यगर्भरूपेण परिणतं सत् हरेः नाभिरन्ध्रात् निर्गतं तस्य विधेः, पश्चात् जातु श्रीकैलासयात्रायां श्रीगौरी हराकारं विधिं विलोक्य, तवैकं शिरः पततु इत्यशपत् ।

---

१ "एतस्यैव ब्रह्मानन्दस्य मात्रां कलां विषयेन्द्रियसंबन्धकाले विभाव्यमानाम्, अन्याविद्यकाति ब्रह्मादिस्तम्ब-पर्यन्तानि भूतानि उपजीवन्ति उपभुज्यते अन्यस्य अभवादित्यर्थः; इति ।

२ यस्येति । सर्वधर्मविधारकत्वेन सर्वत्राणनशक्ती ब्रह्मक्षत्रे । तदुपलक्षितव्यष्टिसमष्ट्यात्मकस्वाविद्यापदतत्कार्य-जाते उभे अपि यस्य आत्मनः ओदनः अशनं भवतः । आत्मनः स्वाविद्यापदतत्कार्यग्रासत्वात् । य एवम् अनृतजडदुःखात्म-काविद्यापदतत्कार्यजातं ग्रसति, सोऽयं मृत्युः व्यष्टिसमष्टिसाक्षिनिष्प्रतियोगिक ब्रह्ममात्रस्य उपसेचनं भवति । एतादृशः सोऽयमात्मा यत्र क्व आभासज्ञानी क? कथमेतं पारमार्थिकज्ञानीव ज्ञात्वा आभासज्ञानी तत्पदं भजति? तस्मात् पारमार्थिकज्ञान्येव सर्वापह्नवसिद्धं ब्रह्म स्वमात्रामिति तद्वेदनसमकालमेव तद्याथात्म्यतया अवशिष्यत इत्यर्थः ।

३ यः स्वाज्ञदृष्टिविकल्पितसर्वलोकात् अजस्रं स्वदृष्ट्या संभक्षः उपसंहर्ता सन् संभक्षयति स्वात्मात्रावशिष्टान् करोति, अजस्रं सृजति, विसृजति, वासयति इत्युक्तार्थम् । एवं यः स्वमात्रमवशिष्यते स एव महेश्वरः इत्यर्थः ।

४ अत्तेति । अत्ता संहर्ता परमेश्वरः । कुतः? चराचरग्रहणात्, "यस्य ब्रह्म च" इत्यादिना चराचरस्य जङ्गम-स्थावर स्य ग्रहणं स्वीकरणं तस्मात् इति ।

तदनु, 'हरिविधिविवादसमयानृतभाषणतः त्वमपूज्यो भवेदिति हरेण शप्तः सन् क्रोधेन भगवन्तं प्रति अमङ्गलवचांसि विलपन्तं भैरवः तत्प्रधानम् ऊर्ध्वशिरः करनखरेण उच्छिद्य वैकुण्ठे रक्तभिक्षामचरत् । तदा कपालस्य अपूर्णतया पुनः कृष्णावतारे भारतयुद्धे भिक्षामात्रं पूरयामास' इति कथा अवलोकनीया । तर्हि कस्य वान्यस्य भिक्षाप्रदानशक्तिरस्तीति भावः ।

अपि च—हरस्य भिक्षादनं ब्रह्महत्या अघनिवृत्त्यर्थमित्येतदपहासास्पदं न किम्? **विष्णुपुराणे**—

[1] "संहृत्य सर्वभूतानि देवादीन्यविशेषतः ।
नृत्यत्यन्ते च यद्रूपं तस्मै रुद्रात्मने नमः ॥"

इति अविशेषेण ब्रह्मविष्ण्वादिचेतनशरीरं सर्वं निटिलनयनाग्निस्फुलिङ्गेन कल्पान्तेक्षणात् दग्ध्वा नृत्यतो रुद्रस्य कस्यचिद् ब्रह्मण एकशिरोलवनं कियदिति भावः ।

दारुकावने निजशक्त्यंशेन विष्णुना सह अन्नभिक्षामेवाग्रहीत् । तत्रोभयत्रापि अशनं न प्रतीयते । अत एवोक्तम्, 'भिक्षामभिनयन्' इति । अत्र—

"अन्नपतेऽन्नस्य नो दे(धे)हि; अनमीवस्य शुष्मिणः ।
(प्र)प्रदातारं तारिषः । ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥"

इति **श्रुत्या** सर्वस्य अन्नदातुः को वा अन्नादो भवेदिति भावः । तस्मात् अभिनयमात्रं भिक्षाटनमित्यर्थः ।

किं कृत्वैवमित्यत्राह—**माययेति** । मायया वञ्चनया कौटिल्येन मां विभज्य वित्तक्षेत्रमणिभूषणादि-सर्वं वस्तु एकस्य तव भागः, उत्तमर्णैः निर्भर्त्स्यमानदुःसहम् ऋणम् एकस्य मम भाग इति द्वेधाकृत्वा मां विभज्य । यद्वा—मायया अपरपर्यायया अविद्यया सह स्वतन्त्रमायोपाधिक ईश्वरः; अविद्यापरतन्त्रो जीव इति व्यवस्थितेः । **अविद्यया अज्ञानेन** सह मां विभज्य स्वयं वशीकृतमायः सन् सर्वज्ञत्वाद्यैश्वर्ययुतः, मामविद्यावशगं कृत्वेत्यर्थः । स्वयं पूर्णसुखमेव भुङ्क्षे । अन्वेति खेदे । स्वजनतस्करेण सहैव स्थित्वा सर्वस्वाक्रमणे कस्य खेदो न भवेदिति भावः ।

भवतु एवमज्ञानदशाकृतविभागः । न्यायशास्त्राणि प्रभवश्च सन्ति शतश इति चेत्, न; सर्वमपि शास्त्रं त्वदधीनमेवेति दृश्यते । अत्र—

"यथार्द्रैन्धनाग्नेरभ्याहितस्य पृथग् धूमं विनिश्चरन्ति,
एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद्,
यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासपुराणम् ॥"

---

१- संभक्ष्य सर्वभूतानि इति मुद्रितपाठः

इति **श्रुत्या**,[१] “शास्त्रयोनित्वात्” इति **ब्रह्मसूत्राच्च**;[२]

“ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातितीर्थमहेश्वरम् ॥ ”

इति **वेदभाष्यकारसूक्तेश्च** सर्वशास्त्रस्य त्वत्प्रभवत्वे सति तच्छास्त्रं त्वत्पक्षपाति, उत निष्पक्षपाति वा न जाने; बत! ।

अथ प्रभवः बहवः सन्ति, तेभ्यः दुःखं विज्ञापयामीति चेत्, तेऽपि संभूय त्वामेव महाप्रभुं डिण्डिमघोषेण घुष्यन्ति ;

“ तमीश्वराणां परमं महेश्वरं
तं दैवतानां परमं च दैवतम् ”

इति **श्रुतिः; भारते आनुशासतिके**—

“ यस्य ब्रह्मा च विष्णुश्च त्वं च शक्र सहासुरैः ।
अर्चयध्वे सदालिङ्गं तस्माच्छ्रेष्ठतरो हि कः ॥ ”

इति । तत्रैव **मुकुन्दः**—

---

१ यथा दुन्दुभिशङ्खादिशब्दानां शब्दमात्रं सामान्यम्, एवं प्रज्ञानविकल्पितभावानां स्वाङ्गदृष्ट्या जन्मस्थितिभङ्गवतामपि स्वाङ्गदृष्ट्या प्रज्ञानमात्रमिति प्रकटयति—यथेति । स यथा आर्द्रैं एधोभिः इद्धः अग्निः आर्द्रैधाग्निः । तस्मात् अग्नेः अभ्याहितात् पृथक् धूमविस्फुलिङ्गादयः विनिश्चरन्ति निर्गच्छन्ति । तथैवं वा अरे अस्य महतः भूतस्य प्रकृतात्मनः निःश्वसितमेतत् । यथा प्रयत्नतः पुरुषनिःश्वासो भवति तथा निःश्वसितमेतत् आविर्भूतम् । किं तत्? इत्यत्र यत् चतुर्विधमन्त्रजाम्, ऋग्वेद इत्यादि । उर्वशीपूरूरवसोः संवादादिः इतिहासः । “असद्वा इदमग्र आसीत्” इत्यादिपुराणम् । देवयजनादिः विद्या । “आत्मेत्येवोपासीत” इत्याद्या उपनिषदः । “तदेते श्लोका भवन्ति” इति ब्राह्मणप्रभवमन्त्राः श्लोकाः । “आत्मानमेवावेदं ब्रह्मास्मि” इति, “ब्रह्मविदाप्नोति परम्” इत्यादिवस्तुसंग्रहवाक्यानि सूत्राणि । मन्त्रविवरणानि अनुव्याख्यानानि, वस्तुसंग्रहवाक्यविवरणानि वा । यथा, “आत्मेत्येवोपासीत” “न स वेद यथा पशुः” इत्यादितृतीयाध्यायगतसंग्रहवाक्यस्य चतुर्थाध्यायः । केवलमन्त्रविवरणानि व्याख्यातानि वेदाभिव्यक्तिः पुरुषनिःश्वासवत् । न हि पुरुषबुद्धिप्रयत्नपूर्वकः, अतः स्वार्थे प्रमाणनिरपेक्ष एव । तस्मात् वेदेन यदुक्तं तत् श्रेयोऽर्थिभिः प्रतिपत्तव्यम् । एवमुक्तानुक्तानि सर्वाणि निःश्वसितानि अग्निविस्फुलिङ्गादिवत् स्वकाले प्रादुर्भवन्तीत्यर्थः” इति तत्रत्यानां मन्त्राणामर्थः ।

२ सत्यज्ञानादिरूपस्य ब्रह्मणः विसदृशजगज्जन्मादिकारणत्वं तटस्थलक्षणमुक्तम्, अर्थात् सर्वज्ञता च । इदानीं वेदस्य अजायमानत्वेन तामाक्षिप्य, “अस्य महतः” इत्यादिवाक्यात् वेदजन्मनः प्रतीतेरुक्तां सर्वज्ञतां समाधत्ते—शास्त्रयोनित्वात् इति । विचित्रस्य ऋग्वेदादेः योनिः कारणं तस्य भावः तत्वं तस्मात् । शास्त्रमिति ;

“ प्रवृत्तिश्च निवृत्तिश्च पुंसां येनोपदिश्यते ।
तद्धर्माश्चोपदिश्यन्ते शास्त्रं शास्त्रविदो विदुः ॥ ”

इत्युक्तलक्षणम् ॥

"अहमात्मा हि लोकानां सर्वेषां पाण्डुनन्दन।
तस्मादात्मानमेवाग्रे रुद्रं संपूजयाम्यहम्॥
यद्यहं नार्चयेयं वै ईशानं भुवनेश्वरम्।
आत्मानं नार्चयेत् कश्चिदिति मे भावितं मनः॥"

इति। **कौर्मे**ऽपि—

"कर्ताहं सर्वलोकस्य मम कर्ता महेश्वरः।
तस्य देवाधिदेवस्य कर्ता कोऽपि न विद्यते॥"

इति। **सर्वं** शास्त्रं त्वत्पक्ष एवेति प्रतिभाति। त्वत्तोऽधिकः प्रभुरपि नास्ति। बत बत; एवं मनसि निधाय पुनः पृच्छति—हे तात! सकलजगतां षड्भावविकारान् गच्छन्तीति जगन्ति सकलानि जगन्ति सकलजगन्ति, तेषां भुवनानां त्वम् एक एव **नायकः** प्रभुः असि। अपि च—**मर्यादायाः**; मर्येति सीमार्थे अव्ययम्; तस्मात् दीयत इति मर्यादा। यस्य कस्यचित् यावद्धनम्, अधिकारो वा स्वाचारादीनि च तानि अनतिक्रम्य तैस्तैः वर्तितव्यमिति; "अतिक्रमे शिक्षा भवेत्" इत्यादिश्रुत्यादिशास्त्रं सर्वं त्वयैव यतः पुरा स्थापितम्, ततः मर्यादाया स्थापकश्चासि।

इदं च विरुद्धम्—

"एष सेतुर्विधरण एषां लोकानामसंभेदाय" इति **श्रुत्या**[१] सर्वजनविदितमेव। सत्येवं सकलजगतां नायकस्य, सकलशास्त्रनिदानस्य, भक्तकुलपालकस्य, सर्वज्ञत्वादिसकलकल्याणगुणशीलस्य, साम्बस्य ससुतविलासस्य, संततसमाधिपरब्रह्मनिष्ठगरिष्ठसनकादिमहामुनिसंघसंवीतस्य, वेदान्तवेद्यस्य, दयानिधेः भगवतः तव महादीर्घसुखमेकस्य, नित्यदुःखमेकस्येति वैषम्येण कृतमिदं विभजनं युक्तं किम्? त्वं वा वद; पूर्वोक्तहेतुभिः युक्तमेवेति त्वयापि वक्तुमशक्यमित्यर्थः। यतः त्वद्वाचकं प्रणवाख्यं ब्रह्म वैदिकैः एवमभ्यर्थ्यते—

"मधु वा ता ऋतायते; मधु क्षरन्ति सिन्धवः;
माध्वीर्नः सन्त्वोषधीः; मधु नक्तमुतोषसि;
मधुमत्पार्थिवꣳरजः; मधु द्यौरस्तु नः पिता;
मधुमान् नो वनस्पतिः; मधु माꣳ अस्तु सूर्यः;
माध्वीर्गावो भवन्तु नः"

इति; "जिह्वा मे मधुमत्तमा" इति च प्रार्थ्यसे मधुवत् सर्वं प्रियमेवास्तु इति वाक्यार्थः। तादृशः त्वम्; अयमन्यायविभागोऽपि न्याय एवेति कथं वा वक्ष्यसीति भावः।

---

**१. एष सेतुर्विधः, सर्वविधारयितृत्वात्। किमर्थम्? एषाम् - सत्यादि चतुर्दशलोकानाम् असंभेदाय असांकर्याय परमेश्वर एव सेतुरिव सेतुः। ततद्वर्णाश्रमादिमर्यादापालकत्वात् सेतुत्वं युज्यते इत्यस्य श्रुतिवाक्यस्य तात्पर्यार्थः।**

किं च—आवयोः चिरानुभवसिद्धं तत् स्वमद्य अनन्यथयितुमशक्यमिति चेत् न; तातसुतयोः व्यवहारस्य नित्यत्वात् अज्ञदशाकृतविभागस्य चासिद्धेः। तस्मात् तच्छास्त्रलोकसिद्धोऽयं दोषः परिहरणीय एव। तत्र क उपायः? इति चेत्; विज्ञप्तिं शृणु। गतं तु गतमेव, तत् तिष्ठतु। इदानीं स्वात्मना सहैव मां योजय एकीभावं कारय। हे तात! तत्त्वंशब्दार्थभूतयोः शिवजीवयोः आवयोः ऐक्ये तु तव न कापि हानिर्भवेत्। तव शास्त्रलोकापवादनिवृत्तिफलं च भवति। मम तु पारमार्थिकस्वरूपावाप्त्या कृतकृत्यता च भवति। अहो तादृग्भाग्यम् अवाप्स्ये किं नु?। उक्तं हि **आत्मबोधो**पनिषदि—

“आत्मानञ्जसा वेद्मि क्वाप्यज्ञानं पलायितम्।
कर्तृत्वमद्य मे नष्टं कर्तव्यं वा न मे क्वचित्॥[1]
ब्राह्मण्यं कुलगोत्रे च नामसौन्दर्यं जातयः।
स्थूलदेहगता एते स्थूलाद् भिन्नस्य मे न हि॥
क्षुत्पिपासान्ध्यबाधिर्यं कामक्रोधादयो गुणाः।
लिङ्गदेहगता एते लिङ्गाद् भिन्नस्य मे नहि॥[2]
येन सम्यग् परिज्ञाय हेयोपादेयमुज्झता।
चित्तस्यान्तेऽर्पितं चित्तं जीवितं तस्य शोभते॥”

इति सर्वसंसारदुःखविनाशेन निन्यतृप्तः त्वमेवाहमिति घटाकाशमहाकाशवत् एकीभवेयम्, नान्यत् किंचिदपि याचे इति भावः।

अन्वयः—हे तात! त्वं मायया मां विभज्य भिक्षावृत्तिं परम् आभिनयन् सागारगं गुप्तं सुखनिधिं भुङ्क्षे। त्वं सकलजगतां नायकः। मर्यादाया स्थापकश्चासि। तस्य ते मद्विभाजनमिदं युक्तं किं वद? आत्मना सहैव योजय।

अत्र **पूर्वरूपाप्त्यलंकारः**; तल्लक्षणं तु—“पुनःस्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतम्” इति। सुखस्य निधित्वेन रूपणात् **रूपकालंकारः**; अस्य लक्षणं प्रागुक्तमेव। स्वात्मना योजयेदिति लोकप्रवादानुकरणात् **लोकोक्त्यलंकारः** तल्लक्षणं तु—“लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते” इति। प्रस्तुतव्यवहारस्य तातेति साभिप्रायविशेष्यात् **परिकराङ्कुरालंकारः**; तल्लक्षणं तु—“साभिप्राये विशेष्ये तु भवेत् परिकराङ्कुरः” इति। आपाततः प्रतीयमाननिन्दायाः स्तुतिपर्यवसायात् **व्याजस्तुत्यलंकारः**; तल्लक्षणं तु—उक्तिर्व्याजस्तुतिर्निन्दा-स्तुतिभ्यां स्तुतिनिन्दयोः” इति। एतेषां संसृष्टिश्च॥ **३५**॥

---

१. वापि न क्वचित् इति मु० पाठः
२. ह्यलिङ्गस्य न विद्यते इति मु० पाठः

रे दास मया सह एवं व्यवहरतः ते नेदानीं मुक्तिदानमभिप्रेयते, परं तु कालान्तरे पश्यामीति चेद् अस्तु नाम, तावकजनसंसर्गयोग्यदेशेषु शतं सहस्रं वा जन्मास्त्विति विज्ञापयति—

**न त्वा जन्मप्रचयजलधेरुद्धरामीति चेद्धी-**
**रास्तां तन्मे भवतु च जनिर्यत्र कुत्रापि जातौ ।**
**त्वद्भक्तानामनितरसुखैः पादधूलीकिशोरै-**
**रारब्धं मे भवतु भगवन् भावि सर्वं शरीरम् ॥ ३६ ॥**

**न त्वामिति ।** हे **भगवन्! त्वा,** त्वाम् ; **जन्मप्रचयजलधेः** ; विविधजन्मनां प्रचयः समूहः, स एव जलधिरिव जलधिः, तस्मात् संसारसमुद्रात् न इदानीम् उद्धरामि, उद्धर्तुं नेच्छामीति **धीः** तव बुद्धिरस्ति **चेत्** तद् **आस्ताम्** । शिवसंकल्पं विना तृणमपि न चलेदेव ; तस्मात् **मे जनिः** उत्पत्तिः , **यत्र कुत्रापि जातौ भवतु च** । भवदिच्छानुसारेण **भावि** पश्चात् मया प्राप्तव्यं सर्वं शरीरम् । "अस्ति, जायते, वर्धते, विपरिणमते, अपक्षीयते, विनश्यति" इति विकारषट्कयुतं शीर्यत् स्वभावं सर्वं शरीरमित्यर्थः । **त्वद्भक्तानाम्** ; श्रीगौतमागस्त्यभृगुदधीचोपमन्युमहर्षिमुखानां श्रीनन्दिभृङ्ग्यादीनां वा ; **अनितरसुखैः** ; वैषयिकसुखानि दुःखशिरस्कानि इतराणि सुखानि न विद्यन्ते इतरसुखानि येषां तैः । **त्वद्भक्तानां पादधूलीकिशोरैः** ; भक्तचरणतलसंसक्तधूलयः पांसवः तेषां किशोरैः अर्भकैः परमाणुकणैरित्यर्थः । **मे सर्वं शरीरम् आरब्धं भवतु** । आश्लिष्टमिति पाठान्तरम् ।

यद्यपि—शरीरारम्भणं साधनं सर्वमपि प्राक् शरीरोत्क्रान्तिसमय एव सारांशतया गृहीत्वा आयातीति ; अत्र **श्रुतिः**—

"तद्यथा पेशस्कारी पेशसो मात्रामुपादाय अन्यं नवतरं कल्याणतरं रूपं कुरुते ; एवमेवायमात्मा इदं शरीरं निहत्य अविद्यां गमयित्वा अन्यं नवतरं कल्याणतरं रूपं कुरुते ; पित्र्यं वा गान्धर्वं वा प्राजापत्यं वा अन्येषां वा भूतानाम्" इति[1] । "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्"

---

१ किं नित्योपात्तमेव उपदानमुपसंहृत्य पुनर्देहान्तरं स्वीकरोति ? यद्वा पूर्वोपचितमेव पुनरादत्ते ? इत्यत्र दृष्टान्तमाह—तद्यथेति । तत् तत्र यथा पेशः सुवर्णं करोतीति पेशस्कारी स्वर्णकारः पेशासो मात्रामेकदेशमुपादाय पूर्वरचनापेक्षया

इति **ब्रह्मसूत्राच्च**[2] शरीरान्तरारम्भसाधनमात्मसमवाय्येव । तथापि स्थूलस्य पितृमातृभुक्तान्नपानादिप्रसक्तं शिवभक्तपादरजसा आरब्धं वर्धितं चेदपि तन्मुक्तिसुखप्रायमेवेति भावः ।

आलिप्तमिति पाठे तु—बाल्ये पांसुक्रीडासमये महाब्राह्मणपादधूलिसंसक्तं शरीरं भवेदिति, एतत्समञ्जसमेव सेत्स्यति । सद्ब्राह्मणपादपांसुमहिमा श्रूयते हि—

" समस्तसंपत्समवाप्तिहेतवः
समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः
पुनन्तु मां ब्राह्मणपादपांसवः ॥ "

इति । तस्मात् शिवज्ञानिसविधे जन्मानि भवन्त्विति भावः । अत्र यत्र कुत्रापि इत्यविशेषेण जन्माङ्गीकारात् दोषेऽपि शिवभक्तिहेतुत्वेन तत्रैव गुणदर्शनात् **अनुज्ञालंकारः** ; तल्लक्षणं तु—दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्" इति ॥ ३६ ॥

ननु—कुत्र कीदृग्जन्म वा अपेक्षसे इत्यत आह—

**कीटा नागास्तरव इति वा किं न सन्ति स्थलेषु**
**त्वत्पादाम्भोरुहपरिमलोद्वाहिमन्दानिलेषु ।**
**तेष्वेकं वा सृज पुनरिमं नाथ दीनार्त्तिहारिन्**
**आ तोषान्मां मृड भवमहाङ्गारनद्यां लुठन्तम् ॥ ३७ ॥**

**कीटा** इति । हे नाथ ! **त्वत्पादाम्भोरुहपरिमलोद्वाहिमन्दानिलेषु ;** तव पादावेव अम्भोरुहे तामरसे तयोः परिमलं सौगन्ध्यम् उद्वहतीति त्वत्पादाम्भोरुहपरिमलोद्वाही, स च मन्दानिलः मलयमारुतः

---

अन्यत् नवतरं कल्याणादपि कल्याणतरं रूपं तनुते निर्मिनोति एवमेवेत्यादि पूर्ववत् ; " द्वे वाव ब्रह्मणो रूपे " इत्युक्तरीत्या यानि पृथिव्यादि पञ्चभूतानि पेशस्थानीयानि तानि उपमृद्य उपमृद्य उपमृद्य अन्यद् अन्यच्च नवतरं कल्याणतरं देहान्तररूपं कुरुते । तत् किम् ? पितृभ्यो हितं तल्लोकभोगयोग्यं पित्र्यं वा ; तथा गन्धर्वाणाम् उपभोग्ययोग्यं गान्धर्वं वा ; तथा देवानां दैवम् ; प्रजापतेः प्राजापत्यम् ; तथा ब्रह्मण इदं ब्राह्मं वा ; यथाकर्म यथाश्रुतम् अन्येषांवा भूतानां संबन्धि शरीरान्तरं कुरुते इत्यनुषज्यते इत्यस्या श्रुतेस्तात्पर्यार्थः ।

२ तदन्तरप्रतिपत्तौ ; देहान्तरप्राप्तौ देहबीजभूतैः भूतसूक्ष्मैः संपरिष्वक्तः वेष्टितः रंहति गच्छति ; भूतमात्राणां सर्वत्र सुलभत्वेऽपि देहबीजभूतानां न सौलभ्यम् । कुतः ? प्रश्ननिरूपणाभ्याम् ; प्रश्नः तावदित्थम्—" वेत्थ यथा पञ्चम्याम् " इति । निरूपणं प्रतिवचनम्—द्युपर्जन्यपृथिव्यादि । विस्तरस्तु भाष्यादौ द्रष्टव्यः ।

...नां, तेषु **स्थलेषु** ; भूमिषु, **कीटाः** ; भूविवरमग्नाः सूक्ष्मजन्तवः, **नागाः** ; न गच्छन्तीति नगाः गिरयः ; ...न्यः ; समुत्पन्नाः नागा भुजङ्गविशेषाः । **तरवः** ; तरन्ति आतपक्लेशम् एभिरिति तरवः । " तॄ प्लवनतरणयोः " इति **धातुः** । एवं कीटाः, नागाः, यूकाः, दंशाः, तरवः, जन्तवः, किं वा कति वा न सन्ति? सर्वतः सन्त्येवेत्यर्थः । तेषु पुरोदितस्थलेषु, **तेषु** जन्तुषु ; हे **मृड** ! **दिनार्तिहारिन्** ! **भवमहाङ्गारनद्याम्** ; संसाराग्निज्वालोद्वणायां वैतरिण्याम् हा हेति **लुठन्तम् एनम्** ; माम्, **ते** तव, **आ तोषात्** ; त्वत्संतुष्टिपर्यन्तम्, यथाकथंचित् तव संतुष्टिरेव हि कार्या । परमेश्वरप्रीत्यर्थमिति संकल्पः सार्थो भवेत् । तस्मात् यत्र कुत्रापि त्वद्भक्तचणसंनिधानवासिषु तरुगुल्मादिषु जन्तुषु तृप्तिपर्यन्तं सृज । जन्म मास्त्वित्युक्ते को वा जहातीति भावः ।

अन्वयः—त्वत्पादाम्भोरुहपरिमलोद्वाहिमन्दानिलेषु स्थलेषु कीटा नागास्तरव इति किं न सन्ति? हे मृड ! दीनार्तिहारिन् ! भवमहाङ्गारनद्यां लुठन्तम् इमम् तेषु एकं वा आ तोषात् पुनः पुनः सृजेत्यर्थः ॥ ३७ ॥

प्रस्तुतस्यारब्धस्य देहस्य अवसानं सिद्धवत्कृत्य तत्कालभयहरम् अन्तकान्तकमेवमभ्यर्थयति—

**काले कण्ठस्फुरदसुकलालेशसत्तावलोक-**
**[1]व्यग्रोदग्रव्यसनिसकलस्निग्धरुद्धोपकण्ठे ।**
**अन्तस्तोदैरवधिरहितामार्तिमापद्यमाने-**
**ऽप्यङ्घ्रिद्वंद्वे तव निविशतामन्तरात्मन् ममात्मा ॥ ३८ ॥**

**काले** इति । हे **अन्तरात्मन्** ! कूटस्थचैतन्यस्वरूप ! कण्ठस्फुरदसुकलालेशसत्तावलोकव्यग्रोदग्रव्यसनिसकलस्निग्धरुद्धोपकण्ठे ; कणतीति **कण्ठः** ; " कणशब्दे " इति **धातुः** । कण्ठे **स्फुरत् असुः** ; प्राणवायुः, तस्य **कला** सूक्ष्मचलनरूपा ; तस्या **लेशस्तु** अतिसूक्ष्मचलनम्, तस्य **सत्तायाः** ; सद्भावस्य, **अवलोके व्यग्राः** ; जागरूकाः, अत एव उदग्रम् अधिकं व्यसनं येषां ते, **उदग्रव्यसनिनः**, सकलास्च ते स्निग्धाः **सकलस्निग्धाः** तैः निरुद्धः **उपकण्ठः** कण्ठसमीपं गतः यस्मिन्, तस्मिन् । **अवधिरहितैः** ; निरवधिकैः, **अन्तस्तोदैः** ; " तुद हिंसायाम् " इति **धातुः** । ऊर्ध्वश्वासकण्ठतालुजिह्वाशोषणहिक्काश्लेष्मरोधाङ्गव्यथा, जायासुतादिधनप्रश्नव्यथा, सर्पवृश्चिककूपाङ्गारावटपतनस्वप्नमूर्च्छामृत्युभटदर्शनमित्येवमादिभिः अवधिरहितैश्च अन्तस्तोदैः ; **आर्तिम्** पीडाम्, **आपद्यमाने** ; संपाद्यमानेऽपि, **काले** ; चरमश्वाससमये **मम आत्मा** अन्तःकरणम् **तव अङ्घ्रिद्वंद्वे** निविशताम्, **प्रविशेत्** । प्रविश्य च जीवात्मपरमात्मनोः एकीभावरूपां परां मुक्तिं प्राप्स्ये इत्यर्थः ।

ननु—जीवब्रह्मणोः ऐक्यं कथंभूतम्? पुनरेकीभूतस्य जीवात्मनोः न पुनरावृत्तिः भवेत् । तदैक्यं किमिति चेत्; उच्यते ; अत्र वादिनः बहुधा विवदन्ते ; तद्यथा—क्षीरनीरयोः संसर्गेण एकीभाव इति चेत्, न ; हंसादिना विभज्यमानत्वात् । अथ गरुडमान्त्रिकयोः भावनातिशयेन ऐक्यवदिति चेत्, न ; सुप्त्यादौ

---

१ व्यग्रोदग्रव्यसनरुदितस्निग्ध० इति क्वचित्पाठः ।

भावनाविच्छेदे पूर्वरूपत्वापत्तेः। अग्नितप्तायःपिण्डवच्च न; वह्निशान्तौ अयसः कार्ष्ण्यादिवत् जीवस्य पुनः दुःखित्वादिसंभवात्।

यद्वा—ग्रहाविष्टजनवदेकत्वमपि न; तदैक्यस्य कादाचित्कत्वात्। आहोस्वित् रविकिरणावच्छिन्नदीपप्रकाशवदेकीभाववच्च न; तारतम्येन प्रकाशद्वयस्य दर्शनवत्; किंचिज्ज्ञत्वसर्वज्ञत्वादिवैलक्षण्यसद्भावात्। स्वामिभृत्ययोः भोगसाम्येन ऐक्यवदिति चेत्, न; सदा सभयजीवनस्य जीवस्य मुक्तिसुखवार्ताभावात्। गोगवययोरिव जीवस्येश्वरसाम्यमात्रेणैक्यं च न; इदम् अनेन सदृशमिति वस्तुद्वंद्वदर्शनात्। सुरतसुखपरवशमिथुनाविनाभाववच्च न युज्यते; व्याध्याद्युपप्लवे सति भोगविच्छेदाद् ऐक्यविच्छेदाच्च।

यद्वा—मृद्घटन्यायेन करणस्यैव कार्यात्मना अवस्थानात् एकत्वमित्यपि न;

"स एव मायापरिमोहितात्मा

शरीरमास्थाय करोति सर्वम्" [१]

इति श्रुतेः; "अवस्थितेरिति काशकृत्स्नः" इति ब्रह्मसूत्राच्च;[२] जीवस्य कार्यत्वाभावात्। नीलोत्पलादौ गुणगुणिनोरैक्यवच्च न; "संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः" इत्याचार्यसूक्तेः। पुरुषतच्छायाबिम्बप्रतिबिम्बस्थाणुपुरुषादेरिव ऐक्यमिति च न। तत्र च्छायाप्रतिबिम्बपुरुषादेः मृषात्वेन सत्येन स्वाधिष्ठानेन कथमैक्यं गच्छेत्? समसत्ताकयोरेव वस्तुनोः ऐक्यस्य युक्तत्वात्।

जीवस्वरूपं तावत्;

"बुद्धेर्गुणेनात्मगुणेन चैव

ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः।" [३]

इति; "स चानन्त्याय कल्पते" इति च श्रुतेः। उपाधिवशादेव भिन्नवद्भाति न स्वरूपतः। तस्मात् तयोरैक्यं कथमिति चेत्; शृणु। अन्तःकरणोपाधिपरिच्छिन्नस्येव स्थितस्य शोधितत्वंपदार्थस्य कूटस्थस्यापि ब्रह्मणः घटाकाशमहाकाशयोरिव समसत्ताकयोः परमैक्यं वदन्ति ब्रह्मविद इत्यर्थः। "ब्रह्मविद् ब्रह्मैव भवति" इत्याद्याः

---

१ ज्ञप्तिमात्रस्य कथं स्वाज्ञानपाश इत्यत आह—स एवेति। यः स्वातिरिक्तकलनासहपरमात्मेति ख्यातः स एव निर्मायोऽपि स्वाज्ञानरूपया मायया परिमोहितात्मेव स्थूलादिशरीरमास्थाय सर्वत्र आत्मात्मीयाभिमानतः सर्वव्यापरजातं करोतीत्यर्थः॥

२ "अनेन जीवेन" इति श्रुत्या परमात्मन एव जीवरूपेण अवस्थानम् अवस्थितिः, तस्याः विज्ञानात्मनः द्रष्टव्यत्वाभिधानमिति काशकृत्स्न आचार्यो मन्यते" इत्यस्य सूत्रार्थः।

३ बुद्धेरिति। बुद्धेः लिङ्गशरीरस्य गुणेन परिच्छेदभेदादिना सच्चिदानन्दात्मगुणेन च एव आराग्रमात्रः न स्वतः; आरा प्रतोदः, तदुपरि प्रोतलोहाग्रस्य मात्रेव मात्रा परिमितिः तस्य सोऽयमित्यर्थः। वस्तुतः अयं स्वेन रूपेण दृष्टः नान्येन दृष्टः प्रकाशितः कारणोपाध्यपेक्षया अयम् अवरः कार्योपाधित्वत्" इत्यस्याः श्रुतेस्तात्पर्यार्थः।

श्रुतयश्च । एवमेकीभावं प्राप्तस्य न पुनरावृत्तिरिति मानानि शतशः सन्ति ; तथा च ममान्तरात्मा त्वयि अखण्डानन्दरूपे (परे) ब्रह्मणि निविशताम् । तेन नित्यमुक्तो भवामीति भावः ॥ ३८ ॥

**अन्तर्बाष्पाकुलितनयनानन्तरङ्गानपश्यन्**
**अग्रे घोषं रुदितबहुलं कातराणामशृण्वन् ।**
**अत्युत्क्रान्तिश्रममगणयन्नन्तकाले कपर्दिन्**
**अङ्घ्रिद्वंद्वे तव निविशतामन्तरात्मन् ममात्मा ॥ ३९ ॥**

**अन्तरिति** । हे **कपर्दिन्** ! पुनः एकं वरं वृणुयाम् क्षमस्व । **मम अन्तकाले** ; मरणसमये । **अन्तर्बाष्पाकुलितनयनान्** ; अन्तर्दुःखाग्निवेगेन समुत्पन्नेन बाष्पेण अश्रुजलेन, आकुलिते संक्षुभिते नयने येषां तान्, **अन्तरङ्गान्** ; सदा हृदयंगमान् प्राणतुल्यान् ; प्रियतमानित्यर्थः । यद्दर्शनादेव सद्यो दुःसहः शोकः अभिवर्धते । यथा लोके बाललीलासमये चरणस्खालित्येन शिलादौ पतित्वा रुदन्तोऽपि स्वजनान् उद्वीक्ष्य हा हेत्याक्रोशन्ति । तद्वत् मूर्खानाम् आसन्नानां सुहृद्दर्शने दुःखमभिवर्धते एव । शत्रुदर्शने तु हे दुर्विधे ! य इमे जिजीविषन्ति, तेषु पुर एव अहमेको मरिष्ये हा हेति ईर्ष्यया रुदति । यथाकथंचित् म्रियमाणस्य मूर्खस्य दुःखमेवापतति । तस्मात् तान् सुहृदः. अरींश्च **अपश्यन्** अनवलोकयन्, शत्रुवत् अविलोकयन् विलोकयन् अग्रतः शयानस्य मम दीनस्य **अग्रे कातराणाम्** मरणावस्थान् दृष्ट्वा विभीतानां **रुदितबहुलं** शोकसमुत्पन्ननानाचरितप्रलापमेदुरं **घोषम्** आक्रन्दनमपि बधिरवत् **अशृण्वन्** प्राणोत्क्रान्तिश्रममपि तृणवत् **अगणयन्** मूर्च्छावत् विस्मृतसर्वक्लेशो भवेयम् । **अन्तरात्मन्** तर्हि मम आत्मा अन्तःकरणम्, **तव अङ्घ्रिद्वंद्वे निविशताम्**, नितरां स्थालीजलं जलनिधाविव, घटाकाशो महाकाशे इव निविशतां प्रविशेदित्यर्थः ।

ननु—यद्येवं बहून्तराये मरणसमये कथमसंभवम् आत्मसमर्पणम् ? शिव एवाहमिति भावसमृद्धं ज्ञानं कथं संभवेदिति नाशङ्कनीयम् । पुरोक्तद्वाविंशतिश्लोके इदं प्राप्यते, ‘ निर्भयोऽस्मि ’ इति यदुक्तं तत् तथैव भवितुमर्हति । शिवप्रसादलब्धस्य सकृत् शिवोऽहमस्मीति संशयविपर्यासरहितस्य स्वरूपानुभवस्य न कदापि विस्मृतिः, अन्यविघातो वा भवेत् । तथा चोक्तं **श्रीविद्यारण्यमुनिभिः**—

“ नीरोग उपविष्टो वा रुग्णो वा विलुठन् भुवि ।
मूर्च्छितो वा त्यजत्वेष प्राणान् भ्रान्तिर्न सर्वथा ॥[1]

---

१ अत्र—
“ **अन्तकाले च मामेव स्मरन् मुक्त्वा कलेबरम् ।**
**यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥** ”
**इत्यस्य स्मृतिवाक्यस्य तात्पर्यः स्मारितः ।**

दिने दिने स्वप्नसुप्त्योरधीते विस्मृतेऽप्ययम् ।
परेद्युर्नानधीतः स्यात् तद्वद्विद्या न नश्यति ॥[१]
प्रमाणोत्पादिता विद्या प्रमाणं प्रबलं विना ।
न नश्यति न वेदान्तान् प्रबलं मानमिष्यते ॥ ”

इति । तस्मात् प्रारब्धान्ते प्राणादिकलाविलयावसरे त्वद्रूपः सन्नेव त्वद्रूपो भवामीत्यर्थः । “ ब्रह्मैव सन् ब्रह्माप्येति ” ; “ विमुक्तस्तु विमुच्यते ” इति श्रुतेः । मनसि निश्चितमेवार्थं कार्यगौरवात् भगवते व्यजिज्ञपदिति भावः ॥ ३९ ॥

हे देव ! यद्यपि ; “ यत्तद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रं तदपाणिपादम् ” इति[२] श्रुतिविहितात्मशिवरूपं सकृत् साक्षात्कृतं त्वत्प्रसादात् , तथापि—

“ प्रत्यग्द्वारकमण्डले कुशयुते संस्थाप्य शिष्यं पदा-
दूर्ध्वं प्रोक्ष्य सुताडय वीक्ष्य भसितैः केऽभ्युक्ष्य नाभेरधः ।
उल्लिख्यास्त्रकशैः परं च हृदये संस्पृश्य संचिन्त्य तं
मन्त्रन्यासपटाक्षिबन्धनमथो गृह्यात्तपुष्पौ करौ ॥ ”

इति तन्त्रदीक्षाविधिः । “ चक्षुरुन्मील्य यस्तत्त्वं ध्यात्वा शिष्यं समीक्षयेत् ” इति वैदिकदीक्षाविधानं दृश्यते । तादृशगुरुदीक्षादृष्टिपातार्थं निष्कलसकलरूपस्य परमेश्वरस्य दिदृक्षया पुनर्विज्ञापयति—

**चारुस्मेराननसरसिजं चन्द्ररेखावतंसं**
**फुल्लन्मल्लीकुसुमकलिकादामसौभाग्यचोरम् ।**
**अन्तः पश्याम्यचलसुतया रत्नपीठे निषण्णं**
**लोकातीत सततशिवदं रूपमप्राकृतं ते ॥ ४० ॥**

**चारुस्मेरेति । फुल्लन्मल्लीकुसुमकलिकादामसौभाग्यचोरम् ;** स्वच्छमल्लिकामुकुलदाम्नः यत् सौभाग्यं सौन्दर्यं तत् चोरयति मुष्णातीति तथोक्तम् । **अचलसुतया;** गिरिजया, वामाङ्गरूपिण्या साकम् ; “ साकं सत्रा समं

१ तत्वानुसंधानाभावेऽपि यथा प्रत्यहमधीते वेदे स्वप्नसुषुप्त्याद्यवस्थायां विस्मृतेऽपि परेद्युरनधीतवेदत्वं नास्ति, तथा मृतिकालेऽपि ज्ञाननाशाभाव इत्यर्थः ।

२ यत्तदिति । अद्रेश्यम् ; अदृश्यं सर्वेषाम् बुद्धीन्द्रियाणाम् अगम्यमित्येतत् । दृशेः बहिष्प्रवृत्तस्य पञ्चेन्द्रियद्वारकत्वात् । अगोत्रम् ; गोत्रम् अन्वयः, मूलमित्यनर्थान्तरम् । अनन्वयमित्यर्थः । न हि तस्य मूलमस्ति, येनान्वितं स्यात् । वर्ण्यन्त इति वर्णाः द्रव्यधर्माः, स्थूलत्वादयः, शुक्लत्वादयो वा । अविद्यमाना वर्णा यस्य तत् अवर्णम् अक्षरम् । अचक्षुःश्रोत्रम् ; चक्षुश्च श्रोत्रं च नामरूपविषये करणे सर्वजन्तूनां ते अविद्यमाने यस्य तत् अचक्षुःश्रोत्रम् । “ यः सर्वज्ञः सर्ववित् ” इत्यदिचेतनावत्वविशेषणवत्वात् प्राप्तं संसारिणामिव चक्षुः श्रोत्रादिभिः करणैः अर्थसाधकत्वं तदिह अचक्षुः श्रोत्रमिति वार्यते । “ पश्यत्यचक्षुः स शृणोत्यकर्णः ” इत्यादिदर्शनात् । किं च तदपाणिपादम् ; कर्मेन्द्रियरहितमित्येतत् ” इत्यस्य मन्त्रस्यार्थः।

–ऽऽ" इति **कोशः** ; एकीभूतमित्यर्थः । **रत्नपीठे** ; योगासने, **निषण्णम्** ; स्थितम् । **चारुस्मेराननसरसिजम्** ; –इरमन्दहासविलसितमुखपङ्कजम् । **चन्द्रलेखावतंसम्** ; चतुर्थीचन्द्रकलैव अवतंसं शिरोभूषणं यस्य तत् । **–कातीतम्** ; आत्मतत्त्वविद्यातत्त्वशिवतत्त्वतया वर्तमानचतुर्विंशत्युत्तरद्विशतभुवनतन्निष्ठचेतनान्यतिक्रम्य सर्वस्योपरि –न इति लोकातीतम् । **सततशिवदम्** ; नित्यमङ्गलमुक्तिप्रदम् । **अप्राकृतम्** ; प्रकृतिजन्यभूतभौतिकांश–हितम्, पारमार्थिकं सर्वकारणं सर्वशक्तिशबलितम् । **शाण्डिल्योपनिषदि शाण्डिल्य** आह—

"कथमरूपं ब्रह्म जगत्कारणं भवतीति सहोवाच । अथाप्यरूपस्य ब्रह्मणः त्रीणि रूपाणि भवन्ति ; निष्कलं, सकलं, सकलनिष्कलं चेति (३)

यत् सत्यं विज्ञानमानन्दं, निष्क्रियं, निरञ्जनं, सर्वगतं, सुसूक्ष्मं, सर्वतोमुखम्, अनिर्देश्यम्, अमृतमस्ति, तदिदं निष्कलं रूपम् (४)

अथास्य या सहजास्ति विद्या मूलप्रकृतिर्माया लोहितशुक्लकृष्णा तया सहजवान् देवः कृष्णपिङ्गलो महेश्वर ईष्टे ; तदिदमस्य सकलं रूपम् (५)

अथैष ज्ञानमयेन तपसा चीयमानोऽकामयत बहु स्यां प्रजायेयेति । अथैतस्मात् तप्यमानात् सत्यकामात् त्रीण्यक्षराणि अजायन्त । तिस्रो व्याहृतयः, त्रिपदा गायत्री, त्रयो वेदाः, त्रयो देवाः, त्रयो वर्णाः, त्रयोऽग्नयश्च जायन्ते । योऽसौ देवान् सर्वैश्वर्यसंपन्नः सर्वव्यापी सर्वभूतानां हृदये संनिविष्टो मायावी माययाकृतिः, स ब्रह्मा, स विष्णुः, स रुद्रः, स इन्द्रः, स सर्वे देवाः, सर्वाणि भूतानि स एव पुरस्तात्, स एव पश्चात्, स एवोत्तरतः, स एव दक्षिणतः, स एवाधस्तात्, स एवोपरिष्टात् स एव सर्वम् । (६)

अथास्य देवस्य आत्मशक्तिक्रीडस्य भक्तानुकम्पिनो दत्तात्रेयरूपा तनूरवासा इन्दीवरदलप्रख्या चतुर्बाहुरघोरापापकाशिनी । तदिदमस्य सकलनिष्कलं रूपं वदन्ति " [१]

---

**१ तथा चेद् ईश्वरकारणता कुत इत्याशङ्क्य पारमार्थिकस्वज्ञस्वाज्ञदृष्टिवैचित्र्यात् निष्प्रतियोगिकनिष्कलमपि ब्रह्म स्वप्रतियोगिकनिष्कलवत् सकलनिष्कलवच्च भातीत्याह—अथेति ॥ ३ ॥**

**परमार्थदृष्ट्या यत् निष्प्रतियोगिकनिष्कलमित्युक्तं तत् तिष्ठतु, तदवगतेःसप्रतियोगिककलनापह्नवपूर्वकत्वात् ;**

**" चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम् ।**
**सर्ववर्जितचिन्मात्रं ब्रह्म मात्रमसन्न हि ॥ "**

**इत्यादि श्रुतेः । तत्र आदौ स्वज्ञदृष्टिमवष्टभ्य सप्रतियोगिकनिष्कलस्वरूपं विशदयति—यदिति । सत्यज्ञानानन्दाद्युक्तविशेषणानाम् अनृतजडदुःखादिप्रतिषेधकत्वेन सप्रतियोगिकत्वं युज्यते । निष्प्रतियोगिकपक्षे तु तद्दृष्ट्या अपह्नोतव्यविषयसामान्यमस्ति नास्तीति विभ्रमस्याप्यपह्नवं गतत्वात् ॥ ४ ॥**

**सप्रतियोगिकसकलरूपं स्पष्टयति—अथेति । य एष निष्प्रतियोगिकनिष्कलतया अवशिष्टः स एव स्वाज्ञदृष्ट्या सप्रतियोगिकनिष्कल इति ख्यातः । स एवाथ स्वाज्ञदृष्ट्या विकल्पानन्तरं सर्वेश्वरो भवति । अस्येश्वरत्वहेतुः केत्यत आह—येति । स्वाज्ञदृष्टिसहजा या मूलप्रकृतित्वेन प्रकृता त्रिगुणात्मिका माया अस्ति, तया सहजवान् देवः त्रिगुणयोगतः कृष्णपिङ्गलः महेश्वरः सर्वेश्वरत्वमवलम्ब्य स्वाज्ञदृष्टिप्रसक्तस्वाविद्यापदतत्कार्यजातम् ईष्टे । तदिदमस्य सकलं रूपम् । ईश्वरस्य निरावृतक्रियाज्ञानेच्छाशक्तिमत्त्वेन स्वदृष्ट्या ईशितव्यस्वाविद्यापदतत्कार्यवैरल्यात् स्वस्यैव निष्प्रतियोगिकनिष्कलत्वात् अस्य सकलत्वं स्वज्ञदृष्टिनिष्ठमेवेत्यर्थः ॥ ५ ॥**

इति । निष्कलसकलरूपं सशक्तिकं गुरुमूर्तिम् अन्तः पश्यामि भावयामीति भावः । अत्र सकलस्य शक्तिरूपस्य "इन्दीवरदलप्रख्या चतुर्बाहुः" इति वचनात् शक्त्यंशस्य शिवस्य विष्णोश्च ब्रह्मणः तृतीयरूपे अन्तर्भाव इति गम्यते ॥ ४० ॥

**स्वप्ने वापि स्वरसविकसद्दिव्यपङ्केरुहाभं**
**पश्येयं किं तव पशुपते पादयुग्मं कदाचित् ।**
**क्वाहं पापः क्व तव चरणालोकभाग्यं तथापि**
**प्रत्याशां मे घटयति पुनर्विश्रुता तेऽनुकम्पा ॥ ४१ ॥**

**स्वप्ने वेति** । हे **पशुपते** ! **स्वप्ने वापि** ; स्वपितं स्वापः स्वप्नश्चैकार्थः । "त्रिष्वपशये जाग्रत्सुषुप्त्योः" इति **कोशः** ; संध्यावस्थायामित्यर्थः । **स्वरसविकसद्दिव्यपङ्केरुहाभम्** ; स्वरसेन स्वनिष्ठपरिपाकवशेन संफुल्लसरोरुहवत् भास्वत् ; **ते** ; तव, **पादयुग्मं कदाचित्** सकृद्वा **पश्येयं किम्** ? कथंचित् स्वप्नलब्धदर्शनस्य अस्पष्टतया मलिनप्रतीतिरेव भवेत् । तथापि जाग्रत्कालीनचिरवाञ्छातिशयेन स्वप्नेऽपि दृढमवगच्छामीति भावः ।

पुनः स्वस्य अयोग्यतामीशदर्शनभाग्यगौरवं च आलोच्याह—**पाप** इति । **पापः अहम्** ; पिबति पापिष्ठमिति पापम्, तदस्यास्तीति पापः । **क्व** ? यावद्दूरे वर्ते, **तव चरणालोकभाग्यं क्व** ? कियद् दूरेऽस्ति । परस्परमतिदूरमेव । तर्हि यथा फाललिपिरस्त्विति चेत् ; **ते विश्रुता** ; वेदलोकप्रसिद्धा ; **अनुकम्पा** ; दया, **मे** ; पुनः पुनः **प्रत्याशां घटयति** ; संचोदयति । कथम् ? निजद्रोहिणाम्, दक्षबाणासुरप्रमुखानां देवः गाणापत्यम् अदिशत् । मुसलपाषाणप्रहर्तॄणां स्वपदं ददौ इति नाश्रौषीः किम् ? तूष्णीमनर्थिकया उष्ट्रासिकया किं लभ्यते । सुजनसुलभम् ईश्वरमाश्रयेति मां घटयतीति भावः । अत्र **विषमालंकारः** ; तल्लक्षणं तु—"विषमं वर्ण्यते यत्र घटनाननुकूलयोः" इति । अत्रापि गुरुमूर्तिदिदृक्षा ॥ ४१ ॥

**भिक्षावृत्तिं चर पितृवने भूतसङ्घैर्भ्रमेदं**
**विज्ञातं ते चरितमखिलं विप्रलिप्सोः कपालिन् ।**

---

अर्धस्वप्नदृष्टिमवष्टभ्य सकलस्वरूपप्रपञ्चनपूर्वकं सकलनिष्कलस्वरूपमाचष्टे—अथेति । आद्यन्तयोः सकलं मध्ये निष्कलं यत्र दृश्यते, तत् सकलनिष्कलरूपम् । तत्रादौ ईश्वरः एकोऽपि तपसा चीयमानः वर्धमानः सन् 'बहु स्यां प्रजायेय' इति बहुभवनसंकल्पं कृतवान् । एवं सत्यसंकल्पात् तस्मात् ईश्वरात् अकारोकारमकारभेदेन त्रीणि अक्षराणि अजायन्त—इति सर्वत्र वचनानुरोधेन ऊह्यम् । भूरादिभेदेन तिस्रो व्याहृतयः, पदत्रयात्मिका गायत्री, ऋगादिभेदेन त्रयो वेदाः, ब्रह्मादिभेदेन त्रयो देवाः, ब्राह्मणादिभेदेन त्रयो वर्णाः, गार्हपत्यादिभेदेन त्रयोऽग्नयश्च, जायन्ते ।

सोऽयमीश्वरः निरवधिकविभूतिसंपन्नः स्वेन अन्तर्यामिरूपेण सर्वव्यापी सर्वभूतहृदासनः ; तस्याकृतिमत्त्वं मायया, न स्वतः, स्वतो निराकृतित्वात् । ब्रह्मादिरूपेणापि स एव वर्तते । दिग् विदिगधश्चोर्ध्वं चापि स एव । दत्तात्रेयरूपेणापि स एव वर्तते । सुरूपा तनूः अवासा इति विशेषणतः अस्या अवधूतत्वमवगम्यते । "जडभरतदत्तात्रेयरवतक-ऋभुनिदाघः" इति श्रुतेः । एवम् अर्धस्वप्नदृष्ट्यनुरोधेन सकलनिष्कलस्वरूपं प्रतिपादितमित्यर्थः ॥ ६ ॥

**आवैकुण्ठद्रुहिणमखिलप्राणिनामीश्वरस्त्वं**
**नाथ स्वप्नेऽप्यहमिह न ते पादपद्मं त्यजामि ॥ ४२ ॥**

**भिक्षावृत्तिमिति ।** हे **कपालिन् !** कं शिरोनासादारुघट्टनात् पालयतीति कपालः, स हस्तेऽस्तीति कपाली । **भिक्षावृत्तिम् ;** भिक्षयैव वृत्तिं जीवनं **चर ;** आचर । **पितृवने ;** श्मशाने, **भूतसङ्घैः ;** भूतप्रेतपिशाचसमूहैः सह **भ्रम ;** भ्रमणं वा कुरु । **विप्रलिप्सोः ;** "विप्रलम्भो विसंवादः" इति **कोशः** । किमपि लब्धुमिच्छया तद्विपरीतार्थप्रकटनं विप्रलम्भः । तत्कर्तुमिव आभिनयतः **ते ;** तव, **इदं चरितम् अखिलम् आवैकुण्ठद्रुहिणम् ;** आङ् अभिव्याप्तौ, कदाचित् विकुण्ठायां मातरि जात इति वैकुण्ठः हरिः ; असुरान् द्रुह्यतीति द्रुहिणः विधिः । हरिविधी आरभ्य अखिलप्राणिनां विज्ञातमेव । किं च **त्वम्** अखिलप्राणिनाम् **ईश्वरश्च** असि । आवैकुण्ठद्रुहिणं यथा तथा सर्वैः विदितमेव । मूर्खैरविदितमपि प्रायशो विज्ञातमित्यर्थः । तथा च **भागवते**—

"यस्यानवद्याचरितं मनीषिणो
गृणन्त्यविद्यापटलं बिभित्सवः ।
निरस्तसाम्यातिशयोऽपि यः स्वयं
पिशाचचर्यामचरत्सतां गतिम् ॥"

इति । इह त्वमखिलप्राणिनामीश्वर इति जानन् अहं स्वप्नेऽपि ते पादपद्मं न त्यजामि । मनसा दृढं बध्नामीति भावः । अत्र ईश्वरस्य भिक्षावृत्त्यादेः स्वाभाविकत्वेऽपि विप्रलम्भकत्वकथनात् अहेतोः हेतुत्वकथनात् **हेतूत्प्रेक्षालंकारः** ॥ ४२ ॥

**आलेपनं भसितमावसथः श्मशान-**
**मस्थीनि ते सततमाभरणानि सन्तु ।**
**निर्ह्नोतुमीश सकलश्रुतिपारसिद्ध-**
**मैश्वर्यमम्बुजभवोऽपि च न क्षमस्ते ॥ ४३ ॥**

**अलेपनमिति ।** हे **ईश !** सर्वेश्वर ! **ते;** तव **आलेपनम् ;** हिमाम्बुकर्पूरगोरोचनाकाश्मीरमिलिताङ्गलेपनस्थानीयं **भसितमेव** अस्तु । सर्वं जगत् निटिलनयनाग्नौ हुत्वा तद्भस्म जगद्धिताय लिम्पय । अपि च—तव **आवसथः ;** वासभूमिः, प्रदोषकालमारभ्य आप्रभातं नटनार्थं स्थितिः **श्मशानमेव** अस्तु । अष्टमूर्तेः ईश्वरस्य सर्वाकारेण सर्वत्र व्यापकत्वात् तत्सदृशी नृत्तसभा सकला भूमिरिति श्मशानभूमिरेवेति **ब्रह्मतर्कस्तवे** कथितम्—

"दग्धे तवाक्षिदहनेन चराचरेऽस्मिन्
त्वत्तोऽखिलं भुवनमेव महाश्मशानम् ।

तत्र स्थितिं विबुधनाथ तवासहायं
सन्तः श्मशानवसतिं समुदाहरन्ति ॥"

इति । श्रीशिवात् त्वत्तः अखिलस्य शवस्य शयनस्थानात्मके श्मशाने सर्वध्वंसकः त्वमेक एव असहायः वससि नटसि वेत्यर्थः । इयं श्मशानवसतिः खलानामपहासास्पदमिति यत्, तद् बुधानामिष्टापत्तिरेवेति भावः ।

किं च—अस्थीनि शरीरगतानि तव आभरणानि आकल्पानि सन्तु । **शिवराघवसंवादे** अस्थीनि संख्यायन्ते—

" अस्थ्नां शरीरे संख्या स्युः षष्ट्‌युत्तरशतत्रयम् ।
द्विशतं त्वस्थिसंधीनां स्यातां तत्र दशोत्तरे ॥
कोरकाः प्रतरा नुन्नाः सीवन्यः स्युरुलूखलाः ।
सामुद्रा मण्डला शङ्खावर्ता वायसतुण्डकाः ॥
इत्यष्टधा समुद्दिष्टाः शरीरेष्वस्थिसंधयः ।"

इति । किमर्थमीशस्य एतानि आभरणानि आसन्निति ?; अत्रोच्यते—'पुरा सोमकासुरेण वेदोऽपहृतः, हरिः मत्स्यरूपी तं हत्वा यथापूर्वं वेदं प्रतिष्ठाप्य, तद्गर्वेण समुद्रमुत्कूलं चालयन् गुहेन शिक्षितः सन् अन्ते स्वनेत्र-वलयास्थीनि देवाय ददौ । आदिकूर्मः मन्दरोद्धारगर्वेण जलधिम् अतिवेलं डोलयन् गणेशेन पीडितः स्वपृष्ठ-कपालं ददौ । एवमादिभिः आदिवराहः वीरभद्रेण ; नृसिंहः शरभेण, त्रिविक्रमस्तु आकाशभैरवेण च समुत्पाटितः सन् दंष्ट्राचर्मवीणादण्डान् ददुः । पुनः कस्मिंश्चित् कल्पान्ते सर्वे देवाः स्वस्वविमुक्त्यर्थं देवकपर्दनिःसृतगङ्गास्थि-प्रक्षेपमहिमानं विदित्वा साक्षाद्धरविग्रहाभरणतया स्वस्वास्थीनि उपदात्वेन प्रार्थनपुरःसरं हराय दत्वा विमुक्ता बभूवुः' इति **शंकरसंहितासनत्कुमारसंहितयोः** दृश्यते ।

एवमेव केशोपवीतभुजगादिधारणं सर्वमपि जगदुपकारायैव । तदुक्तं **सनत्कुमारसंहितायां** मायामोहितं वेदव्यासं प्रतीश्वरवचनम्—

" मदङ्गस्वेदसंभूतौ ब्रह्मनारायणाविमौ ।
यस्त्वया च सदा विष्णुः स्तूयते नियतात्मना ॥
यश्चासौ सर्वकार्याणि त्यक्त्वा मामेव सेवते ।
अनेकमुण्डकोटीभिरियं माला शिरोगता ॥
ब्रह्मणश्च कपालानि विनष्टस्य युगे युगे ।
मत्स्यकूर्मवराहाणां नारसिंहाजिनं मम ॥

आलेपनं भसितमावसथः श्मशानम्
अस्थीनि ते सततमाभरणानि सन्तु ।
निह्नोतुमीश सकलश्रुतिपारसिद्धम्
ऐश्वर्यमम्बुजभवोऽपि च न क्षमस्ते ॥

वामनस्य च कङ्कालदण्डं मम करे धृतम् ।
यश्चामूरपरा माला ग्रीवाहस्तकटिस्थिताः ॥
नारायणस्य तनवो विनष्टस्य युगे युगे ।
मत्स्याक्षिकूर्मपृष्ठास्थिदंष्ट्रां वाराहसंभवाम् ।
ममाङ्गे तानि पश्याद्य शिक्षितानां युगे युगे ॥"

इत्यादि । तस्मात् तव आलेपननिवासादिकं सर्वं सर्वानुग्रहार्थैवेत्यर्थः ।

एवं श्रुतीनां पारम् अवसानम्, तत्र **शरभश्रुत्यन्तादौ** सिद्धम्, प्रसिद्धं तव ईश्वरस्य महिमानं च, **निह्नोतुम्**; प्रच्छादयितुम् **अम्बुजभवोऽपि न** क्षमः, न समर्थः । **सकलश्रुतिपारसिद्धमैश्वर्यं** कीदृग्विधमिति? अत्रोच्यते—सर्वकारणत्वपूर्णत्वसर्वैश्वर्यनिधित्वाद्यनितरसाधारणमहामहिमव्यञ्जकानि मानानि सन्ति हि **श्वेताश्वतरमन्त्रे**—"किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन" इत्युपक्रम्य, कालादिकारणत्ववादिमतमाक्षिप्य ध्यानवतां तेषां मध्ये श्रीमहादेव्याविर्भूय, यक्षप्रश्नवत् साक्षाच्छक्तिमन्तम् ईश्वरमुवाच । **शिवपुराणेऽपि**—

"मुमुक्षया पुरा केचित् मुनयो ब्रह्मवादिनः ।
संशयाविष्टमनसो विमृशन्ति यथातथम् ॥
किं कारणं कुतो जाता जीवाम केन वा वयम् ।
केन वर्तामहे शश्वत् सुखेष्वन्येषु चाप्यमी ॥"

इति । ते तर्कयन्तः पुनः—

"ते ध्यानयोगानुगताः प्रापश्यन् शक्तिमीश्वरम् ।
पाशविच्छेदिकां देवीं निगूढां स्वगुणैर्भृशम् ॥
ततो विच्छिन्नपाशास्ते सर्वकारणकारणम् ।
शक्तिमन्तं महादेवमपश्यन् दिव्यचक्षुषा ॥

इति । **पञ्चब्रह्मोपनिषदि**—

"मायया मोहिताः शंभोर्महादेवं जगद्गुरुम् ।
न जानन्ति सुराः सर्वेऽप्यहो कारणकारणम् ॥"

इति । **अपि** च—

"यदातमस्तन्न दिवा न रात्रि-
र्न सन्न चासञ्छिव एव केवलः ।

आलेपनं भसितमावसथः श्मशानम्
अस्थीनि ते सततमाभरणानि सन्तु ।
निह्नोतुमीश सकलश्रुतिपारसिद्धम्
ऐश्वर्यमम्बुजभवोऽपि च न क्षमस्ते ॥

तदक्षरं तत्सवितुर्वरेण्यं
प्रज्ञा ज तस्मात् प्रसृता पुराणी ॥"[१]

इति । **योगयाज्ञवल्क्यश्च**—

" सिसृक्षुरेक एवाग्रे समासीनः शिवः स्वयम् ।
दृष्ट्वा गुणमयीं मायां सूक्ष्मरूपामपाकरोत् ॥
यया तदात्मकं विष्णुं सृष्ट्वा पालं दिवौकसाम् ।"

इत्यादि । स एव समाध्युपदेशप्रकारे—

" ब्रह्मादिकार्यरूपाणि स्वे स्वे संहृत्य कारणे ।
युक्तचित्तस्तदात्मानं योजयेत् परमेश्वरम् ॥"

इति । **सभापर्वणि**—

" उमार्धविग्रहं देवं वरदं सर्वकारणम् ।"

इधि । **भीष्मपर्वणि**—

" यत्र भूतपतिः सृष्ट्वा सर्वान् लोकान् सनातनः ।
ईश्वरश्चेतनः कर्ता पुरुषः कारणं शिवः ॥
विष्णुर्ब्रह्मा शशी सूर्यः शक्रो देवाश्च सान्वयाः ।
सृजते ग्रसते चैतान् तमोभूतमिदं यथा ॥
अप्रज्ञातं जगत्सर्वं तदा ह्येको महेश्वरः ।"

आलेपनं भसितमावसथः श्मशानम्
अस्थीनि ते सततमाभरणानि सन्तु ।
निह्नोतुमीश सकलश्रुतिपारसिद्धम्
ऐश्वर्यमम्बुजभवोऽपि च न क्षमस्ते ॥

इति । **शान्तिपर्वणि**—

" स एष भगवानीशः सर्वतत्त्वादिरव्ययः ।"

---

यदेति । यदा; यस्याम् अवस्थायाम्, अतमः; न तमः अस्येत्यतमः, तत्त्वमादिवाक्यजन्यज्ञानेन दीपस्थानीयेन दग्धाविद्यातत्कार्यरूपतमस्कत्वात् तदा तत्काले न दिवा दिवारोपोऽपि नास्ति, न रात्रिः तदारोपोऽपि नास्ति इति सर्वत्रानुषङ्गः। न सन् सत्तारोपोऽपि; नासन् अभावारोपोऽपि। तर्हि तत्त्वं सर्वत्र शून्यमेव जातमिति बौद्धमताविशेषमाशङ्क्याह—शिव एवेति। शिव एव शुद्धस्वभावः न शून्यमिति निपातार्थः। केवलः; अविद्याविकल्पशून्यः। तदक्षरम्; तदुक्तस्वरूपम्, न क्षरतीति अक्षरम्, नित्यं तत् तत्पदलक्ष्यम्, सवितुः; आदित्यमण्डलाभिमानिनः, वरेण्यम्; संभजनीयम्। प्रज्ञाः गुरूपदेशात् तत्त्वमादिवाक्यजा बुद्धिः, चकारः, एवकारार्थः। तस्मात् शुद्धत्वहेतोः प्रसृता नित्यविवेकादिमत्सु संन्यासिषु व्याप्ता, पूर्णःवाकारेण पुराणी ब्रह्माणमारभ्य परंपरया प्राप्तानादिसिद्धा॥ इत्यास्य मन्त्रस्य तात्पर्यार्थः।

सोऽसृजद् दक्षिणादङ्गाद् ब्रह्माणं लोकसंभवम् ॥

वामपार्श्वात् तथा विष्णुं लोकरक्षार्थमीश्वरः ॥ ”

**आश्वमेधिके पर्वणि**—

“ असृजद् यश्च भूतादीन् सर्वान् लोकान् सनातनः ।

स्थितः सर्वोपरि स्थाणुस्तं प्रपद्ये महेश्वरम् ॥”

इति । तथा सर्वव्यापकत्वमानानि—

“ सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु ।”

“ ईशावास्यमिदं सर्वं यत् किंच जगत्यां जगत् ।”

“ सर्वव्यापी स भगवान् तस्मात् सर्वगतः शिवः ।”

इति । “ दिशं भित्वा सर्वान् लोकान् व्याप्नोति व्यापयतीति व्यापनात् व्यापी महादेवः ” इति ; “ शिवज्ञानेन मुक्तिः ,” “ ज्ञात्वा देवं मुच्यते सर्वपशैः ” ;

“ यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।

तदा शिवमविज्ञाय दुःखस्यान्ति भविष्यति ॥”

इत्याद्याः **श्रुतयः** सन्ति । एवं शिवस्यैश्वर्यप्रतिपादकवाक्यानि शतशः सन्ति द्रष्टव्यानि ।

इत्थंभूतं श्रुतिशतसिद्धं तव विविधमैश्वर्यं निह्नोतुम् आच्छदयितुम् अपवदितुं वा अम्बुजभवोऽपि न क्षमः, न समर्थ इत्यर्थः । श्रीशिवानुग्रहाद् वेदादिसकलशास्त्रोपदेष्टा चतुर्मुखः स्ववचनविरुद्धप्रविलपनात् बिभ्येदिति भावः ।

अत्र स्तुतौ प्रथमश्लोकमारभ्य द्विचत्वारिंशच्छ्लोकपर्यन्तं **मन्दाक्रान्तवृत्तमेव** । अयं तु **वसन्ततिलकं वृत्तम्** । तल्लक्षणं तु—

“ उक्तं वसन्ततिलकं तभजा जगौगः

सिंहोद्धतेयमुदितं मुनिकाश्यपेन ।

उद्धर्षिणीति कथितं मुनिसैन्धवेन

शोभावतीति कथितं भुजगाधिपेन ॥ ”

आलेपनं भसितमावसथः श्मशानम्
अस्थीनि ते सततमाभरणानि सन्तु ।
निह्नोतुमीश सकलश्रुतिपारसिद्धम्
ऐश्वर्यमम्बुजभवोऽपि च न क्षमस्ते ॥

इति विकल्प्यते । अयं तु वसन्ततिलकमेवेत्यर्थः ॥ ४३ ॥

ननु—बहवः सुराः श्रूयन्ते, तत्र **आढ्यवदान्यन्यायेन** यं कंचिदुपासित्वा कृतकृत्यो भवेति चेत्, न ; तत्र बहवः परमेश्वरतया हि अर्थवादश्रुतिषु श्रूयन्ते । नेदं जगत् अनीश्वरं बह्वीश्वरं वा भवितुमर्हति । ते प्रशंसामात्रेण ईश्वरा इव कल्प्यन्ते । परमार्थतः परमेश्वरः **त्वमेक** एवेति विज्ञापयति—

**विविधमपि गुणौघं वेदयन्त्वर्थवादाः**
**परिमितविभवानां पामराणां सुराणाम् ।**
**तनुहिमकरमौले तावता त्वत्परत्वे**
**कति कति जगदीशाः कल्पिता नो भवेयुः ॥ ४४ ॥**

**विविधमिति** । हे **तनुहिमकरमौले** ! हिमं करोतीति हिमकरः, तनुः सूक्ष्मः हिमकरः मौलौ यस्य सः, तनुहिमकरमौलिः । चतुर्थ्यां पञ्चम्यां वा चन्द्रस्य यावत्यः कलाः तावतीभिः कलाभिः युतं चन्द्रमसं किंचिद् वामभागे मणिमकुटजटाघटिनिटिलसंधौ बुभुक्षुजनविज्ञापकान्नसत्रसुखनिबद्धध्वजपटीमिव मुमुक्षुजनसमाश्रणीय-बोधाय शिवज्ञानमयचन्द्रमसं धत्ते । **शैवाश्चाहुः**—"ज्ञानचन्द्रकलाचूडं दशादिग्बाहुमण्डलम्" इति । चन्द्रमौले अर्थवादाः, **लोकाक्षिराह**—

"अर्थवादलक्षणं तदिदमुच्यते,—"मन्त्रब्राह्मणयोर्वेदनामधेयम् ;
कर्मचोदना ब्राह्मणानि ; ब्राह्मणशेषोऽर्थवादः ; निन्दाप्रशंसा परकृतिः पुराकल्पश्च" इति ।

अतः अन्ये मन्त्राः अनाम्नातास्तु अमन्त्रा इत्यर्थवादः चतुर्धा विकल्पितः । तत्र निन्दारूपोऽर्थवादस्तु—

"यदश्रशीयत न तद्रजतम्, हिरण्यमदक्षिण्यम-
श्रुजमिति । सोऽब्रवीद् वरं वृणै ; मदग्रा एव वो
ग्रहा गृह्यन्त इति । तस्मादैन्द्रवायवा ग्रहा गृह्यन्ते ।
तमघ्नन् । सोऽपूयत । तं देवा नोपधृष्णुवन् । ते
वायुमब्रुवन् । इमं न स्वदयेति । सोऽब्रवीत् वरं
वृणै । यद् देवत्यान्येव वः पात्राण्युच्यन्ते"

इत्येवमादिः वायुप्रशंसापूर्वककर्मप्रशंसार्थवादः । "विश्वस्मादिन्द्र उत्तरः" ; "अग्निर्वै देवानामवमः, विष्णुः परमः" "तदन्तरेण सर्वा अन्या देवताः" "ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता" "इन्द्रो देवानामभवत् पुरोगाः" इत्यादयः तत्तत्प्रशंसार्थवादाः । पामराणां पाप्मानं रान्तीति पामराः ; "रा आदाने" इति **धातुः** ।

ननु—शक्रादयः कथमिव पापं यान्ति, तेऽपि तथाविधा यदि, कथमस्मादुपास्या भवन्ति? **श्रीसूतसंहितायाम्**—

" ब्रह्मविष्णुमहेशानां तथा तेषां द्विजर्षभाः ।
आविर्भावविशेषाणां पुण्यपापादयो न हि ॥"

इति । तथा, "न ह वै देवान् पाप गच्छति" इति **श्रुतेश्च** । लोकेऽपि बहवो देवान् समुपासते तेभ्यः ते भुक्तिं, मुक्तिं च दिशन्तीति शास्त्रानुभवसिद्धमेव । तर्हि कथं पामरत्वं तेषामि चेत्? शृणु; **पराशरपुराणे**—

" विग्रहः संप्रदानं च युगपत् कर्मसंनिधिः ।
प्रीतिः फलप्रदत्वं च विद्यते हि परात्मनः ॥
ब्रह्मविष्णुमहेशानां तदंशानां तथैव च ।
देवादीनां च विद्यन्ते विग्रहादीनि पञ्च च ॥
शिवस्य परतत्त्वस्य स्वभावः सकलं शुक ।
तदधीनं तदन्येषामिति तत्त्वविदां स्थितिः ॥
अतः सकलजन्तूनां तदेव परमं पदम् ।
वेदितव्यं विशेषेण विद्यया हि परा गतिः ॥
अतो वेदनपर्यन्तं भक्तिध्यानजपार्चनम् ।
अन्यच्च वेदसंसिद्धं प्रकुर्यादास्तिको जनः ॥"

विविधमपि गुणौघं वेदयन्त्यर्थवादाः
परिमितविभवानां पामराणां सुराणाम् ।
तनुहिमकरमौले तावता त्वत्परत्वे
कति कति जगदीशाः कल्पिता नो भवेयुः ॥

इत्युक्तत्वात् सर्वं परमेश्वराधीनमेव, अन्येषां वैभवमित्यतश्च सुराणां पामरत्वम्, अस्मदादुपास्यत्वं च अस्त्येव तेषां तेजोविशेषेण, "प्रत्यवायो न विद्यते" इति **न्यायेन** कर्मलेपः कचिन्नास्ति, कचिदस्त्येवेत्यवगम्यते ।

तथा हि—कुत्रचित् अश्वमेधे पत्न्यमिमन्त्रणावसरे शक्रः अश्वलिङ्गं प्रविश्य रहः कृत्यं चकार तद्विदित्वापि द्विजाः;

" यज्ञकर्ता च देवेन्द्रो वेदकर्ता च वाक्पतिः ।
अहमेव जगत्कर्ता मम कर्ता महेश्वरः ॥"

इति कर्मवचनमनुसृत्य न दूष्यतेऽध्वर इत्यवदन् । शक्रः स्वस्य कर्मसङ्गतिं **कौषीतकिश्रुतौ** स्वयमेवोचे— "त्रिशीर्षाणं त्वाष्ट्रमहनमरुत्मुखान्यतीन् सालावृकेभ्यः प्रायच्छम्" इत्यन्ते, "न लोम च मीयते" इति । स एवेन्द्रो महामाहेश्वरगौतमपत्नीधर्षणनिमित्तकपापफलमधिकमनुबभूव । ब्रह्मापि स्वपुत्रीविषयरिंसादोषेण न लिम्पते । स एव साक्षात् शिवदूषणाघात् स्वप्रधानशिरश्छेदक्लेशमनुभूय चतुर्मुख एवासीदिति पुराणं द्रष्टव्यम् ।

तथा विष्णुरपि स्वेन स्वांशेन वा दानववालिबलिजयद्रथादिव्याजवधेन न दूष्यते। पारमेश्वर वरभृगुपत्नीवधनिमित्तकशापपापाधिगततिर्यग्योनिजत्वभीत्या निजभक्तैः एकादशव्रतमनुतिष्ठतीति **स्कान्दे**—

"एकादशानां रुद्राणां प्रीत्यर्थं गरुडध्वजः।
पक्षद्वयेऽपि सततं करोत्येकादशीव्रतम्॥"

इत्यादि। किं च—श्रीकृष्णोऽपि महामहेश्वरशापायुधमहामुनेः उच्छिष्टलेपप्रभावेन सर्वजेतृत्वं सकलशास्त्रानभिभवत्वादिकं च आप्तवानिति **भारते आदिपर्वणि** एकोनषष्टिशततमाध्याये, "न तु पादतले लिप्ते" इति महामुनिवचसा सह कथितम्। तत्रैव **मौसलपर्वणि**—तस्य महेश्वरस्यैव अपराधेन समूलकुलहानिरासीदिति च। तस्य व्याधशरविद्धस्य भगवतो वचनम्—"अयुद्धेन यतो वाली तस्येदं कर्मणः फलम्" इत्यादिकर्मसंपर्कश्च प्रतीयते।

एवं यद्यपि—मत्स्यकूर्माद्यवतारः सर्वोऽपि वेदप्रतिष्ठापनादिजगद्धितकार्यैव। तथापि—

"शिवद्रव्यापहरणं शिवनिन्दा च कुत्रचित्।
शिवभक्तापराधश्च प्रायश्चित्तैर्न नश्यति॥"

इति **कूर्मवचनात्** शिवशैवद्रोहपापेन लिप्यन्ते, नान्येन विषयव्यवस्थां कार्या। ततश्च पामरणामित्यर्थः।

अपि च—**परिमितविभवानाम्** अस्यैतावदायुः, एतावानधिकारः, एवमैश्वर्यमित्यादि। खण्डभूपानाम् आयुधप्रकारसौधोच्छ्रायत्वकरितुरगवरभूषणादिविभवः परिमीयते यथा सार्वभौमेन; तथा तेषां देवानां वैभवं परिमीयते परमेश्वरेणेति परिमितविभवः। सुष्ठु रान्ति दीव्यन्तीति सुराः; तेषां **सुराणां विविधमपि गुणौघं**; सर्वेश्वरत्वादिनानावैभवसंदोहं **वेदयन्तु** आवेदयन्तु नाम; तावता प्रशंसामात्रेण त्वत्परत्वे त्वत्तो ऽपि श्रेष्ठभावे तैः तैः हेतुभिः कल्पिताः कति कति जगदीशाः नो भवेयुः। असंख्याता जगदीशाः कल्पिता भवेयुरित्यर्थः।

तर्हि तेषां परस्परविरोधेन कस्यचित् सर्गेच्छासमय एव अन्यस्य संहारेच्छा भवति। एवं सति एकग्रामवासिगृहस्थकलहविनश्यद्ग्रामधर्मवत् जगद्विनश्येदित्यर्थः। तेषामीश्वरत्वस्य स्तावकत्वेन कल्पितत्वात्। परमार्थजगदीशस्य तव न कापि क्षतिरित्यर्थः। यथा राज्ञः क्रीडार्थं भूपतिभटसामन्तादिसंज्ञिकदारुविकाराणां शिल्पिवरकल्पितानां क्रीडनकानाम्, आहवजयापजयश्रवणात् नोद्वेगसंरम्भादि जायते, तथा अङ्गाव्ययाद्यनन्तमङ्गलगुणगणनिदानस्य शंभोः तत्त्वविदां वा न कापि हानिः।

तथा हि—

उमाकान्तस्य देवस्य गुणैर्युक्तस्य कोटिशः।
ममर्द चरणौ ब्रह्मा पाणी विष्णुः समाहितः
छत्रं शंभोर्दधारेन्द्रो वायुश्चामरभृत् स्वयम्।
अन्याश्च देवताः सर्वा जयशब्दमथाब्रुवन्॥

विविधमपि गुणौघं वेदयन्त्यर्थवादाः
परिमितविभवानां पामराणां सुराणाम्।
तनुहिमकरमौले तावता त्वत्परत्वे
कति कति जगदीशाः कल्पिता नो भवेयुः॥

ब्रह्मविष्ण्वादयो देवा एके च स्थाणुजङ्गमाः ।
उमाधिपस्य ते सर्वे बालक्रीडनका इव ॥
नास्त्येवातो महेशानात् कश्चित् तुल्योऽधिकोऽपि वा ।

इति **सनत्कुमारसंहितावचनैः** शंभोः पूर्णानन्दस्य तव वैभवमेव वेदादयोऽभिवदन्तीति भावः ।

अन्वयः—हे तनुहिमकरमौले ! अर्थवादा वेदभागाः पामराणां परिमितविभवानां सुराणां विविधमपि गुणौघं वेदयन्तु नाम । तावता त्वत्परत्वे कल्पिताः, कति कति जगदीशाः नो भवेयुः । जगदिदं बह्वीश्वरं भवितुं नार्हतीति । **मालिनीवृत्तम्**; तल्लक्षणं तु—“ ननमयययुतेयं मालिनी भोगिलोकैः ” इति ॥ ४४ ॥

**विहर पितृवने वा विश्वपारे पुरे वा**
**रजतगिरितटे वा रत्नसानुस्थले वा ॥**
**दिश भवदुपकण्ठं देहि मे भृत्यभावं**
**परमशिव तव श्रीपादुकावाहकानाम् ॥ ४५ ॥**

**विहरेति** । हे नाथ ! त्वं **पितृवने**; भूतप्रेतगणान् वनतीति पितृवनम्, तस्मिन् पितृवने; श्रीरुद्रभूमिमित्यर्थः । ननु—श्रीरुद्रस्य श्रीकैलासरत्नसानुमन्दरकंदराद्या विहारभूमयः, पुनः श्रीकाशीकेदारश्रीकालहस्तिचिदम्बरादयश्च सन्ति । किंचिद्रुद्रभूमिरिति कथं प्रसिद्धिरिति चेत्; उच्यते—श्रीरुद्र आकाशवत् सर्वगत एव । तस्य सर्वगतस्य तत्रापि वासो भवति । अन्ये तद्गमनभिया हि अपसर्पन्ति । ततः रुद्रभूमिरिति व्यवहरन्ति, अयोध्याधिपशब्दवत् ।

किं च—श्रीरुद्रस्य नगरग्रामादौ सर्वत्रापि तस्यैव नित्यनिवासाद् वास्तोष्पतित्वप्रसिद्धेः । तथा च **आपस्तम्बः**—

“ न कुसृत्या ग्रामं प्रविशेत्, यदि प्रविशेत्,
वास्तोष्पते इतीमामृचं जपेत्, अन्यां रौद्रीं
वा वास्तुशिवं भवति ”

इति । तस्मात् सर्वमपि शिवस्थलमेव तत्र किं जहाति, किं गृह्णातीति भावः ।

**पितृवने वा विहर**; अथ वा **विश्वपारे**; विश्वस्मात् उपरि पुरोक्तचतुर्विंशत्युत्तरशतभुवनानामुपरि **पुरे वा**; उन्मनान्तसकलभुवनातीतसोमलोकाख्यपरशिवपुरे वा विहर । **रजतगिरितटे वा**; श्रीकैलासमन्दरहिमाचलमहाकैलासे वा । **रत्नसानुस्थले वा**; विहर । देव! तव स्वेतरस्य सर्वस्य मृषात्वेन तरतमज्ञानानुपपत्तेः निस्पृहस्य निरंशस्य व्योमवत् संकोचविकासाभावस्य स्वजनानुग्रहाय केवलम् आदर्शप्रतिबिम्बवत् आकस्मिकेन्द्रचापवत् विचित्ररूपः साम्बमूर्तिः सन् यत्र कुत्रापि विहर ।

हे **महेश!** तत्र उपकण्ठे कण्ठस्य समीपम् उपकण्ठम्, तस्मिन् तव श्रीपादुकावाहकानां श्रीनन्दि-भृङ्ग्यादीनां भृत्यभावं सेवकत्वं दिश प्रयच्छ। एतावद् भाग्यं लब्धं चेत् कृतकृत्योऽस्मीति भावः। **अत्र** ईश्वरविषयमहिम्नां स्फुटं प्रतीयमानत्वात् **प्रेयोऽलंकारः**; तल्लक्षणं तु—प्रेयः प्रियतराख्यानं रसवद् रसपेशलम्" इति ॥ ४५ ॥

**बलमबलममीषां बल्बजानां विचिन्त्यं**
**कथमपि शिव कालक्षेपमात्रप्रधानैः।**
**निखिलमपि रहस्यं नाथ निष्कृष्य साक्षात्**
**सरसिजभवमुख्यैः साधितं नः प्रमाणम् ॥ ४६ ॥**

**बलमिति।** हे **शिव!** सकलकल्याणनिलय! **बल्बजानाम्**; दुर्बलानाम्। **अमीषाम्**; प्रकृतानां हरिविधिशक्रमुखानां सुराणाम्, **बलम्**; बलन्त्यनेनेति बलम्; "बल प्राणने" इति **धातुः**। न बलम् अबलम्, अस्य बलमधिकम्, तस्य बलं न्यूनमिति, **कथमपि**; कृच्छ्रेण शास्त्रेण, तर्केण वा अस्तु। **कालक्षेप-मात्रप्रधानैः**; कालस्य क्षेपः वृथाव्ययः; तन्मात्रमेव प्रधानं मुख्यफलं येषां तैः, कालक्षेपमात्रप्रधानैः, **विचिन्त्यम्**; चिन्तामात्रमेव फलम्, न निर्णयः भवेदिति भावः।

तद्भवतु, त्वत्सिद्धान्तः कथमित्यत्राह—**निखिलमपीति**। हे **नाथ!** न हि कश्चित् मे पक्षः, किं तु **निखिलमपि रहस्यम्**; कर्मोपासनाज्ञानकाण्डत्रयेषु यद्यद् रहस्यं प्रसादोपदेशाभ्यामेव अवगन्तव्यम्; तत् **साक्षात् सरसिजभवमुख्यैः**; विधिहरिशक्रादिसुरवरैः, **निष्कृष्य**; शास्त्राण्यालोच्य, निर्णयं कृत्वा, **साधितम्**; सिद्धान्तितम्; यत् तदेव **नः प्रमाणम्** इत्यर्थः ॥

तत् किमिति अत्रोच्यते; **ब्रह्मगीतायां** तावत्—

"परमशिवसमुद्रेऽहं हरिः सर्वदेवा
मनुजपशुमृगाद्याः शीकरा एव सत्यम्।
विमलमतिभिरेवं वेदवेदान्तनिष्ठैः
हृदयकुहरनिष्ठं वेदितुं शक्यते हि ॥
मायाबलेनैव हरिः शिवेन
समानमाहुः पुरुषाधमाश्च।
मोहेन केचिन्मम साम्यमाहु-
र्माया तु शैवी खलु दुस्तरेयम् ॥"

इति । **सनत्कुमारसंहितायां** व्यासं प्रति विष्णुः—

" ओं नमो वासुदेवाय शिवशास्त्रावतारिणे ।
शिवलिङ्गार्चनव्यग्रचेतसे शिवजन्मने ॥
यथार्थवचसानेन यो मां स्तौति प्रहर्षितः ।
तस्याहं सुलभो व्यास नान्यस्याब्दशतैरपि ॥ "

इति । परमेश्वरस्य **ऐश्वर्यं** पारमार्थिकम्, कल्पितेश्वराणाम् ऐश्वर्यमपि कल्पितमेव भवेत् । " न वा ओजीयो रुद्र त्वदस्ति "; " तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् " इत्यादिभिः **श्रुतिभिः** सर्वेश्वरस्य ते वीर्यशौर्यादिबलं प्रथितमेवेति भावः । **मालिनीवृत्तम्** । लक्षणं तु प्रागुक्तमेव ॥ ४६ ॥

**न किंचिन्मेनेऽतः समभिलषणीयं त्रिभुवने**
**सुखं वा दुःखं वा मम भवतु यद्भावि भगवन् ।**
**समुन्मीलत्पाथोरुहकुहरसौभाग्यमुषि ते**
**पदद्वंद्वे चेतः परिचयमुपेयान्मम सदा ॥ ४७ ॥**

**न किंचिदिति** । हे **भगवन्** ! अयं भगवच्छब्दः त्वयि एव मुख्यार्थ इत्याहुः । ननु—

" अथापि यत्पादनखावसृष्टं
जगद्विरिञ्चोपसृताहणाम्भः ।
सेशं पुनात्यन्यतमो मुकुन्दात्
को नाम लोके भगवत्पदार्थः ॥ "

इति **भागवतवचनात्** मुकुन्द एव भगवच्छब्दार्थो मुख्य इति चेत्, न; अन्योऽपि भगवच्छब्दः मुनिसाधारणोऽस्ति । स एव गौणश्चानीश्वरे अशिवे प्रवर्तते ।

" उत्पत्तिं च विनाशं च भूतानामगतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥ "

इति, पारमेश्वरं भगवत्त्वम् अनितरसाधारणं दृश्यते । **शिवागमे**—

" ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणात् ॥ "

" सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः
षडाहुरङ्गानि महेश्वरस्य ॥"

इति; **सुदर्शनाचार्याः**—

" ऐश्वर्यमग्र्यमनुपाधिमती च लक्ष्मीः
शौर्यं च वीर्ययशसी च विरागता च ।
एते गुणाः षडपि तद्भगसंज्ञयोक्ता
सन्तीत्यनेन भगवानिति ते निराहुः ॥"

इति । अथ **वाचस्पतिमिश्रैः** वेदशिवयोः साम्येन स्तूयते—

" षड्भिरङ्गैरुपेताय विविधैरव्ययैरपि ।
शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥"[1]

इति भगवच्छब्दः परमेश्वर एवेति व्यञ्जयन्ती **श्रुतयः ; अथर्वशीर्षे**—

"यो वै रुद्रः स भगवानिति त्रयस्त्रिंशत्पर्यायेषु अभ्यासात्"

इति; तत्रैव—

" अथ कस्मादुच्यते भगवानिति, यः सर्वान् भावान्
ईक्षति, आत्मज्ञानं निरीक्षयति, योगं गमयति, तस्मा-
दुच्यते भगवान् "[2]

---

१ ईश्वरस्य षडङ्गानि पुराणोक्तानि—

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अचिन्त्यशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥

इति । अव्ययानि वायुपुराणे पठ्यन्ते—

ज्ञानं विरागतैश्वर्यं तपः सत्यं क्षमाधृतिः ।
स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव ॥

इति । वेदस्य षडङ्गानि निरुक्तादीनि । अव्ययानि चादयः । इत्यस्य श्लोकस्य तत्पर्णर्थः ।

२ भगवच्छब्दार्थमाह—अथेति । यः सर्वान्, भावान्, जीवान् मत्स्वरूपमेव सर्वं मद्व्यतिरिक्तं नेतीति निरीक्षित्य पुनः तेषामपि परमेश्वरोऽस्मीति आत्मज्ञानं निरीक्षयति प्रत्यक्परचितोः योगं ऐक्यज्ञानं गमयति प्रापयति स भगवानित्यर्थः ।

इति ।

एवं सहेतुकात् निर्वचनाच्च यत्र कुत्रापि यत् किंचित् मानेन कथितस्या शिवे श्रूयमाणस्य स्वाभिमत-देवतास्तुतौ पर्यवसायात् श्रुतिसिद्धं भगवत्त्वं त्वय्येवेत्यर्थः ! तर्हि—पुनः भगवान् हरिः भागवतमिति प्रसिद्धेः का गतिरिति चेत् ? भगवत्प्रतिपादकत्वात् **भागवतत्त्वं विष्णुपुराणादेर**पि भागवतत्त्वमनिर्गलं प्रसज्जेत, तदपि न । पुनः निर्मूलोऽपि शुक्रः, शनैश्चरो वा शुक्रभगवान्, शनैश्चरभगवानिति व्यवह्रियते, तद्वत् । तस्मात् विष्ण्वादौ भगवच्छब्दो लाक्षणिकः; शिवे तु अनन्यसाधारणो मुख्य इर्थः ।

हे **भगवन्** ! नाथ ! **त्रिभुवने**ऽपि मे **चेतः समभिलषणीयम्**, चेतसा सम्यक् अभिलषणीयम् आशास्यं वस्तु किंचिदपि **न मेने** स्मरामि । कर्मवशात् भाविसुखं सुष्ठु खनति अशुभमिति **सुखम्**; "खनु अवदारणे" इति **धातुः** । दुष्टानि खानि इन्द्रियाणि अत्रेति **दुःखम्** । सुखं वा भाविफलं भवतु भवितव्यमेव तथापि किंचिद् अत्र अभ्यर्थ्यते । तदा **मम चेतः** चित्तं **समुन्मीलत् पाथोरुहकुहरसौभाग्यमुषिते**; विकसत् पद्मान्तरालसौभाग्यातिशायिनी; **ते**; तव, **पदद्वंद्वे परिचयम् उपेयात्** प्राप्नुयादित्यर्थः । त्वत्पदसेवावलम्बात् दुःखाद्यर्थात् न स्मरामीति भावः । अत्र **शिखरिणीवृत्तम्**; "रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी" इति तल्लक्षणम् । **अभ्यनुज्ञालंकारः** । तल्लक्षणं तु—"दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्"[1] इति ॥ ४७ ॥

**उदरभरणमात्रं साध्यमुद्दिश्य नीचे-**
**ष्वसकृदुपनिबद्धामाहितोच्छिष्टभावाम् ।**
**अहमिह नुतिभङ्गीमर्पयित्वोपहारं**
**तव चरणसरोजे तात जातोऽपराधी ॥ ४८ ॥**

**उदरेति** । हे **तात** ! **अहम्**; **उदरभरणमात्रम्**; जठरपिठरीपूरणं केवलं **साध्यम्**; साधयितुं योग्यं फलम्, **उद्दिश्य**; संकल्प्य, **नीचेषु**; वर्णाश्रमवयोऽवस्थादिधर्मैः विहीनेषु, **असकृत्**; प्रत्यहम् निर्लज्जम् । **उपनिबद्धाम्**; विरचिताम् । अत एव **आहितोच्छिष्टभावाम्**; चर्वितचर्वणवद् अन्यत्र देहसंकोचदन्त-विवरणाञ्जलिमुद्रापुरःसरम्; दैन्याभ्यर्थनरूपामेव । **इह**; त्वच्चरणकमलयोरपि आत्मनः सर्वस्य समर्पणोऽपि तामेव **नुतिभङ्गीम्**; स्तुतिरीतिम्, स्तोत्रस्य प्रकारम्, **अर्पयित्वा**; उपहारतया समर्प्यापि अपराध्येव जातोऽस्मि । अत्यल्पफलानि सर्वविधेनापि नीचेषु रचितामेव तेन उच्छिष्टां स्तुतिमेव त्वयि समर्प्यापि अपराध्येव जातोऽस्मि । सर्वदातरि शिवे त्वयि सत्यपि नीचकृतयाच्ञा विनिन्दितैवेति भावः ।

उक्तं च **कुवलयानन्दे**—

---

१ अनिष्टसाधनस्य प्रतीयमानस्य दोषस्य बलवदिष्टसाधनीभूतगुणावहतया इष्टसाधनत्वावगमेन अभ्यर्थनम् अनुज्ञालंकारः; अनुज्ञा, अभ्यनुज्ञेत्यनर्थान्तरम् ।

" त्वयि सति शिव दातर्यस्मदभ्यर्थिताना-
मितरमनुसरन्तो दर्शयन्तोऽर्थिमुद्राम् ।
चरमचरणघातैर्दुग्रहं दोग्धुकामाः
करभमनुसरामः कामधेनौ स्थितायाम् ॥"

इति **न्यायेन** हीनकृतस्तुतिरीतिमेव त्वय्यपि दत्त्वा अपराध्येव अस्मीति भावः । भक्ष्याशया हि मञ्जूषां दष्ट्वा आखुः तेन भक्षित इतिवत् प्रसादाय कृतमपि स्तोत्रम् अपराधाय आसीदिति **विषमालंकारः** ; तल्लक्षणं प्रागुक्तम् । **मालिनीवृत्तम्** ; एतल्लक्षणमपि प्रागुक्तम् ॥ ४८ ॥

**सर्वं सदाशिव सहस्व ममापराधं**
**मग्नं समुद्धर महत्यमुमापदब्धौ ।**
**सर्वात्मना तव पदाम्बुजमेव दीनः**
**स्वामिन्ननन्यशरणः शरणं प्रपद्ये ॥ ४९ ॥**

**सर्वमिति** । हे **सदाशिव!** महाकैलासवासिन्! अत्र सदाशिवशब्दवाच्या पञ्चविंशतिमुखपङ्कजा, पञ्चाशद्भुजदण्डमण्डिता, विधिविष्णुरुद्रेश्वरातीता, मनोन्मनीशक्तिसमेता, स्फटिकप्रभमहाकैलासवासी, केवलानुग्रह-परा, सादाख्यशिवमूर्तिरुक्ता असीत् । स्वापराधक्षान्तिपूर्वकमनुग्रहाय सर्वानुग्रहैकमूर्तिः स्मृता भवति ।

हे देव! **मम सर्वम् अपराधम्** ; त्वद्दत्तमिन्द्रियादिकमवाप्य, गर्भजन्मस्वर्गनरकादिभ्रमणसमयेषु, परमसहायभूतम्, अस्मिन् जन्मनि च चिन्तितमनोरथपूरकं पारमार्थिकं स्वरूपं त्वां, 'सोऽहं, शिवोऽहं ब्रह्मैवाहमस्मि' इति प्रत्यहं सकृदपि अगणय्य कृतघ्न एव सन् नीचविरचितसन्मानत एव कृतकृत्यम् आत्मानं मन्यमानः, अत एव शिवद्रोहिणः मम सर्वं वाङ्मनःकायसंभवम् **अपराधम्** आगः **सहस्व** ; क्षमस्व । अपि च —**महति आपदब्धौ** ; संसारापदब्धौ, **मग्नम्** ; निमग्नम्; **माम्** ; उद्धर ।

ननु---अस्य दीक्षितचरणस्य आपद्वार्ता का? यतः परमेश्वरेण उद्धर्तव्यम् । अयं तु भरद्वाजगोत्रे सद्द्विजकुले अजनि ; तत्तत्कालसंस्कारसंस्कृतः ; **वीरनृसिंहचिन्नबोम्मादि**भूपतिसमर्चितविग्रहः ; सुगुणसुतैः सह यज्ञेश्वरम् आरराध; स्वयम् अमानुषवैभवान् भुवि दर्शयन्, **चतुरधिकशतशिवपारम्य**प्रबन्धगङ्गाप्रवाहेन भुवं शुद्धीकुर्वन् असीदिति प्रसिद्धेः ; तादृशस्य महात्मनः का वा आपद्वार्ता? सत्यमेव । तथापि पुरा श्रीकण्ठविद्येश्वरः किल अवततार । तस्य एतस्य त्वदुदितं संसारसंपत्कुलं सर्वं दुःखप्रायमेव हि । पुनः स्वपदप्राप्तये देवस्य दयां विना नालम् एतत् सुतधनयागादिसाधनमिति जानन् दीनगिरा परिदेवयन् ययाचे इत्यभिप्रायः । मेरुशिखरसु-धर्माख्यसभाधिष्ठितस्य इन्द्रस्य कर्कशशिलास्थितिवत् दुःखप्रदमेवेति भावः ।

पुनः लौकिकरीत्या ते महान्तः सुखिनश्च ; " अहं स्वानामुत्तमोऽस्मानि देवाः " इतिवत् दाक्षिणात्यानां द्विजानां मध्ये महाविद्वान् यशस्फीतप्रथितकीर्तिरेव । किं पुनः सत्त्वगुणानाम् आर्यावर्तदेशवासिनाम् ; तस्यास्य प्रसिद्धिः महत्यस्त्येव । तस्यापीह श्रेयसि तृप्तिरेव कदाचिद् बान्धवाः बहवः संभूय, ' किं तव चिन्तितमस्त्य-स्माभिः पूरणीयम् ' इत्यपृच्छन् , तदुत्तरमेवमाह—

" चिदम्बरमिदं पुरं प्रथितमेव पुण्यस्थलं
सुताश्च विनयोज्ज्वलाः सुकृतयश्च काश्चित्कृताः ।
वयांसि मम सप्ततेरुपरि नैव भोगे स्पृहा
न किंचिदपि चिन्तये शिवपदं दिदृक्षे परम् ॥ "

इति । अस्य तात्पर्यस्तु—शिवाज्ञया प्राग् विरिञ्चिपुरे मातुलगृहे जनित्वा, अडयप्पलाग्रहारे कौमारावस्थां नीत्वा, मध्यार्जुनकावेटिचन्द्रगिरिमुखेषु ग्रामेषु यष्ट्वा , चरमसमये दैवात् चिदम्बरपुरं मुक्तिस्थलं लब्धम् । " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन " इत्यादिश्रुतिविहितानि[1] कर्माणि पुत्रादिभिः सह रचितानि द्विसप्ततिवयांसि अतिक्रामन् । ततश्च भोगवाञ्छालेशोऽपि नास्ति । ततः किंचिदपि न चिन्तयामि ; परं तु शिवपदं शिवस्वरूपमेव द्रष्टुमिच्छामि । यूयं किं मन्मनोरथं पूरयिष्यथ इति भावः । हे **स्वामिन् !** अहम् **अनन्यशरणः** ; न विद्यते शरणम् अन्यत् यस्य सः, अनन्यशरणः । अहं सर्वात्मना सर्वप्रकारेण तव पदाम्बुजमेव **शरणं** प्रपद्ये इत्यर्थः । **वसन्ततिलकं वृत्तम्** ; तल्लक्षणं तु—" उक्तं वसन्ततिलकं तभजा जगौगः " इति ॥ ४९ ॥

**आत्मार्पणस्तुतिरियं भगवन्निबद्धा**
**यद्यप्यनन्यमनसा न मया तथापि ।**
**वाचापि केवलमयं शरणं वृणीते**
**दीनो वराक इति रक्ष कृपानिधे माम् ॥ ५० ॥**

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमत-
प्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्वाहक-
महाव्रतयाजिश्रीमदप्पय्यदीक्षितेन्द्राणां
कृतिष्वन्यतमा आत्मार्पणस्तुतिः
संपूर्णा । शिवमस्तु ।

---

१ तमिति । ब्राह्मणाः द्विजाः, तम् एतं मन्त्रोक्तविशेषणम् औपनिषदं पुरुषम् , वेदानुवचनेन-वेदस्य मन्त्रब्राह्मणात्मकस्य; अनु-पश्चात् गुरूच्चारणानन्तरं वचनं पठनं नित्यस्वाध्यायलक्षणं, तेन वेदानुवचनेन अन्तःकरणशुद्धिद्वारा विविदिषन्ति वेदितुमिच्छन्ति; न तु विदन्त्येव । तथा यजेन द्रव्ययज्ञेन ज्ञानयज्ञेन चेत्यर्थः ।

**आत्मार्पणेति** । हे **भगवन्** । **इयम् आत्मार्पणस्तुतिः**, तत्र तत्र बहुस्थलेषु, आत्मानं मे सहपरिकरैरिति, ' त्वयि निविशताम् अन्तरात्मन् मम आत्मेति च, आत्मसमर्पणाभ्यासात् आत्मार्पणस्तुतिः ; अथ वा—परशिवे आत्मानम्; अभिमानिनं समर्पयन् तदाकार एव स्थित्वा प्रवर्तिता स्तुतिरूपा वाणी या, सापि आत्मार्पणस्तुतिः ; सेयं स्तुतिः, **मया अनन्यमनसा** ; वर्णपदवाक्यार्थशोधनपूर्विका न **निबद्धा**, यद्यपि ; **अयं दीनः वराकः वाचापि** ; वाचैव **केवलं शरणं वृणीते** इति मत्वा, हे **कृपानिधे!** दीनं निहीनम्, एनं **माम् रक्ष** पालयेत्यर्थः । **वसन्ततिलकं** वृत्तम्; लक्षणं तु प्रागुक्तम् । शिवमस्तु ॥ ५० ॥

श्रीमद्दीक्षितविद्येशदेशिकाज्ञावशंवदः ।
शिवानन्दयतिर्व्याख्यां चकारेति यथामति ॥

इति श्रीमद्भारद्वाजकुलजलधिसंभूतश्रीचिदम्बरानन्द-
तीर्थशिष्यश्रीकालहस्तिशरणाविमुक्ताश्रयविमुक्त-
भवश्रीशिवानन्दयतिविरचिता आत्मार्पण-
स्तुतिव्याख्या बालबोधिनी संपूर्णा

शिवार्पणमस्तु

स्वस्ति श्रीमद्भारद्वाजगोत्ररत्नाकरविराजन्मणिवर-
शिवार्कमणिदीपिकापरिमलादिचतुरधिकशत-
प्रबन्धनिर्वहणपारीणश्रीकण्ठविद्येशा-
वताररूपाद्वैतविद्याचार्यवर्यश्रीम-
दप्पय्यदीक्षितचरणविरचिता

**आत्मार्पणस्तुतिरियम्**

तत्कुलभवश्रीचिदम्बरानन्दतीर्थशिष्यश्रीकाल-
हस्तीशशरणाविमुक्ताश्रयविमुक्तभव-
श्रीशिवानन्दयतिविरचितात्मार्पण-
स्तुतिव्याख्या बालबोधिनी
संपूर्णा

शिवाय गुरवे नमः

---

# परिशिष्टम्

## परिशिष्टम् (१)

### आत्मार्पणस्तुतिपद्यानां प्रतीकानुक्रमः

---

## परिशिष्टम् (२)

### संकेतविवृतिः

अ० को० अमरकोशः
अ० प्र० अनुभूतिप्रकाशिका
अ० शिख० अथर्वशिखोपनिषत्
अ० शिर० अथर्वशिरोपनिषत्
आत्म० उ० आत्मबोधोपनिषत्
आदि० आदिनाथः
आनु० प० आनुशासनिकपर्वन्
आ० प० आदिपर्व
आ० गृ० सू० आपस्तम्बगृह्यसूत्रम्
आ० ध० सू० आपस्तम्बधर्मसूत्रम्
आ० सू० आयुष्यसूक्तम्
आश्व० प० आश्वमेधिकपर्वन्
ई० उ० ईशावास्योपनिषत्
ऋ० सं० ऋक्संहिता
ए० का० एकाग्निकाण्डम्
ऐ० आ० ऐतरेयारण्यकम्
ऐ० उ० ऐतरेयोपनिषत्
क० उ० कठोपनिषत्
क० प० कर्णपर्व
कि० आ० किरणागमः
कु० आ० कुवलयानन्दः
कू० पु० कूर्मपुराणम्
कै० उ० कैवल्योपनिषत्
कौ० उ० कौषीतक्युपनिषत्
गौ० ध० सू० गौतमधर्मसूत्रम्
छा० उ० छान्दोग्योपनिषत्

जा० उ० जाबाल्युपनिषत्
जै० भा० जैमिनिभारतम्
ज्ञा० ख० ज्ञानयोगखण्डः
तै० ब्रा० तैत्तिरीयब्राह्मणम्
तै० सं० तैत्तिरीयसंहिता
तै० आ० तैत्तिरीयारण्यकम्
तै० उ० तैत्तिरीयोपनिषत्
धा० पा० धातुपाठः
ना० को० नानार्थरत्नकोशः
ना० नि० नानार्थरत्ननिघण्टुः
ना० र० नानार्थरत्नमाला
निरु० निरुक्तिकारः
प० सू० परशुरामकल्पसूत्रम्
परा० पु० पराशरपुराणम्
पात० सू० पातञ्जलसूत्रम्
पु० प्र० पुरुषार्थप्रबोधः
पौ० आ० पौष्करागमः
प्र० उ० प्रश्नोपनिषत्
प्रा० म० प्रासादमन्त्रोद्धारः
बृ० उ० बृहदारण्यकोपनिषत्
बो० ध० सू० बोधायनधर्मसूत्रम्
ब्र० आ० ब्रह्मानन्दाः
ब्र० ख० ब्रह्मोत्तरखण्डः
ब्र० गी० ब्रह्मगीता
ब्र० ता० ब्रह्मतर्कस्तवः
ब्र० पु० ब्रह्माण्डपुराणम्

ब्र० सू० ब्रह्मसूत्रम्
भाग० भागवतम्
भी० प० भीष्मपर्व
म० भा० महाभारतम्
मा० का० माण्डूक्यकारिका
मा० उ० माण्डूक्योपनिषत्
मु० उ० मुण्डकोपनिषत्
मु० ख० मुक्तिखण्डः
मू० प० मूकपञ्चशती
मौ० प० मौसलपर्व
य० ख० यज्ञवैभवखण्डः
यो० या० योगयाज्ञवल्क्यम्
रु० प्र० रुद्रप्रश्नः
ल० स० ललितासहस्रनाम
लि० पु० लिङ्गपुराणम्
वसि० वसिष्ठवचनम्
वा० आ० वार्तिकाचार्याः
वा० मि० वाचस्पतिमिश्राः
वा० वृ० वाक्यवृत्तिः
विद्या० विद्यारण्यमुनिः
विष्णु० विष्णुपुराणम्
वृ० र० वृत्तरत्नाकरः
व्या० सू० व्याससूत्रम्
शा० उ० शाण्डिल्योपनिषत्
शि० गी० शिवगीता
शि० पु० शिवपुराणम्
शि० बो० शिवज्ञानबोधः
शि० र० शिवरहस्यम्
शि० ल० शिवानन्दलहरी
शै० आ० शैवागमः
शै० सि० शैवसिद्धान्तसारः
श्रु० सू० श्रुतिसूक्तिमाला
श्वे० उ० श्वेताश्वतरोपनिषत्
स० प० सभापर्व
स० सं० सनत्कुमारसंहिता
सि० सा० सिद्धान्तसारावलिः
सू० सं० सूतसंहिता
हिम० ख० हिमाचलखण्डः

---

## परिशिष्टम् (३)

### बालबोधिन्यां, प्रमाणत्वेनोदाहृतानां ग्रन्थानां, ग्रन्थकर्तॄणां च नामनिर्देशः

## परिशिष्टम् (४)

## बालबोधिन्यां प्रमाणत्वेनोद्धृतानां श्रुत्यादिवाक्यानामनुक्रमः

१. प्रलयं चव इति मुद्रितकोशे

१ दृष्टा वाक्षिप्य० इति मुद्रितकोशे

---

1 वेदभाष्यमङ्गलाचरणश्लोकः

---

१ अथ श्लोकः—

**प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।**
**पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥**

इति व्यत्ययेन श्लोकवार्तिके शब्दपरिच्छेदे (४) दृश्यते

१ भक्तिर्भागे सेव्यमाने इति केशवः

२ भवत्पूर्वया ब्राह्मणो भिक्षेत, भवन्मध्यया राजन्यः, इत्यापस्तम्बधर्मसूत्रे। भवत्पूर्वं चरेद् भैक्षं द्विजवर्णी दिने दिने ॥

इति मुद्रितकोशे दृश्यते

---

१ अत्र मूलाधारैकनिलया ब्रह्मग्रन्थिविभेदिनी इति पाठो युक्तः

१ विश्वो हि स्थूलभुङ्० इति मुद्रितकोशे
२ विपदो नैव० इति मुद्रितकोशे

---

१ अयं श्लोकः श्रीशंकरभाष्यव्याख्याया भामत्याः मङ्गलश्लोकः

---

# परिशिष्टम् (५)

## प्रधानपदानुक्रमः